SRI KRISHNA VIJAYA

OF

Sankara Kavi.

1914

SRI KRISHNA VIJAYA

OF

Sankara Kavi.

EDITED BY

P. S. ANANTHANARAYANA SASTRY

(

1914

PRINTERS AND PUBLISHERS'
THE MANGALODAYAM CO., LTD., TRICHUR.

[*Price*

/ 95

अवतारिका ।

निसर्गतोऽपि रमणीयं वस्तु यथावदनुपलाल्यमानं न हि ...म वहति तादृशं सौभाग्यं, यादृशमस्य लालनायामुपजायते । आकरादानीय निकषेण समुल्लिख्य कनकाङ्गुलीये उत्पत्तिः विन्यस्य करकमलेन महापुरुषैर्धार्यमाणस्य यावदस्ति सुभगंभावुकत्वं रत्नतल्लजस्य कलापि तस्य कथमुदे- ... पांसुरूषिते प्रमुषितप्रकाशे स्वयमनर्घेऽपि खनिगते रत्न- ... ? भोजविक्रमार्कप्रभृतिभिरिह भूमण्डलाखण्डलैः साभि- ...आद्रियमाणायाः सुरसरस्वत्याः किमपि पचेलिमभासीद्भा- ...धेयं, तत्प्रणयिनां च पुण्यपुरुषाणाम् । भारतभूमौ समु- ...ता एव राजवंशकरीरा गैर्वाण्यास्तथाविधं समुल्लासमापाद- ...ासुर्यः किल कालकौटिल्यकृतेन व्यतिकरशतेनापि न स- मूलघ...तमाहन्तुं पार्यते । केरळीया अपि वसुमतीवल्लभाः ...न्धानां निर्माणेन निर्मापणेन च गीर्वाणभाषामतिमात्रस- ...मानिन्नित्यत्र सन्ति सुबहूनि पुरातनचरितगवेषकाणां सुगमा- नि ...दर्शनानि । आ कुमारीक्षेत्राद्गोकर्णालयपर्यन्तं व्याप्नुव- ...रळमण्डलस्य दक्षिणसीमसंनिकर्षे प्रतिष्ठितं स्यानन्दूरं

संस्कृतसाहित्यसमुल्लासने कियन्तमभजत भागमिति नेदं तिरोहितं नाम सहृदयानां; ये किल प्रतिकलमिव साक्षात्कुर्वन्ति तत्रत्यमहाराजशासनेन प्रकटीक्रियमाणां महाराजवंशमुक्तामणिभिः पूर्वपुरुषैः संकलितां च निर्मापितां च संगृहीतां च ग्रन्थरत्नपरम्पराम् । केरळमण्डलस्य प्राय उत्तरसोमनि विलसमाने कोलभूभागे(१) कृतवसतयो महीपतयोऽपि बहोश्चिराद्गीर्वाणीप्रणयिन एवासन्नित्यत्र साक्षिभूयं वहति तत्रत्यकेरळवर्मराजशासनवशंवदेन शङ्करकविना संकलितमिदं कृष्णविजयनामकं काव्यरत्नम् ॥

"कौलानेलावनसुरभिलान् याहि यत्र प्रथन्ते वेलातीतप्रथितवचसः शङ्कराद्याः कवीन्द्राः"(२) इति वदतः कोकिलसंदेशप्रणेतुरुद्दण्डपण्डितस्य हृदयहारी कोऽयं कविः शङ्करकविरिति, मन्यामहे, चिराय कुतुकिनः स्युर्वयमिव बहवोऽन्ये संदेशवाचका इति । तमिमं कविपुङ्गवं काव्यमुखेन सहृदयानां पुरतोऽवतारयितुमधुना संजातभागधेया धन्यमात्मानमभिमन्यामहे । अयं च केरळेषु "मारारि"ति व्यपदिश्यमानं देवदासवर्गमात्मना पवित्रयामासेति पुराविदो वदन्ति । कदाचन देवक्षेत्रान्तः क्वापि कोणे ति-

---

(१) Chirakkal.

(२) पूर्वभागे षष्टितमं पद्यमवलोक्यताम् ॥

छन्नेष कविवरो देवीदर्शनार्थमागतस्योद्दण्डपण्डितस्य,

"संभरितभूरिकृपमम्ब शुभमङ्गं
शुम्भतु चिरन्तनमिदं तव मदन्तः" ।

इति पद्यार्धे तत्क्षणमेव,

"जम्भरिपुकुम्भिवरकुम्भयुगडम्भ-
स्तम्भिकुचकुम्भपरिरम्भपरशम्भु" ॥

इति पूरयन् परमं विस्मयं तस्य जनयामासेत्यपि किंचनास्त्यैतिह्यम् । सर्वथापि कविरयमुद्दण्डकवेः समानकालजात इति निर्विवादमेतत् । उद्दण्डकविश्च ६०२(१) तमकोळम्बाब्द (१४२६. A. D.) सन्निकृष्टे समये समवर्ततेति सर्वसंमतोऽयमंशः । अतः कविरेष केरळेषु प्रख्याततमान्नारायणभट्टपादात् प्राक्कालिकः काकश्शेरिभट्टाभिधानस्योद्दण्डदर्पदमयितृत्वेनाभिषिक्तस्य सिद्धपुरुषस्य समानकालिकश्च जीवितमधारयदिति निर्धारयितुं पारयामः । 'चन्द्रोत्सव'नाम्नि चानिर्णीतनिर्मातृके प्राचीनतमे केरळभाषाप्रबन्धे कवेरस्य नामधेयमुल्लिखितमुपलभ्यते ॥

---

(१) 'मङ्गळोदय'जनतया प्रकाशितस्य कोकिलसन्देशस्यावतारिका विलोक्यताम् ॥

केरळेषु विशेषतः प्रख्यातिमुपगतस्य शब्दार्थसौष्ठवसुन्दरस्य सुकुमारकविप्रणीतस्य कृष्णविलासकाव्यस्य सरणिमनुसरति महाकाव्यमिदमिति प्रत्यक्षमेतत् । श-
रचना ङ्करकविरपि सुकुमार इव सुमेरुवर्णनप्रस्तावेन कथावस्तु समारभते। एवमुपक्रान्तं वस्तुसाम्यमुपरितनेष्वपि बहुषु भागेषु साम्यमापादयन्नात्मनः कृष्णविलासप्रतिपत्तिमभिव्यञ्जयतीव कविरयम् । परं तु, कविरयं शब्दसंदर्भरम्यतासंपादने तथोच्चावचवचोवैचित्र्यसंकलने चानितरसाधारणं कमपि पाटवातिरेकं प्रदर्शयन्नपि रसभावयो रम्यतायां वचसां च प्रसादे नैव कृष्णविलासकक्षामधिरोढुमलं भवतीति काममभ्युपगन्तव्यमापतति । कृष्णविलासकाव्यस्योत्पत्तिकालो नैतावतापि सप्रमाणं निर्धारित इति विलासस्य किं न स्याद्विजयच्छायानुसारितेति प्रत्यवतिष्ठमानेष्विदमेत्र नः समाधानं, यदुत तादृशकाव्यनिर्माणशक्तिशाली कविकेसरी काव्यान्तरच्छायामपहरन्नपि वा नैतादृशात् सामान्यकवेः स्वयमर्थान् संजिघृक्षेदिति संभावनीयमेतत । ऐतिह्यमपि कृष्णविलासस्य प्राचीनतामेव प्रतिष्ठापयतीति तस्यैव मन्यामहे युज्यतेतमामितः प्राचीनता । कृष्णविलासस्य चारुतातिशयं सहृदयानां विशदयितुमिदमेकमेवोदाहरणं पर्याप्नुयादिति प्रतीमः । अनुवाच्यतामेष रुक्मिणीसंदेशहारकस्य ब्राह्मणोत्तंसस्य सूक्तिनिष्यन्दः—

मनोहरां त्वत्प्रतियातनां तां सचेतनां कर्तुमिवाद्दता सा ।
निवेश्य तत्रैव मनो मनोज्ञा स्वयं तु चित्रे लिखितेव तस्थौ ॥

(विलासः, १०, ३९ ।)

एतादृशमेकमपि वा पद्यं श्रीकृष्णविजयस्थमेतत्प्रघट्टकं विजयं वा सकलमसकृदवधानेन परिशोधयतामपि रसिकजनानां कनिष्ठिकां नाधिरोहतीत्यहो अन्तरं प्रतिभायाः पाण्डित्यस्य चेति वयमाकलयामः । विजयो विलासमाशयेन क्वचिदनुधावतीति विस्पष्टमेतदाचष्टे—

अहार्षीदरविन्दाक्षस्तस्या वपुषि विक्रियाम् ।
उदपादि पुनस्तेन हृदि सा मन्मथोद्भवा ॥

(विलासः, ८, १२७ ।)

अहार्षीद्विकृतिं तस्या वपुषः पुरुषोत्तमः ।
अवर्धयत तां तस्या मानसे मीनकेतनः ॥

(विजयः, ७ १४४ ।)

वचोवैचित्र्ये पुनः शङ्करकविः स्पृहणीयमितरदुरवापं च साम्राज्यपीठमधितिष्ठतीति तदिदमस्य परममुत्कर्षनिदानम् । सुकुमारा चाक्लिष्टा च मसृणा च सरस्वती शङ्करकवेः । अनुप्रासधोरणी च गङ्गातरङ्गसाधारणी । न हि शङ्करकविरपरः कविरिव पर्यायमात्रलालाटिकः कल्पनादरिद्रश्च वेदः, निगमः, आगम इति पुनः पुनरावर्तयति । परं तु त-

त्व स्थाने अनिदंप्रथमा गिरः, विधातृमुखवैखरीति रीत्या निर्माणसुन्दराणि पदकदम्बकानि वितन्वानो वैचित्र्यमापादयति । रचनासौकुमार्यमपि समवलोक्यतामदसीये वचोनिगुम्भे—

मदापगाशीकरसेकशीता माध्वीलिहां मांसलिता निनादैः ।
हरन्तु तापं हरनन्दनस्य कल्याणदाः कर्णसमीरणा मे ॥

विजयः, १, १

इतरेभ्योऽपि तावदनुप्रासेभ्यः कवेरस्य भूयसाप्यादिमाक्षरानुप्रासः प्रेयानिति पद्यान्यदसीयानि सर्वतः स्फोरयन्ति । रसभावयो रम्यतामितोऽपि संपादयितुमितरेऽपि बहवः प्रभवेयुः कवयितारः, तदपि वचोनिर्माणशिल्पमदसीयमनन्यकल्पमिति स्वाभिसन्धिमाविष्करोतीव "वेलातीतप्रथितवचसः" इति विशेषणप्रयोगेण बहुमतिमादधानो निगूढाहंकृतिरुद्दण्डपण्डित इति चास्मान् प्रति भासते । अनुपालितं च कविनैतादृशं काव्यमाकलयता "काव्यं कुरु श्राव्य"(१)मिति भर्तृशासनस्याक्षरशोऽनुवर्तनं सर्वत्रापि । कैरळीमाहिळाया मङ्गल्यतन्तुत्वेन परिलाळ्यमानः संस्कृतभाषाकविभिरपि प्राचीनैः क्वचन(२) विरळतया समादृतश्च द्वितीयाक्ष-

(१) विजयः १, १६ पद्यं दृश्यताम् ॥

(२) अष्टाङ्गयोगानवतोऽस्य राज्ञो मृष्टान्नमासीन्मृदु कन्दमूलमित्यादिकमुदाहरणम् ॥

प्रासः प्रकृतकाव्ये बहुलं प्रायुज्यत कविना केरळीयानां हृ-
यमिवावर्जयितुकामेन । कल्याणपदालंकृतेन मदापगेत्यादिमङ्ग-
पद्येन विनायकविषयकेण, "कल्याणं वो विधत्ता"मिति "म-
धुनीखेलल्लोलम्बं" मत्त'वेतण्डरत्नं' प्रार्थयमानं कविमनन्तभट्टं
मारयन्नेष शङ्करकविः वचोवैचित्र्याधाने सहोक्तिसंग्रथने च
चिदनन्तभट्टमनुकुर्वाणो दरीदृश्यते । बहुविधैश्च शब्दप्रयोगभं-
रात्मनः शब्दतन्त्वनदीष्णतामप्याविष्करोति । विशेषतश्च के-
ळीयप्राचीनान्यकवयितार इवायमपाणिनीयस्य शब्दसंदोहस्य
ानुमन्यते काव्यरङ्गप्रवेशमिति कापि महीयसी श्रद्धास्य
ाणिनीयतन्त्वे । एवं नाम वश्यवचसोऽपि कवेरमुष्य व-
स्तु क्वचन 'केरळीयसंस्कृत'त्वप्रत्यभिज्ञापकानि दण्डनार्थे
क्षतिप्रयोगप्रभृतीनि कथमपि नेतव्यानि हन्त प्रादुःपन्त्य-
क्तिचिह्नानीत्यत्र देशपरिचयस्याजय्यता परमपराधिनी । व-
स्वभावाननुगुणेऽप्यलंकारनिर्माणे कवेः करं निवेशयन्नलं-
ारलोभः कत्रिमेनमबाधतेति बहुशश्चित्रीयते नो हृदयम् ।)
यदयं, वसन्तवर्णनसंरम्भे प्रकृतिसुकुमारमपि मलयानिलं क-
रालाकृतेः केसरिणो रूपेण योजयामास । न ह्येता दो-
षकणिकाः काव्यस्यास्य चारुतामपहन्युरिति यद्यपि संम-
न्यामहे, तदपि कियन्नाम रामणीयकमेतासामप्यभावे समु-
दियादिति गुणासौहित्ती परमेवं मुखरयते ।

कवयो हि राज्ञां संश्रयेण प्राप्नुवन्त्यर्थजातमिति प्रथितमेतत् । अयमपि शङ्करकवी राजसेवासादितार्थ एवावर्तत । परं त्वस्य कवेरन्यादृशमर्थजातं कस्यचन उपजीव्यतां राज्ञोऽप्युपाकुरुतेति परमा सीमेयं भाग्यपरिपाकस्य । स किल कृष्णगीतिप्रणेता मानवेदराजो यथाभिलषितं समग्रहीदर्थजातं सुकुमारादिव (१) श्रीशङ्करकवेरिति नेदं निगूहितुं पारयामः । पश्यन्तु सहृदयाः—

शनैस्तनुतां त्यक्त्वा तन्मध्यं गुरुतां दधौ ।
दुःखं तु गुरुतां मुक्त्वा नाकिनां तनुतामपि ॥

(विजयः, २, ४)

उद्वृत्तेन कठोरेण विनाहारेण तिष्ठता ।
कंसेन तत्कुचेनापि मुखे मलिनिमा दधे ॥

(विजयः, २, ६ ।)

कृशतरमुदरं गरिमपरीतं विबुधव्यसनमतो विपरीतम् ।
स कुचो मलिनमुखोऽतिकठोरो यदुपवदजनि विमुक्ताहारः ॥

(गीतिः)

पीताम्बराश्रितकटीर(२)तटीमनोज्ञ-
स्तिष्ठन् भुजङ्गपतिमूर्धनि पङ्कजाक्षः ।

---

(१) सुकुमारादर्थहरणं कृष्णगीतेरवतारिकायां विशदीकृतम् ॥
(२) कटीरः=कटिः ॥

संप्राप नीलगिरितुङ्गशिलानिषण्ण-
बालातपच्छुरितबालतमाललीलाम् ॥

(विजयः, ४, ६९ ।)

पीताम्बरेण रुचिरेण विरोचमानस्तिष्ठन् भुजङ्गपतिमूर्धनि भेजिरे त्वम् ।
बालांशुमालिकरजालविराजमाननीलाचलाग्रभवबालतमाललीलाम् ॥

(गीतिः ८२ ।)

किमु नः स्मरति क्षणं मुकुन्दः पुरनारीजनपूर्णपुण्यसीमा ।
पिचुमन्दलताः पिकः किमिच्छेद्विहरन्नूतनचूतवल्लरीषु ॥

(विजयः ८, ६० ।)

कथमिमाः स्मरेद्ग्रामकामिनीरनुभवन्नयं पौरकामिनीः ।
किमु पिकः स्मरेन्निम्बमञ्जरीरनुभवन्नयं चूतमञ्जरीः

(गीतिः ।)

सरसिजनयनस्य भास्वतोऽग्रे मुहुरथ दीप्तिभरं समेत्य राजा ।
अभजत विकळङ्कतां स चित्रं करकमले अपि कोरकीचकार ॥

(विजयः, ११, ५ ।)

तव भास्वत्करस्पर्शाद्राजन् राजा कराम्बुजम् ॥
अयं कोरकयन् स्वीय कळङ्कं तु जहावहो ॥

(गीतिः २९१ ।)

अथवा स्थाने राज्ञामन्यतोऽर्थरत्नहरणं, स्थानेतरां च
रम्यार्थरत्नाकरस्य महाकाव्यस्यास्यार्थलालसैरभिगम्यतापि ॥

श्रीमद्भागवतपुराणस्य दशमस्कन्धे वर्णितः सर्वोऽपि

कथाभागो यथायोग्यमत्र संनिवेशित: काव्यशरीरे । तत्र च यथासंभवं नगरार्णवादिवर्णनेन महाकाव्यलक्षणमपि संपादयत्येष कविपुङ्गव:, न पुनर्नगरार्णवादिवर्णनव्यसनितया काव्यशरीरमेकत: कुटिलयन्नपरत: संकोचयान्नितरतश्च विस्तारयन्नुद्वेजयति रसिककुलम् । महाभागवताद्वस्तु संगृह्णता तु कविना स्वयमकामयमानेनापि क्वचन वर्णनपरिपाटी परत: शब्दार्थसंततिश्च तत: पर्यगृह्यतेति नैसर्गिकमपरिहरणीयमप्येतत् । पारमर्षो हि शब्दब्रह्मप्रकाश: कविकुञ्जराणां मार्गदर्शीति न च तत्र किंचिदनौचित्यमाकलयते रसिकलोक: । कृष्णविलासकाव्यं कविनैव न समापितमासीदिति तदीयं कथावस्तु कियदवधिकं कविना संकल्पितमिति को नु नाम जानातु ? । गीतिप्रणेता पुनर्वस्तुविषये विजयं सर्वतोऽप्यनुसरन्नन्तत: स्वकृतेरुत्कर्षमाधातुकाम इव भगवत: परस्मिन् ज्योतिषि निलयनमपि संकलयामास । गहनतरतत्त्वोपदेशजटिलमेकादशस्कन्धमालोडयितुमकृतश्रमोऽयं विजयनिर्माता सुकुमारमति: कोऽपि सहृदय एवासीदिति गणयन्तो यावदुपलभ्येत पुष्कलतमं प्रमाणजातं तावददसीये निगमान्तनैपुण्ये विप्रतिपद्यन्तां नाम शास्त्रैकचक्षुष: कर्कशमनीषा: । रसास्वादनलालसस्तु रसिकसार्थ: स्वयमत्रैवाधिगमिष्यति ब्रह्मानन्दसंदोहमिति जितं तावता कवेरुद्यमेन ।

यदीयशासनवशंवदेन कविनेदं काव्यमारचितं सद्वंश्यानामेव भूवल्लभानां ग्रन्थागारात् साम्प्रतिकेन 'मङ्गळोदय'कार्यदर्शिना श्रीमता कुञ्ञिरामनेनवेन ताळमुद्रापणम् पत्रलिखितः कश्चिदस्यादर्शः प्रथममासादितः । जन्मभूमिमजहत्यपि तस्मिल्लेखकप्रमादजनिता अशुद्धयः सन्त्येव सुतराम् । अतः कथंचिदतिवाहितेऽपि तदवलम्बेन सर्गचतुष्टये तन्मात्रशरणानां मुद्रापणसमापनमशक्यप्रायमिति चिन्ताकुलानामस्माकं श्रीमता एम्-उण्णि एराटि इत्यनेन करुणया समर्पितमपरं काकललिखितं पुस्तकम् । तदपि न साकल्येन शुद्धमासीत् । तथाप्युभयावलम्बनेन काव्यशरीरं संपादयितुं कथमप्यपारयाम । आदर्शप्रदातृषु चिरक्कल् रामवर्मराजमहाभागेषु एराटिमहाशयेषु च महती कृतज्ञता मङ्गळोदयस्येति तत्प्रातिनिध्येनायमावेदये । प्रसाधकधुरामधिवहता जनेनानेन यदनुष्ठितं टिप्पणीलेखनादि तस्य पुनः सामञ्जस्ये सहृदया एव सन्तु प्रमाणम् । मितंपचमतेरस्य रसिककिंकरस्य बालभावादनवधानादपरिचयाच्च समापतितानि स्खलितानि तु मृष्यन्तां गुणग्रहणालुना रसिकलोकेनेति क्रियासमभिहारेण प्रार्थयते—

TRICHUR 15—10 -'14	रसिकजनचरणसेवी अनन्तनारायणशास्त्री ।

श्रीकृष्णविजयः

मदापगाशीकरसेकशीता माध्वीलिहां मांसलिता निनादैः ।
हरन्तु तापं हरनन्दनस्य कल्याणदाः कर्णसमीरणा मे ॥ १ ॥

आकम्रमन्दाररुचं कवीन्द्रमाकन्दवासन्तरमाविलासम् ।
एकं निधानं वचसामुपासे पाकं पयोजासनपुण्यराशेः ॥ २ ॥

कल्याणबीजाङ्कुरजन्महेतुः कटाक्षकाळाम्बुधरो गुरूणाम् ।
प्रनर्तयत्वाशु कृपाम्बुवर्षैः प्रज्ञामयूरीं मम दीनदीनाम् ॥ ३ ॥

शृङ्गारसर्वस्वहरेक्षणानि कुमुद्वतीभङ्ग्यवतंसितानि ।
वीक्षामहे चेतसि मूर्तिमन्ति दाक्षायणीलोचनकौतुकानि ॥ ४ ॥

नमोऽस्तु तस्मै मुरळीरताय काळिन्दकन्यापुळिनेचराय ।
तापिञ्छपर्यायरुचे परस्मै गोपीस्तनाभोगतपःफलाय ॥ ५ ॥

चकास्ति राजा चतुरन्तवीरचूडातटीचुम्बितपादपीठः ।
कालाग्निकूलंकषबाहुतेजाः कोलाधिपः केरळवर्मनामा ॥ ६ ॥

---

(१) मदापगा = मदझरी । हरनन्दनो विनायकः । (२) वचसां निधानं = वाग्देवता । (३) रूपकमलङ्कारः ॥

शिवेश्वराख्ये भवनोत्तमे यः श्रुत्यन्तरत्यन्तनिगूढरूपम् ।
प्राकाशयत् प्रौढतपःपटिम्ना पञ्चेषुलीलापरिपन्थि तेजः ॥ ७ ॥

प्रचण्डिमा शिक्षयते यदीयदोर्दण्डजन्मा रिपुसुन्दरीणाम् ।
पत्रांशुकानां परिधानरीतिं कन्दाशनं काननचंक्रमं च ॥ ८ ॥

उर्वीभरं बिभ्रति यत्र नृणां गुर्वीं मुदं तन्वति चान्नदानैः ।
दर्वीकरेन्द्रश्च करारविन्दे दर्वी च विश्राम्यति शैलजायाः ॥ ९ ॥

पात्रं श्रियस्तस्य चकास्ति राज्ये क्षेत्रं विहाराचलनामधेयम् ।
जगत्सवित्री खलु यत् पवित्रीकरोति नीहारगिरीन्द्रपुत्री ॥ १० ॥

विभाति तस्मिन् गिरिजाकटाक्षपात्रीभवन् कश्चन सूरिवर्यः ।
श्रीकोलभूपालकहर्षसिन्धुराकाशशी राघवनामधेयः ॥ ११ ॥

सदा मनीषामयताम्रपर्णीसंपर्किणो वाङ्मयमौक्तिकानि ।
भाग्यैकसिन्धोः समवाप्य यस्मात् सुधीजनः कण्ठसङ्गकरोति १२

अन्तेवसन् कश्चन तस्य चासीत् कवित्वमार्गे कलितप्रचारः ।
आचार्यकारुण्यजलप्ररूढप्रज्ञाङ्कुरः शङ्करनामधेयः ॥ १३ ॥

अर्धं शरीरस्य च शीतभानोः कलत्रयन्ती च वतंसयन्ती ।
काचित् कृपा कण्ड्वपुरैकभूषा कामप्रसूर्यत्कुलदैवमास्ते ॥ १४ ॥

---

(७) प्राकाशयत् = प्रत्यक्षीचकार । (८) पत्रांशुकम् = पर्णवसनम् । (९) दर्वीकरेन्द्रः = आदिशेषः शैलजा = अन्नपूर्णेश्वरी ॥ (१४) पूर्वार्धे यथासंख्यम् ॥

नित्यं विहाराद्रिजुषो भवान्याः स्तोत्राम्बुभिः सन्नतिदोहळैश्च ।
अकारि यस्याङ्कुरितो महीयान्नवत्वमाश्रित्य कवित्वशाखी ॥१५॥

कोलेश्वरस्तं मुदितः कदाचिदास्थानवर्ती नृपचक्रवर्ती ।
निष्णातधीः कृष्णकथानुबन्धं काव्यं कुरु श्राव्यमिति न्यगादीत्

कृशापि कोलेशवचस्समीरसंप्रेरणादैशिकदृष्टिनावा ।
भक्तिद्वितीयाथ तदीयवाणी पारं गता कृष्णकथापयोधेः ॥ १७ ॥

मरन्दगर्भं मधुवैरिचित्रचरित्रसौरभ्यमनोज्ञमेतत् ।
काव्यप्रसूनं कविमार्गविज्ञाः कर्णावतंसं कलयन्तु सन्तः ॥ १८ ॥

वाचां चमत्कारकरी न माध्वीझरीपरीपाकधुरीणतास्मिन् ।
तथापि मौकुन्दकथासुधासु पिपासवः किं न भवन्ति सन्तः १९

अस्ति प्रभापुञ्जपिशङ्गिताशस्त्रैलोक्यलक्ष्मीतिलकायमानः ।
सुमेरुनामा सुरवासभूमिर्गिरामभूमिर्गिरिसार्वभौमः ॥ २० ॥

महीभृतो यस्य मही विशालं सिंहासनं तारगणाश्च हाराः ।
चन्द्रार्कबिम्बौ मणिकुण्डले च पुरी किरीटं च सुरोत्तमानाम् २१

आन्दोळितानामनिलेन यस्मिन्नभ्रंलिहानामचनीरुहाणाम् ।
विगाहमाना विटपाग्रसीमां कुर्वन्ति ताराः कुसुमौघशङ्काम् ॥२२॥

वाटीषु वाटीषु यदीययोषाः शीतासु नीताः सुरतेन तान्तिम् ।
उत्फुल्लसत्पल्लवपुष्पशय्याभद्रासु निद्रासुखमाद्रियन्ते ॥ २३ ॥

मानपहोच्चाटनकर्म कर्तुं कुञ्जेषु यस्मिन् कुटिलेक्षणानाम् ।

मन्त्रायते मन्मथमान्त्रिकस्य कोलाहलः कोकिलकामिनीनाम् २४
हृताम्बरा यत्र दरीषु मुग्धाः स्निग्धाङ्गनाः कामिजनेन रागात् ।
नानांशुपुञ्जं महतां मणीनां चीनांशुकानीति करैः स्पृशन्ति २५
यस्मिन् निशायामपि शोणरत्नमरीचिबालातपशोभमाने ।
तनोत्यनध्यायविघातशून्यां कोकद्वयी मान्मथतन्त्रशैलीम् ॥ २६ ॥
रागस्य संजीवनहेतुमायुष्टोमं चिकीर्षुर्नियमेन यस्मिन् ।
यूनां सदा रक्षति मन्मथाग्निं मन्दाकिनीमारुतमन्त्रवादी ॥२७॥
मणिप्रभायां तरसा सरन्त्यां वाताहतोद्भिन्ननिकुञ्जरन्ध्रैः ।
कम्पाकुला यत्र दृशो भवन्ति शम्पाधिया किम्पुरुषाङ्गनानाम् २८
उदञ्चिता शक्रमणिप्रपञ्चान्नभस्तले यत्र गभस्तिमाला ।
सार्द्धं सुरेन्द्रापगया विहर्तुमूर्ध्वं चलन्ती यमुनेव भाति ॥ २९ ॥
भारं वहन्नम्बुजसौरभाणां विश्रम्य विश्रम्य लतागृहेषु ।
पिबन्मुहुर्निर्झरवारि यस्मिन् मन्दं प्रयाणं मरुदातनोति ॥ ३० ॥
पौष्पैर्विधत्ते पवमानपोतः पाथोजिनीसौरभपारदृश्वा ।
पांसूत्करैर्यत्र पयोरुहाक्षीपट्टांशुकानां पटवासलक्ष्मीम् ॥ ३१ ॥
मध्येशिरश्शृङ्गमुपेत्य यस्मिन् मुग्धा मुहुर्विस्मयकौतुकिन्यः ।
दिवाविलासं च निशाविलासं सहैव पश्यन्ति सरोरुहाक्ष्यः ३२

---

(२८) शम्पा=तडित् (२९) उत्प्रेक्षालङ्कारः ॥

पञ्चानना यत्र नितम्बवीथीसञ्चारिणो निस्वनतः पयोदान् ।
मातङ्गबुद्धेराधिरुह्य वेगादातन्वते कूपनिपातरीतिम् ॥ ३३ ॥

आशामुखेषु स्फटिकांशुपूरान्निशाकरश्रीसदृशान्निरीक्ष्य ।
चञ्चूपुटं यत्र चकोरपोतरिञ्छोलिका चञ्चलमातनोति ॥ ३४ ॥

मानं च मीनध्वजपावकं च दरिद्रयन्तश्च विनिद्रयन्तः ।
यन्मारुताः किम्पुरुषाङ्गनानां पुंभावलीलां पुनरुक्तयन्ति ॥ ३५ ॥

क्वापि श्रिता काञ्चनकान्तिपूरैः कुत्रापि सुत्रामणिप्रभाभिः ।
मन्दाकिनी यत्र कालिन्दकन्यासरस्वतीसंवलितेव भाति ॥ ३६ ॥

माणिक्यरत्नौघमरीचिकानां मध्ये चरिष्णुर्मलिनाम्बुवाहः ।
यत्र स्फुरत्पावकदीप्तिमालाव्यालोलधूमभ्रममातनोति ॥ ३७ ॥

अपत्रपिष्णोरमलानि दृष्ट्वा वक्त्राणि यस्मिन् वरवर्णिनीनाम् ।
कळङ्कमिन्दोः कृपयेव भासा सितोपलाळी धवळीकरोति ॥ ३८ ॥

तदीयशृङ्गे तरुणार्ककोटिपाटल्यपाण्डित्यहरप्रकाशम् ।
विभाति विस्मापितविश्वलोकं निकेतनं नीरजसंभवस्य ॥ ३९ ॥

विद्योतमानैर्मणिमन्दिराणामुद्योतजालैर्गगने विशालैः ।
प्रद्योतनः सङ्गमनेन यस्मिन खद्योतलीलामुररीकरोति ॥ ४० ॥

खेलन्ति लोलन्ति निविश्य पद्मान्यापीय वापीसलिलानि यस्मिन् ।
भृङ्गीभिरङ्गीकृतसाहचर्या वाटीषु पाटीरसमीरपोताः ॥ ४१ ॥

---

(४०) प्रद्योतनः = सूर्यः । खद्योतः = ज्योतिष्मान् कीटविशेषः ॥

स्फुरन्ति शक्रोपलगारुडाश्ममाणिक्यमुक्तामणिकान्तिपूरैः ।
शैवालिताः शाद्वलिता यदीयाः सिन्दूरितास्तारकिता दिगन्ताः ४२

प्रभातवेलानियमावसाने सभान्तराळे सहितो मुनीन्द्रैः ।
मध्येहिरण्याम्बुरुहं कदाचिदध्यास्त तास्मिन्नरविन्दजन्मा ॥ ४३ ॥

प्रपञ्चनिर्माणविचक्षणानामपञ्चबाणादिविरोधभाजाम् ।
अलंचकाराथ सभा मुनीनां विरिञ्चदत्तानि महासनानि ॥४४॥

चूडाग्रजाग्रत्करकोरकाभैर्मयूखभूम्ना मकुटीमणीनाम् ।
पुंसः पुराणस्य पुरन्दराद्यैः पदाम्बुजं पाटलयाम्बभूवे ॥ ४५ ॥

स्मितांशुचन्द्रातपकन्दळीभिर्विधेस्तदानीं विबुधोत्तमानाम् ।
आनन्दपीयूषपयोधिवीचीपरम्परा पक्ष्मळयाम्बभूवे ॥ ४६ ॥

तदा चरन्ती शनकैः किरन्ती बाष्पान्सङ्घारविभुग्नकण्ठी ।
हिरण्यगर्भं धरणी विषण्णा शरण्यमेनं शरणं प्रपेदे ॥ ४७ ॥

पुरः स्थिता बाष्पजलार्द्रगात्री शनैर्धरित्री शतपत्रयोनेः ।
कथञ्चिदुन्नामितपूर्वकाया कराम्बुजं कोरकयाञ्चकार ॥ ४८ ॥

भुवं लिखन्ती चरणेन दीर्घं निश्वस्य बाष्पस्खलदक्षरा सा ।
नानामुनीन्द्रामरमध्यभाजं दीना बभाषे नळिनाधिवासम् ॥४९॥

अनन्वितं स्वावचनं सभायां विशेषतः स्वामिसमन्वितायाम् ।
विपत्तिहेतोः कथये तथापि विपन्नवाणी न विगर्हणीया ॥ ५० ॥

---

(५०) अनन्वितम् = अनुचितम् ॥

विपत्पिशाचीपरिपीडितायां मयि प्रभो, तद्भयशङ्किनीव ।
अपत्रपा मां परिमुच्य याता तेनैव धृष्टा कथये भवन्तम् ॥ ५१ ॥

निवेदनीया किमु मद्विपत्तिर्मयैव विश्वेश, विलोकयेथाः ।
तनुर्मदीयैव तनीयसी मे विनैव वाचं विपदं ब्रवीति ॥ ५२ ॥

अनश्वराणामसुरेश्वराणां वीर्यैकधाम्नां नरपालनाम्नाम् ।
भारो गरीयान् भगवन्निमां मामेतादृशीमन्वहमातनोति ॥ ५३ ॥

उद्दामलद्धाजिखुराभिधानकुद्दालनिर्दोलितभूतलोत्थैः ।
मुद्रादरिद्रैः प्रतनारजोभिर्निद्रायते नीरजबन्धुबिम्बम् ॥ ५४ ॥

तेषामदान्तैर्भगवन्, मदान्धैः कुम्भिव्रजैः सम्प्रति कम्पितानाम् ।
अद्रीश्वराणामचलाभिधानं शङ्के निरर्थं शतपत्रयोने ॥ ५५ ॥

संरम्भभाजां युधि कुम्भिकुम्भकुट्टाकदोस्तम्भजुषाममीषाम् ।
सैन्याम्बुधौ संचलिते भवन्ति सर्वे समुद्राः सहसा समुद्राः ५६

रोषाकुलानां क्षणमीक्षणानि तेषां यदा बिभ्रति शोणिमानम् ।
तदैव तद्वैरिनितम्बिनीनां वक्त्राम्बुजं श्यामलिमानमेति ॥ ५७ ॥

भवत्यमीषां पटहप्रणादः सुखाय दुःखाय च नाकभाजाम् ।
ससंभ्रमत्राससरोरुहाक्षीस्वयंग्रहात्सङ्गरसाध्वसाच्च ॥ ५८ .

आकस्मिकं तत्समरं विशङ्क्य दैत्यद्विषां दौस्थ्यजुषां सदैव ।
कर्णौ रणद्दुन्दुभिजागरूकः पाणिः कृपाणग्रहणात्तदीक्षः ॥५९॥

---

(५२) मे विपदमित्यन्वयः । (५८) पदार्थहेतुकं काव्यलिङ्गम् ॥

मदीयपीडा कियती फणीन्द्रे संचिन्त्यमाने घनभारभुग्ने ।
कूर्माधिपे भग्नकपालपृष्ठे संस्मर्यमाणे सुखमेव तस्य ॥ ६० ॥

कृपाम्बुधे, किं बहुनात्र तेषां घोरेण भारेण निपीड्यमाना ।
लोकानवन्तं भगवन्, भवन्तमहं विपन्ना शरणं प्रपन्ना ॥ ६१ ॥

एतादृशी मे तनुवल्लरीयं सा तादृशी दुर्जनभारपीडा ।
जानासि सर्वं जगदेकसाक्षिन्, निवेदनीयं किमतः परं ते ॥६२॥

त्वामेव दीना शरणं प्रपद्ये का मे गतिस्त्वच्चरणं विहाय ।
क एव रक्षां कलयेत लोके चन्द्रं विना नाथ, चकोरिकायाः ६३

विज्ञापयित्रीमिति तां धरित्रीं बाष्पं वमन्तीं पदयोर्नमन्तीम् ।
विचिन्तयन्नाह विपत्तिमस्याः शमं निनीषुः शतपत्रजन्मा ॥६४॥

एतस्य जातस्य विपज्ज्वरस्य भैषज्यवेदी पुरुषोत्तमस्ते ।
कालातिपातः क इवात्र सर्वे तस्माद्वयं तत्सविधं व्रजामः ॥६५॥

इत्थं जगद्योनिरसौ निगद्य साकं धरण्या जगतां शरण्यः ।
वलारिकालारिसखः क्षणेन क्षीरोदधेस्तीरभुवं प्रपेदे ॥ ६६ ॥

संस्तुत्य तिष्ठन् सरसीरुहाक्षं समाधिशाली सविधे पयोधेः ।
आपद्ग्रहाणामभिचारमन्त्रमाकाशवाणीमशृणोद्विधाता ॥६७॥

कुन्दप्रसूनद्युतिभिर्विरिञ्चो मन्दस्मितैः शीतलिताखिलाशः ।
इन्द्रप्रधानान् विबुधान् बभाषे संदृष्टभूभारशमाभ्युपायः ॥६८॥

मनुष्यतामेत्य जगन्निवासो जनिष्यते सद्मनि यादवानाम् ।
वंशे तदीये भवताशु तस्मादंशेन यूयं च यदुप्रवीराः ॥ ६९ ॥

प्रादुर्भविष्यत्यचिरादनन्तः प्रागेव तत्सोदरतामुपेतः ।
उर्वीतले जन्म तदर्चनाय कुर्वीत संघोऽपि सुराङ्गनानाम् ॥७०॥

नित्यस्वरूपा नियतं महिम्ना सम्मोहयन्ती सकलं प्रपञ्चम् ।
जनिष्यते सा जगदीशमाया भूभारशान्त्यै भुवनैकमाता॥ ७१ ॥

आदिश्य देवानमरेन्द्रमुख्यानानन्दपूर्णानरविन्दजन्मा ।
आश्वास्य दीनामवनीमथैनामात्मीयमावासमभिप्रपेदे ॥ ७२ ॥

पुरेऽथ रम्ये पुरुहूतलक्ष्मीर्महीमहेन्द्रो मधुराभिधाने ।
अरंस्त वीरो निजनामधेयमन्वर्थयन् वैरिषु शूरसेनः ॥ ७३ ॥

प्रोद्दण्डदोर्दण्डभवानि यस्य पराक्रमप्रक्रमपाटवानि ।
शार्दूलनागेन्द्रमृगेन्द्रघोषैरुद्घोषयामास पुरी रिपूणाम् ॥ ७४ ॥

तदन्वये भूपतिरुग्रसेनः शशास पृथ्वीं शतमन्युतेजाः ।
आलम्ब्यते यस्य नभस्तलेन लोलम्बता कीर्तिसितारविन्दे ॥७५॥

पुत्रीं तदीयां भुवि देवकीति ख्यातां कदाचित् परिणीय धन्याम् ।
वसुन्धरेन्द्रो वसुदेवनामा रथेन निन्ये रमणीयरूपाम् ॥ ७६ ॥

तयोर्मुदा सारथिरास कंसः स्वकीयकोपानलकल्पवातम् ।
आह्वानमन्त्रं विपदो यदूनामाकर्णयद्व्योम्नि गिरं कठोराम ॥ ७७ ॥

भावी तवास्याः स्वसुरष्टमो यः सुतस्तदीयो भुजदन्दशूकः ।

---

(७४) शत्रुनगरीणां काननीकरणं भङ्ग्यन्तरेणाभिधीयते ॥

(७८) दन्दशूकः = सर्पः ॥

पराक्रमोद्यद्गरळाग्नितीव्रः प्राणानिलं ते नृप पास्यतीति ॥ ७८ ॥

धृत्वा कृपाणीं च रुषं कृपां च त्रपां च मुक्त्वा तरसैव कंसः ।
अग्रेसरो निष्ठुरमानसानां जग्राह केशे यदुवीरपुत्रीम् ॥ ७९ ॥

समीपभाजा सहसा तदानीं महाजनानां मनसा च साकम् ।
कृपाणरेखेव करे तदीये नृपात्मजा सा नितरां चकम्पे ॥ ८० ॥

निहन्तुकामं निजसोदरीं तां पापावतंसं रभसेन कंसम् ।
आलोकयन्नानकदुन्दुभिस्तमानन्दयित्रीं गिरमाबभाषे ॥ ८१ ॥

उपक्रमः कोऽयमहो, तवापि मतिः कथं मूर्खपथं प्रयाति ।
विमर्शमार्गे वितनुष्व बुद्धिं द्वारं विपत्तेरविचार एव ॥ ८२ ॥

इमां स्त्रियं ते भगिनीमिदानीमवाप्तपाणिग्रहणामधीराम् ।
कथं निहन्तुं क्रमसे विशङ्कः कराललोलत्करवाळपाणिः ॥ ८३ ॥

भवादृशां भाग्यनिधे, कथं वा मनीषिणां धीरशिखामणीनाम् ।
विवेकशैलेन्द्रमहो महान्तं प्रकोपवातः प्रसभं धुनीते ॥ ८४ ॥

वधूवधः कंस, विधीयते चेत्त्वया यशश्चन्द्रमसं त्वदीयम् ।
अकीर्तिरूपः कवळीकरिष्यत्यसंशयं सम्प्रति सैंहिकेयः ॥ ८५ ॥

अनागसे द्रुह्यति यो जनाय निन्दन्ति तं भोजपते, महान्तः ।
विनिन्दितः सद्भिरुपैति घोरं तमस्ततः स्याज्जनुषः फलं किम् ॥ ८६ ॥

अत्यन्तदीनामपराधहीनां निधे गुणानां विनिहन्तुमेनाम्
उपक्रमं मा कुरु रक्षणीये जने कथं ते मतिरन्यरूपा ? ॥ ८७ ॥

इत्यादिसाम्नाप्यनपेतकोपं क्रूरं नृपं शूरसुतो बभाषे ।
सुतानमुष्यास्तव जातमात्रान् समर्पयिष्यामि विकल्पहीनम् ८८
तथेति कंसे विहितप्रशंसे गते च साकं निजसाध्वसेन ।
आकृष्य तां मृत्युमुखात्कथंचित् प्राणेश्वरीं प्रापदसौ च गेहम् ८९
अथाष्टमादेव भयेन पुत्राद्बालं प्रसूतं वसुदेवनीतम् ।
मुमोच पुत्रं मुदितो भगिन्याः सुकीर्तिमन्तं सहसैव कंसः ॥९०॥
निजान् स बन्धूनसुरांशभूतान्यदूंश्च गोपानमरांशभूतान् ।
स्वसुः सुतं भाविनमच्युतं च वीणाप्रवीणादशृणोन्मुनीन्द्रात् ९१
विचिन्त्य कंसो विपदं स्वकीयां प्रसूतमात्रं प्रसभं भगिन्याः ।
कुमारषट्कं कुपितो गृहीत्वा पादेष्वसौ पञ्चतया युयोज॥ ९२ ॥
शूरात्मजं तद्रमणीं स्वकीयकारानिकेते पितरं च बध्वा ।
ऊरीचकार स्वयमेव राज्यं पारीणश्रीः पापपथे स कंसः ॥९३॥
विधाय बाधां बहुधा स कंसः क्रुधा पुरादैत्यजनैः समेतः ।
प्रधावयामास यदूनरण्याद्यथा मृगान् काननजातवेदाः ॥ ९४ ॥

देवक्याः स्थितमुदरे विकृष्य गर्भं
रोहिण्या जठरगतं विधाय माया ।
नन्दस्य प्रियमहिषीं स्वजन्मभूमिं
मेने सा युवतिगुणौघहर्म्यभूमिः ॥ ९५ ॥

---

(९२) पञ्चतया युयोज = अवधीत् ॥

दैत्याधिराजतिमिरप्रकरान् निहन्तुं
दीप्त्याश्चितो दिव इवाथ मयूखमाली ।
गर्भे मुदा निविविशे वसुदेवपत्न्या
भाग्योदयेन जगतां भगवान् मुकुन्दः ॥ ९६ ॥

इति शङ्करकविकृतौ श्रीकृष्णविजये
प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथ गर्भे गते देवे वसुदेवकुडुंबिनी ।
लोध्रकुड्मळसध्रीचीं रुचमूरीचकार सा ॥ १ ॥
प्रसन्नतां वहन्ती सा परिपाण्डुपयोधरा ।
पूर्णचन्द्रमुखी रेजे शरदीव नभःस्थली ॥ २ ॥

---

(९६) निविविशे । "नेर्विश" इत्यात्मनेपदम् । (१) "मुखेन लक्ष्यत लोध्रपाण्डुना" इति दोहदवर्णने कालिदासः ॥

गर्भस्थेन मुकुन्देन मुखे कलितपाण्डिमा ।
प्राचीव चन्द्रबिम्बेन चकाशे चारुलोचना ॥ ३ ॥

शनकैस्तनुतां त्यक्त्वा तन्मध्यं गुरुतां दधौ ।
दुःखं तु गुरुतां मुक्त्वा नाकिनां तनुतामपि ॥ ४ ॥

दीना गमनमान्द्यस्य पौनरुक्त्यं प्रपेदुषी ।
शनैः शनैर्निशश्वास शतपत्रविलोचना ॥ ५ ॥

उद्वृत्तेन कठोरेण विना हारेण तिष्ठता ।
कंसेन तत्कुचेनापि मुखे मलिनिमा दधे ॥ ६ ॥

निर्यान्तीव हरेः कान्तिः कापि तापिञ्छसोदरी ।
घनयोस्तनयोस्तस्याश्चूचुकं मेचकं व्यधात् ॥ ७ ॥

अधःकृतस्य मध्यस्य दरिद्रस्याशु वर्द्धने ।
शुचेव कुचयोरस्याः कृष्णिमानं दधौ मुखम् ॥ ८ ॥

परस्मिन् पुंसि गर्भस्थे परमानन्दनिर्वृता ।
पाने च भोजने याने पराची पद्मलोचना ॥ ९ ॥

अन्तस्तया धृते तस्मिन् दीप्ते विश्वैकभूषणे ।
अपयातेव रोषेण भूषणाळी बहिष्कृता ॥ १० ॥

भीतिः कंसस्य गर्भोऽसौ तस्याश्चानकदुन्दुभेः ।

---

(६) श्लेषोऽत्रालङ्कारः ॥

हर्षोद्रेकश्च शोकश्च समं ववृधिरे मुहुः ॥ ११ ॥
अन्तर्वत्नीमिमां पश्यन्नेकदा शोकदायिनाम् ।
संतापशाली कंसोऽभूच्चिन्तायन्त्रितमानसः ॥ १२ ॥
मत्प्राणपारणाकाङ्क्षी मधुवैरिमहोरगः ।
अस्या गर्भगुहामध्यमध्यास्ते किं नु साम्प्रतम् ॥ १३ ॥
अन्यादृशी समुत्पन्ना मन्येऽसौ मत्सहोदरी ।
यदियं महसेदानीं मुष्णाति मम लोचनम् ॥ १४ ॥
क्रियेत नामशेषा चेत् कृपाण्या भगिनी मया ।
अकीर्तिकामिनी नूनं हा मे सहचरी भवेत् ॥ १५ ॥
हन्त! जातः सुतोऽमुष्या भस्मसान्मां करिष्यति ।
कादम्बिन्या यथोद्भूतस्तरुं वज्रहुताशनः ॥ १६ ॥
अजिघांसा जिघांसा च तस्येत्थं भोजभूभुजः ।
मनस्तरङ्गयाश्चक्रे डोळाकेळिविडम्बिनी ॥ १७ ॥
किञ्च बुद्बुदसाधर्म्यं जातमात्रं नयाम्यमुम् ।
तनूजमिति तज्जन्म प्रतीक्षामास पामरः ॥ १८ ॥
दैत्यराशिपयोराशिविनाशकलशीसुतः ।
अस्तोकहर्षैरस्तावि गर्भस्थोऽथ हरिः सुरैः ॥ १९ ॥

---

(११) सहोक्तिरलङ्कारः । (१६) कादम्बिनी मेघमाला ॥

नमस्तस्मै परस्मै ते समस्तजगदीश्वर ।
येनावतंसिताः शश्वदनिर्दंप्रथमा गिरः ॥ २० ॥

अहन्ताग्रन्थिनीहारस्तोमहेमन्तसंपदः ।
भवन्तमगदंकारं जाड्यव्याधेरुपास्महे ॥ २१ ॥

कन्दतां च वृतित्वं च ततश्चण्डसमीरताम् ।
प्रपञ्चपादपस्य त्वं दधासि मधुसूदन ॥ २२ ॥

तमःकवाटसंरुद्धे तावकीनो मनीषिणाम् ।
अपवर्गपुरद्वारे कटाक्षः कुञ्चिकायते ॥ २३ ॥

ममत्वमूलकन्दोऽसौ संसारविषशाखिनः
उत्खन्यते भवद्ध्यानखनित्रेण मनीषिभिः ॥ २४ ॥

अविद्याग्रन्थिरेकं त्वामनेकं भ्रामयत्यसौ ।
तरङ्गिता नदीवेणी तरणेरिव मण्डलम् ॥ २५ ॥

मुनीन्द्रकळहंसाळी निगमाम्भोजकानने ।
त्वत्स्वरूपमधुस्यन्दं समास्वाद्य सुखायते ॥ २६ ॥

अर्वाञ्च एव वाञ्छन्ति चाञ्चल्याद्भोगसञ्चयम् ।
सन्तस्तु त्वत्पदध्यानसुखास्वादैकलम्पटाः ॥ २७ ॥

सविलासे महामायानटीनाटकपाटवे ।
साक्षीभूय सरोजाक्ष, सानन्दो भासते भवान् ॥ २८ ॥

---

(२०) अनिर्दंप्रथमा गिरो वेदाः ॥

दूरं पलायते पुंसामविद्याख्या पिशाचिका ।
उच्चाटनमहाप्रज्ञैस्त्वत्पदाम्बुजपांसुभिः ॥ २९ ॥
समाश्वसिति दैतेयपादाघातनिपीडिता ।
मृदुलं त्वत्पदन्यासं स्मरन्तीयं वसुन्धरा ॥ ३० ॥
पास्यतां नेत्रचुलुकैर्भवद्रूपसुधारसम् ।
भाग्यकल्पतरोर्नॄणां फलमासीत् पचेळिमम् ॥ ३१ ॥
ऋजूकरोतु संभ्रमं हन्त कण्ठं वसुन्धरा ।
फणाश्च स्ववशे कुर्यात् काकोदरशिखामणि. ॥ ३२ ॥
सन्तापग्रीष्मसंशुष्कामस्मत्प्रीतितराङ्गिणीम् ।
कूलङ्कषां प्रभो, कुर्यात्त्वत्कटाक्षपयोधरः ॥ ३३ ॥
पद्मापतिमिति स्तुत्वा पद्मासनपुरस्सराः ।
करकोरकचूडालाः प्रणम्य त्रिदिवं ययुः ॥ ३४ ॥
कदाचन नभोलक्ष्मीमणिताटङ्कमण्डने ।
अस्तङ्गते महस्तोमकन्दे मन्देहजेतरि ॥ ३५ ॥
कुलाये कुटिलाक्षीणां कोणे च कुचकुड्मळे ।
निलीनेषु विशङ्केषु विहङ्गेषु च कामिषु ॥ ३६ ॥
स्मारं स्मारं पतीन् दर्शं दर्शं पौरन्दरीं दिशम् ।
तटिनीनां लुठन्तीषु चक्रवाकीषु सैकते ॥ ३७ ॥

---

(३५) मन्देहजेतरि = मार्तण्डे ॥

तापिञ्छगुच्छसच्छायतमःकम्बळसंवृते ।
क्रमादथ निशीथे च गाढयौवनतां गते ॥ ३८ ॥
नाकिनां भाग्यतोयेन देवकीकल्पवल्लरी ।
आसन्नप्रसवा जज्ञे दातुं नेत्रफलं नृणाम् ॥ ३९ ॥
उल्लसत्तारमुत्फुल्लपद्ममुद्दामसंमदम् ।
नभस्तलं सरित्तोयं मनश्च महतामभूत् ॥ ४० ॥
तत्यजुर्नीलजीमूतनिचोळं हरिदङ्गनाः ।
कौतुकिन्य इव द्रष्टुं मुकुन्दमुखपङ्कजम् ॥ ४१ ॥
जगर्ज जलधेस्तीरे मन्दं जीमूतवल्लरी ।
आसन्नमिव शंसन्ती मौकुन्दं संभवं सुरान् ॥ ४२ ॥
स्पन्दमाना दिगन्तेषु मन्दमारुतकन्दळी ।
आश्वासवत्या मेदिन्या दीर्घश्वास इवावभौ ॥ ४३ ॥
देवकीनिलये निद्रां संप्रापुः कंसकिंकराः ।
भाविन्या दीर्घनिद्राया योग्यां प्रस्तावनामिव ॥ ४४ ॥
मनोभिर्नाकिनां त्यक्तो निराश्रय इव द्रुतम् ।
कम्पो दैत्यपुरन्ध्रीणामीक्षणं दक्षिणं ययौ ॥ ४५ ॥
वसुदेवस्य निगळैर्जगळे सममश्रुणा ।

---

(४०) यथासंख्यमलङ्कारः । (४१) निचोळः = प्रच्छदपटः ॥
(४५) पर्यायोऽलङ्कारः (४६) निगळः = शृङ्खला ॥

मुकुन्दभक्तिपाशेन हृदयं तु नियन्त्रितम् ॥ ४६ ॥
मिळितैः किन्नरस्त्रीणां ललितैर्गीतनिस्वनैः ।
निलिम्पदुन्दुभिध्वानैरकम्पत दिगन्तरम् ॥ ४७ ॥
पतन्ती नाकिनां हस्तान्मन्दारकुसुमावली ।
प्रहर्षेण नभोलक्ष्म्या हासप्रौढिरिवाबभौ ॥ ४८ ॥
कोऽपि गोपीकुचाम्भोजे यास्यन् भूषणचातुरीम् ।
दीप्तोऽथ देवकीशुक्तेर्मुक्तामणिरजायत ॥ ४९ ॥
ततः पुञ्जितलोलम्बनिकुरुम्बावृता इव ।
अकालकाळजीमूतपाळीकम्बळिता इव ॥ ५० ॥
कळिन्दनन्दिनीवीचीकेळीकबळिता इव ।
सञ्चूर्णिताञ्जनोदञ्चद्धूळीनिचुळिता इव ॥ ५१ ॥
नीलेन्दीवरसन्दोहनीरन्ध्रस्थगिता इव ।
समुच्छ्वसितकाळागुरुकूर्चच्छादिता इव ॥ ५२ ॥
निमग्ना नीलिमाद्वैते दर्शयन्तं दिशो दश ।
पाकशासनरत्नश्रीपश्यतोहरया रुचा ॥ ५३ ॥
दुग्धाब्धेरिव पर्यायैर्गङ्गाया इव सोदरैः ।
इन्दुत्विषामिवाचार्यैर्भान्तं पादनखांशुभिः ॥ ५४ ॥

---

(५०) ततः पुञ्जितेत्यादेरग्रे "ईक्षामास पुरः साक्षा"दित्यनेनान्वयः ॥

संवाहने रमापाणिशोणिम्नेवानुरञ्जिताम् ।
मणिमञ्जीरमहसा वहन्तं जङ्घयोर्द्वयम् ॥ ५५ ॥

तप्तजाम्बूनदच्छायप्रतिच्छन्देन वाससा ।
हारिद्रमिव कुर्वाणमुपान्तहरिदन्तरम् ॥ ५६ ॥

हारवल्लीमृणालीभिर्मध्ये किञ्चित्तिरोहिताम् ।
कौस्तुभारुणपद्मस्य स्फुरितामिव नालिकाम् ॥५७॥

वपुर्मरीचिकालिन्दीप्रवाहलहरीमिव ।
धारां कान्तिजलस्येव वहन्तं रोमवल्लरीम् ॥ ५८ ॥

कलिन्दपुत्रीकल्लोलकक्ष्यारोहविचक्षणैः ।
दैत्यस्त्रीरोदनैः पुण्यप्रक्रियाभ्यासदेशिकैः ॥ ५९ ॥

लक्ष्मीवक्षोजमकरीशिल्पवैज्ञानिकोत्तमैः ।
महद्भिरर्गलादीर्घैश्चतुर्भिर्मण्डितं भुजैः ॥ ६० ॥

स्फुरत्कराम्बुजन्मानमरिकम्बुगदाम्बुजैः ।
कौस्तुभच्छविसन्तानबन्धूकितदिगन्तरम् ॥ ६१ ॥

ओष्ठयोरर्चिषा सन्ध्यावैदग्धीपरिपन्थिना ।
वितानमिव कौसुम्भं वितन्वानं नभस्तले ॥ ६२ ॥

संदर्शयन्तं संफुल्लमन्दहासांशुकन्दलैः ।
निलिम्पतटिनीवीचीसंप्रदायमिवाम्बरे ॥ ६३ ॥

अनिद्रालुसरोजन्मप्रतिद्वन्द्विविलोचनम् ।

अळकश्रीनटीनाट्यशालायितललाटकम् ॥ ६४ ॥

सदा वैरायमाणेन काळाम्बुदकदम्बकैः ।
नीलिम्ना कुन्तळालीनां लोलम्बितहारिन्मुखम् ॥ ६५ ॥

असंचरिष्णुं वाङ्मार्गे मनोमार्गे च देहिनाम् ।
ईदृग्भावदरिद्राणमहिमानं पुरातनम् ॥ ६६ ॥

मुकुन्दं मुदितो मुक्तिनारीमूलनिकेतनम् ।
ईक्षामास पुरः साक्षात्सूनुमानकदुन्दुभिः ॥ ६७ ॥

परं पुमांसमालोक्य परमानन्दतुन्दिलः ।
मनसा स द्विजातिभ्यो धेनूनामयुतं ददौ ॥ ६८ ॥

अनर्गळगळद्बाष्पवीचीकुलचितेक्षणः ।
उदञ्चत्प्रौढरोमाञ्चनिकुरुम्बनिचोळितः ॥ ६९ ॥

युग्मं कुग्मळयन्मूर्ध्नि हस्तयोर्भक्त्या धिया ।
अ[illegible]द्गदां वाचमूचे तं देवकीपतिः ॥ ७० ॥

विमुक्तिमार्गपान्थेन स्वान्तेनापि मनीषिणाम् ।
अनिर्धार्यमहस्सीमन्नयमञ्जलिरस्तु ते ॥ ७१ ॥

पराचिद्रूपसामग्रीपारं गन्तुं तव प्रभो ।
पर्याप्तपटिमानः किं पौरुषेयेतरा गिरः ॥ ७२ ॥

तादृशोऽपि भवानस्मद्दृशोरमृतपारणाम् ।
करुणाप[illegible]श्येण कुरुषे पुरुषोत्तम ॥ ७३ ॥

भाग्याद्भवन्तं मेदिन्या भारव्याधिं चिकित्सितुम् ।
मन्ये मन्मन्दिरे स्वामिन्नाविर्भूतं महौषधम् ॥ ७४ ॥

नृशंसानां वतंसेन कंसेन मम सूनवः ।
श्रुत्वा भावि भवज्जन्म श्रोत्रमार्गेचराः कृताः ॥७५॥

अधुना ज्ञातजन्मा ते स वेगादागमिष्यति ।
करात्तताण्डवोद्दण्डकरवाळमहोरगः ॥ ७६ ॥

अथ प्रीत्या जनन्यासौ जगदे जगदीश्वरः ।
नाथ भक्तार्तिपाथोधिकर्णधार, नमोऽस्तु ते ॥ ७७ ॥

मनोमन्दरशैलेन मथित्वा निगमाम्बुधिम् ।
त्वत्स्वरूपसुधाधारा विबुधैरुपभुज्यते ॥ ७८ ॥

चकितं मानसं कंसाच्छम्पावन्मम कम्पते ।
तत्कर्णमार्गसंचारी मास्त्वसौ तव संभवः ॥ ७९ ॥

मूर्तिस्तापिञ्छसाहाय्यचुञ्चुः शंखादिलाञ्छिता ।
मार्गं दृशोरलंकर्तुमयोग्यासौ लघीयसाम् ॥ ८० ॥

इति तद्वाचमाकर्ण्य पूर्वजन्मद्वयं तयोः ।
पुत्रत्वं चात्मनस्तत्र कथयामास माधवः ॥ ८१ ॥

पीयमानाङ्गपीयूषः पित्रोर्निस्तन्द्रया दृशा ।

---

(८०) साहाय्यचुञ्चुः = साहाय्येन वित्तः ॥

सामान्यार्भकसाधर्म्यभङ्गीमङ्गीचकार सः ॥ ८२ ॥
प्रीतेन तद्गिरा तेन तातेन जगतां पतिः ।
नेतुकामेन हस्ताभ्यां सूतिकायाः समाददे ॥ ८३ ॥
यस्तीव्रतपसां पुंसां मनसामप्यगोचरः ।
तत्ताद्दङ्माहिमानं स पुमांसं करयोर्दधौ ॥ ८४ ॥
स्वयं विजघटे गाढैः कवाटैः सुदृढार्गळैः ।
पौराणां लोचनपुटी निद्रया घटिताजनि ॥ ८५ ॥
क्षणात् फणाळ्या रुन्धानो हर्षाद्वर्षाम्बुशीकरान् ।
धावन्तं वसुदेवं तमन्वगात् पन्नगाधिपः ॥ ८६ ॥
तुङ्गैस्तरङ्गसंघातैस्तीरोल्लङ्घनजाङ्घिकी ।
यमुना गमने तस्य गुल्फद्वयसतां ययौ ॥ ८७ ॥
निद्रानिर्द्वैतनिर्मग्नगोपाले नन्दमन्दिरे ।
पुत्रीं प्रसूय निद्राणामद्राक्षीत्तत्स्त्रियामसौ ॥ ८८ ॥
तनूजं तत्र विन्यस्य तन्मुखेन्दौ च मानसम् ।
वियोगवेदनां चासौ कन्यकां च समाददे ॥ ८९ ॥
तां च तल्पेशयां कृत्वा कुटुम्बिन्याः कुमारिकाम् ।
यथापुरं शृङ्खलितः स्वस्थचेताः स तस्थिवान् ॥ ९० ॥

---

(८७) जाङ्घिकी=वेगवती, गुल्फद्वयसं=गुल्फप्रमाणकम् । द्वयसच् प्रत्ययः ॥

तस्या ध्वानिर्मन्त्र इव क्षणात् पौरौघबाधिनीम् ।
दूरं विद्रावयामास निद्रामुद्रापिशाचिकाम् ॥ ९१ ॥

स्वसुः प्रसूतिः पौरास्यात् कर्णौ कंसस्य जग्मुषी ।
संतप्तघोरनाराचरीतिमूरीचकार सा ॥ ९२ ॥

ततो जिजीविषापाशपारतन्त्र्येण भोजराट् ।
विवेकमार्गसंचारपङ्गुः सूतिगृहं ययौ ॥ ९३ ॥

जातरंहसमायान्तं भ्रातरं वीक्ष्य देवकी ।
व्याधरुद्धेव हरिणी कातरत्वं तदा दधौ ॥ ९४ ॥

मत्प्रीतिर्विरुधो रूढे कन्यारूपेऽत्र कन्दळे ।
भवान् कृपाम्बुधे, मा भूद्दावानलधुरंधरः ॥ ९५ ॥

इत्युक्त्वा रुदतीं दीनां तर्जयित्वा सहोदरीम् ।
चकार स करे कन्यामकारुणिकशेखरः ॥ ९६ ॥

आजघान च पाषाणपृष्ठे रोषेण कन्यकाम् ।
सद्यो विद्युल्लतेवासौ व्योमसीमानमानशे ॥ ९७ ॥

सा चक्रकम्बुचापादिकरम्बितकराम्बुजा ।
परीता स्तोत्रलहरीमुखरैरमरोत्तमैः ॥ ९८ ॥

तन्वती तरुणादित्यमित्रेणाभरणार्चिषा ।

---

(९७) आनशे = प्राप ।

कौसुम्भस्तबकाभोगसुभगंभावुकं नभः ॥ ९९ ॥
माया महेन्द्ररत्नांशुच्छायालतनुवल्लरी ।
भ्राजयन्ती दिगन्तानि भोजभूपमभाषत ॥ १०० ॥
मया किमपराद्धं ते मूर्खलोकशिखामणे ।
अधुना धरणेरासीदवतंसस्तवान्तक. ॥ १०१ ॥
इत्युक्त्वा गतवत्यां स भगवत्यामदृश्यताम् ।
पादौ निर्निगळौ चक्रे भगिनीवसुदेवयोः ॥ १०२ ॥
क्ष्मातले जातमिन्द्रार्तिहारिणं निजवैरिणम ।
दनुजान्मनुजाधीशः सचिवानूचिवानसौ ॥ १०३ ॥
रुषं दृशा तद्गिरं ते निशम्यालमुद्गिरन्तो रुषां दृशौ ।
ऊचुर्नीचधियो वाचमहंकृतिनिरङ्कुशाम् ॥ १०४ ॥
किं त्वया चिन्त्यते नाथ,पाणिना पल्लवानिव ।
शिशूनशेषानवनौ निर्दया मर्दयामहे ॥ १०५ ॥
शक्त्यामी किंकृताराातिबाधया साधयामहे ।
भूवल्लभ, त्वद्भ्रूवल्लीविलासैकवशंवदाः ॥ १०६ ॥
व्यवसायद्रुमं कर्तुमस्माकमवकेशिनम् ।
दुर्गवो नाकियूथस्य कथंकारं प्रगल्भते ॥ १०७ ॥

---

(९९) सुभगंभावुकं = मनोज्ञीभवत् । (१००) छायालं = छायान्वितम्
(१०६) किंकृतं = तुच्छीकृतम् । (१०७) अवकेशी = विफलः ॥

तथापि वामी नोपेक्ष्यास्त्रिदशा मदशालिनः ।
उन्मूलनीयाः कूलस्था नदीपूरैरिव द्रुमाः ॥ १०८ ॥

यदा भवन्त्यङ्कुरिता विषवृक्षा इव द्विषः ।
तदैवोन्मूलिता नो चेत् क्रमेणामी दुरासदाः ॥१०९॥

तन्मूलं पुण्डरीकाक्षो धर्मस्तन्मूलतां गतः ।
तन्निर्मूलनतोऽस्माकं काङ्क्षावल्ली फलिष्यति ॥११०॥

इत्युक्त्वा ते सुदुस्तम्भदोस्तम्भास्तन्नियोगतः ।
चक्रुर्दुस्थितभूदेवमण्डलीं क्षितिमण्डलीम् ॥ १११ ॥

नन्दगोपाश्चिरेणाथ दुस्तरं पुत्रसेतुना ।
निस्तीर्य दुःखपाथोधिं पपातानन्दवारिधौ ॥ ११२ ॥

क्षाळयित्वेव नैष्फल्यपङ्कं बाष्पझरीजलैः ।
चक्षुर्नन्दस्य चिक्रीड पुत्ररूपामृताम्बुधौ ॥ ११३ ॥

व्यलोकयन्नमुं बालमलौकिकरुचं व्रजे ।
निमेषमुद्राजात्यन्धलोचना मीनलोचनाः ॥ ११४ ॥

नन्दगोपगिरा तावन्महीयोभिर्महीसुरैः ।
समाप्तजातकर्मासीत् सरसीरुहलोचनः ॥ ११५ ॥

पूर्णानन्देन नन्देन पूजितानां मुहुर्धनैः ।
दरिद्रता दरिद्राणां द्विजातीनामजायत ॥ ११६ ॥

पूर्वमेव प्रसूतस्य स्वकीयतनयोपमम् ।

संस्कारं कारयामास रौहिणेयस्य स द्विजैः ॥ ११७ ॥

कंसाय स करं दातुं कदाचिन्मधुरां गतः ।
वसुदेवेन जगदे वल्लवान्वयवल्लभः ॥ ११८ ॥

भ्रातस्तपःपरीपाककल्पशाखी तवोर्जितः ।
पुण्याम्भःपाटवेनाहो पुत्ररूपमदात फलम् ॥ ११९ ॥

आस्माकीनः परं बालो भवदीये निकेतने ।
समन्वितो जनन्या किं कुशली वर्तते सुतः ॥१२०॥

गन्तव्यं भवता शङ्के गोकुलायाशु साम्प्रतम् ।
तस्मिन् प्रायो विजृम्भेत कश्चिदुत्पातचण्डिमा ॥१२१॥

इति तद्वचनान्नन्दो निश्चक्राम पुरोदरात् ।
विवेश पूतना नाम यातुधानी च गोकुलम् ॥ १२२ ॥

विषेण दूषितं यस्या बालेभ्यः स्तनचूचुकम् ।
पन्थानं दर्शयामास गन्तुमन्तकमान्दिरम् ॥ १२३ ॥

तरुणिम्ना तनोर्मायापण्डिता गोपमण्डलीम् ।
विवशां मृगशाबाक्षी वितेने विस्मयेन सा ॥ १२४ ॥

तत्र कंचन तापिञ्छतुल्यं पल्यङ्कशायिनम् ।
ददर्श देवकीपुण्यपरिणामं निशाचरी ॥ १२५ ॥

तां वीक्ष्य राक्षसीं बालप्राणाकर्षणदेवताम् ।
मुकुन्दो मुकुळीचक्रे मुग्धं लोचनपङ्कजम् ॥ १२६ ॥

निदधे सा शनैरेनमङ्के पङ्केरुहेक्षणम् ।
तस्यास्तदैव पाशं च कृतान्तः कन्धरोदरे ॥ १२७ ॥

अर्पयामास तस्यासौ मुकुन्दस्य मुखोदरे ।
समस्तबालकप्राणमोचकं स्तनचूचुकम् ॥ १२८ ॥

प्रथमं स्तन्यधारा किमाहोस्वित् प्राणमारुतः ।
न्यपायित तदा तेन सन्दिहे नन्दसूनुना ॥ १२९ ॥

प्रचलत्कुचगण्डशैललीला
चलितोर्वीरुहचण्डबाहुदण्डा ।
न्यपतद्भुवि सा युगान्तमूर्छत्-
पवनोन्मूलितपर्वतोपमाना ॥ १३० ॥

वज्रप्रणादपरुषं गिरिषण्डरन्ध्र-
निर्भेदभीतिजनकं जनकर्णरूक्षम् ।
संक्षोभदानचतुरं चतुरम्बुधीनां
तस्या निपातजनितं ध्वनितं जजृम्भे ॥ १३१ ॥

सपदि वपुषि जातस्पन्दनं नन्दनं तं
भयपरवशचञ्चच्चेतना पूतनायाः ।
विगतधृति गृहीत्वा तत्क्षणं रक्षणं सा
व्यतनुत गुरुखेदं विन्दती नन्दपत्नी ॥ १३२ ॥

---

(१३१) जजृम्भे = ववृधे

अथ पथि वसुदेवस्यैव वाचं विचिन्त्य
द्रुतगतिरतिघोरं घोषमाकर्ण्य घोषे ।
सपदि विपदि मग्नानेव निश्चित्य गोपा-
नविशदवशचेता मन्दिरं नन्दगोपः ॥ १३३ ॥

शकलितमथ टङ्कैर्भीतिदं यातुधान्याः
शिखिनि महति गोपैर्दाहयित्वा स देहम् ।
मुहुरभिनवलीलं मुग्धमालिङ्ग्य बालं
पुळककबाळिताङ्गः पूर्णमोदो बभूव ॥ १३४ ॥

इति श्रीशङ्करकविकृतौ श्रीकृष्णविजये
द्वितीयः सर्गः ।

---

(१३३) घोषे = व्रजे ॥ (१३४) टङ्कः = पाषाणभेदनः ॥

तृतीयः सर्गः ।

अन्वहं तदनु नन्दमन्दिरे
पुण्यपूरपरिपाकतो नृणाम् ।
गोपलोकहृदयं तरङ्गयन्
कोऽपि लोचनमहोत्सवो बभौ ॥ १ ॥

लोलमानकमनीयलोचनो
नीलमेघनिकुरुम्बमेचकः ।
मानसानि स जहार पश्यता-
मेनसा सह पुराणपूरुषः ॥ २ ॥

एकदा परमसंमदाकुला
तस्य जन्मदिवसे समं द्विजैः ।
मन्त्रपूतपयसाभिषेचनं
नन्दगोपगृहिणी चकार सा ॥ ३ ॥

संनिधाय शयने च सा सुतं
संनता द्विजवरानपूजयत् ।
स्तन्यलालसतया तदा शनै-
रुन्नमय्य चरणं रुरोद सः ॥ ४ ॥

ताडितं तरुणपद्मचातुरी-
　　चारुणाथ चरणेन शार्ङ्गिणः ।
तुङ्गमप्युपरि संस्थितं क्षणा-
　　द्भङ्गमाप शकटं विशङ्कटम् ॥ ५ ॥

अर्भकेण शकटं विभिन्नमि-
　　त्यद्भुतं किमु परः पुमानसौ ।
ज्योतिरिङ्गणसमेऽपि जायते
　　जातवेदसि हि दाहचातुरी ॥ ६ ॥

अद्रवत् सपदि गोष्ठवासिनां
　　चेतसः शकटपातजन्मना ।
निस्वनेन गहनान्मृगेशितु-
　　र्गर्जितेन हरिणीव धीरता ॥ ७ ॥

चत्वरात्तदनु गोपमण्डली
　　सत्वरा गतवती गृहोदरम् ।
स्मेरवक्त्रमवलोक्य बालकं
　　दारितं च शकटं विसिष्मिये ॥ ८ ॥

---

(५) विशङ्कटं = पृथु ॥ (६) ज्योतिरिङ्गणः = खद्योतः । अप्रस्तुतप्रशंसोत्तरार्द्धे ॥

दक्षिणैर्निगमकर्मसु द्विजै-
स्तत्क्षणं विहितदेहरक्षणः ।
पायितः स्तनमसौ यशोदया
शायितश्च शतपत्रलोचनः ॥ ९ ॥

गाढदेहगरिमाणमेकदा
वोढुमेनमपटीयसी सुतम् ।
विस्मयेन धरणौ निधाय तं
सद्मकृत्यनिरता बभूव सा ॥ १० ॥

कश्चनाथ घनघोषभीषणो
धूळिपाळिकबळीकृतेक्षणः ।
चक्रमारुतवपुर्महासुर-
श्चक्रपाणिमनयन्नभस्तलम् । ॥ ११ ॥

पांसुरुद्धनयना जनावली
पद्मनाभमनवेक्ष्य सा दधौ ।
अस्तभाजि तरणौ हिमोत्कर-
ध्वस्तपद्मरुचिपद्मिनीदशाम् ॥ १२ ॥

मांसळध्वनितपांसुमण्डल-
च्छद्मना तदनु पद्मलोचनम ।

---

(१२) पदार्थवृत्तिनिदर्शना ॥

खेदिनी सकरुणं नभस्तले
मेदिनीव रुदती तमन्वगात् ॥ १३ ॥

बालकं झटिति वोढुमक्षमो
व्योमसीम्नि विषसाद दानवः ।
दुष्करं सुकरबुद्धितो वहन्
कार्यभारमिव दुर्बलः पुमान् ॥ १४ ॥

कण्ठलम्बितकिशोरको महान्
कम्पिताखिलदिगन्तरो रवैः ।
कालपाशपरतन्त्रतां गतः
शैलपातमवनौ पपात सः ॥ १५ ॥

पातितस्य दनुजस्य भूतले
कातराः सपदि जातरोदनाः ।
सस्मिताननमुरोगतं शिशुं
विस्मिता जगृहिरे व्रजौकसः ॥ १६ ॥

गाढशोकगरळाम्बुधेस्ततः
प्रौढसंमदसुधाम्बुधिं गतौ ।
आलिलिङ्गतुरुपात्तसाध्वसौ
बालमाशु पितरौ त्वरान्वितौ ॥ १७ ॥

---

(१५) शैलपातं पपात = शैल इव पपात ॥

नन्दगोपमहिषी तृषान्वितं
वत्समङ्कमधिरोप्य वत्सला ।
स्मेरचारुवदनं कदाचन
प्रस्नुतं स्तनमपाययन्मुदा ॥ १८ ॥

बालकस्य पिबतः पयोधरं
लोलमन्यकुचचूचुके करम् ।
किञ्चिदुन्मिषितपल्लवोपमं
संचुचुम्ब जननी मुहुर्मुहुः ॥ १९ ॥

पीयमानपयसा मुहुर्मुदा
जायमानललितास्मितश्रिया ।
एधमानपरितृप्तिना शनै-
र्माधवेन विदधे विजृम्भणम् ॥ २० ॥

तावदस्य वदनाम्बुजोदरे
वीक्ष्य विश्वमखिलं चराचरम् ।
भीनिमीलतमुखी सखीजनैः
साकमाकुलमना बभूव सा ॥ २१ ॥

विश्रुतस्तदनु गर्गसंज्ञया
नन्दगोपसुतरोहिणीसुतौ ।
कृष्णराममुखनामभिर्नृणा-
मञ्चितैर्मुनिरलंचकार तौ ॥ २२ ॥

पाणिपल्लवपुटेन पाटलं
पादपङ्कजमुपानयन्मुखम् ।
तातमान्तिकगतं विलोकय-
न्नाततान मृदुहासमच्युतः ॥ २३ ॥

अङ्कणेऽथ विततान रिङ्खणं
किङ्किणीकळनिनादसंकुलः ।
स्पन्दमानललिताळकाननो
मन्दमन्दमरविन्दलोचनः ॥ २४ ॥

राजितेन हसितेन किङ्किणी-
कूजितेन लळितेन माधवः ।
श्यामळेन वपुषा च कोमळे-
नाचकर्ष हृदयं व्रजौकसाम् ॥ २५ ॥

लीलया परिचलन्तमङ्कणे
लालया स्नापितमञ्जुळाननम् ।
आलिलिङ्गुरमुमेत्य बालकं
नीलकुन्तळमनोहरं जनाः ॥ २६ ॥

पाणिजानुकृतचंक्रमं शनै-
रङ्कणे गुरुकरीषरूषितम ।

(२७) करीषः = शुष्कगोमयम् ॥

विश्वनाथमवलोक्य विस्मिता-
स्तं पुरन्दरमुखा ववन्दिरे ॥ २७ ॥

वल्लवीभिरवलम्बितः करे
पल्लवोपममसौ पदद्वयम् ।
संनिधाय जनकस्य संनिधौ
संचचार ललितस्मितं शनैः ॥ २८ ॥

मत्समीपमुपयाहि वत्सके-
त्युत्सुकान्निगदतो मृदुस्मितः ।
भित्तिमूलमवलम्ब्य लीलया
बालकाननुययौ जनार्दनः ॥ २९ ॥

पादपांसुपटलैः पवित्रय-
न्नन्दसूनुरथ मन्दिरोदरम् ।
किञ्चिदप्यनवलम्ब्य संचर-
न्नङ्कणेषु विजहार मन्थरः ॥ ३० ॥

एतदर्भक गृहाण तूर्णमि-
त्येवमुन्नमितमङ्गनाजनैः ।
अङ्गुलीकिसलयं हसन्नसौ
रंहसैव जगृहे कुतूहली ॥ ३१ ॥

मातुरुल्लसितगण्डमण्डले
माधवो निजतनुं विलोकयन् ।

अन्यबालकधिया कुतूहला-
दुन्नमय्य करमाजुहाव सः ॥ ३२ ॥

साकमन्यशिशुभिः समाकुलो
गोकुले स विहरन्मुहुर्मुहुः ।
प्राप्य तूर्णगतिरन्तरान्तरा
मातुरङ्कशयितः स्तनं पपौ ॥ ३३ ॥

धावतस्तत इतः कलस्वनान्
कौतुकेन स कपोतपोतकान् ।
अन्वितस्त्वरितमन्यबालकै-
रन्वधावदरविन्दलोचनः ॥ ३४ ॥

तर्णकानसमये विमुच्य तान्
वल्गतः सकुतुकं विलोकयन् ।
कोपिताश्च तरसैव गोपिका
गूढमेव विजहास माधवः ॥ ३५ ॥

यत्र यत्र पतितं व्रजौकसां
लोचनं वपुषि शार्ङ्गधन्वनः ।
तत्र तत्र निममज्ज विह्वलं
विस्मृतप्रतिनिवृत्ति निश्चलम् ॥ ३६ ॥

---

(३५) तर्णकान् = वत्सान् ॥

बालकेषु सकलेषु सत्स्वमुं
बालमेव पशुपा व्यलोकयन् ।
षट्पदा विकसितं नवाम्बुजे
पुष्पजातमपरं स्मरन्ति किम् ॥ ३७ ॥

रम्यवस्तुषु च नित्यदर्शने
कौतुकं शिथिलमेव जायते ।
पश्यतां तु हरिमेव सन्ततं
प्रौढिमानमगमत् कुतूहलम् ॥ ३८ ॥

गोपबालसहितः सहाग्रजो
गोकुले स विहरन् जनार्दनः
गोपिकानयनपूर्णचन्द्रमा
गोरसेष्वधिकलालसोऽभवत् ॥ ३९ ॥

गेहकृत्यनिरते वधूजने
मन्दिरेषु मधुसूदनश्चरन् ।
द्रष्टुमन्यदिव किञ्चन च्छला-
दन्वियेष नवनीतभाजनम् ॥ ४० ॥

द्वारसन्निहितलोचनो मुहु-
र्गोरसं कमललोचनः पिबन् ।

---

(३७) दृष्टान्तः, प्रतिवस्तूपमा वा ॥

आगतां द्रुतमवेक्ष्य वल्लवीं
मूक एव निलयात्स निर्ययौ ॥ ४१ ॥

स्प्रष्टुमेतदधुना न शक्यते
शिक्यभाण्डमिति चिन्तयन्नसौ ।
मन्थदण्डमवलम्ब्य पाणिना
रन्ध्रमस्य विदधे पिपासया ॥ ४२ ॥

भाण्डजातमवदारितं त्वया
वत्स कष्टमिति वादिनीं वधूम् ।
मर्कटेन दलितं कथं मये-
त्युच्चकैरवददच्युतो मुहुः ॥ ४३ ॥

कृच्छ्रतः समधिरुह्य पीठिकां
भ्रंशमेत्य विवशस्ततः क्षणात् ।
शिक्यमात्रमवलम्ब्य पाणिना
डोळयेव विहृतिं चकार सः ॥ ४४ ॥

तिष्ठ तिष्ठ कितवेति वादिनीं
वल्लवीं स नवनीतचोरकः ।
आशु पाणिमधिभित्ति शोधय-
न्नाह नाहमयमीक्ष्यतां करः ॥ ४५ ॥

---

(४२) शिक्यभाण्डम् = शिक्यस्थं पात्रम् । (४५) अधिभित्ति = भित्तौ ॥

यामिनीषु दधि चोरयन्नसौ
दारयन्नखिलभाण्डमण्डलम् ।
गोपिकासु तिमिरे किमेतदि-
त्याकुलासु विदधे पलायनम् ॥ ४६ ॥

किङ्किणीवलयकङ्कणावली-
मञ्जुशिञ्जितनिवारणेच्छया ।
मन्दिरेषु नवनीतमच्युतो
मन्दमेव विचरन्नचोरयत् ॥ ४७ ॥

क्षीरपूरमतिगूढमेकदा
चोरयन्तमुपरुध्य पाणिना ।
मातुरन्तिकमुपागमय्य तं
भीतमूचुरिति वल्लवीजनाः ॥ ४८ ॥

न क्षणं दधिघृतादिरक्षणं
कर्तुमन्वहमिमा वयं क्षमाः ।
दुर्विलासनिधिरेष बालकः
सर्वमेव हरते गृहोदरे ॥ ४९ ॥

वीक्ष्यते यदि निविश्य मन्दिरे
मन्दिरे निखिलगोपयोषिताम् ।
भिद्यते स्म यदनेन नैव त-
द्विद्यते न खलु भाण्डमण्डलम् ॥ ५० ॥

किञ्चनापि न च वञ्चितं मया
ज्ञापयन्ति हि वृथा वधूजनाः ।
एवमद्य खलु नाटयत्यसौ
दीनतां वदनमस्य वीक्ष्यताम् ॥ ५१ ॥

बालचेष्टितमिति प्रतिक्षणं
प्रागितः सकलमक्षमामहि ।
शिक्ष्यते न यदि नन्दनस्त्वया
शक्ष्यते किमपि नैव रक्षितुम् ॥ ५२ ॥

इत्थमुक्तवति वल्लवीजने
तर्जनं सपदि कर्तुमक्षमा ।
नन्दनं भयविलोललोचनं
वीक्ष्य वीक्ष्य जननी जहास सा ॥ ५३ ॥

एकदा मृदुपभुक्तिवार्तया
दारिते निजसुताननोदरे ।
विश्वलोकमवलोक्य पूरुषः
प्राक्तनोऽयमिति निश्चिकाय सा ॥ ५४ ॥

तावदेव कृतमोहया तया
मायया पशुपनाथजायया ।

---

(५२) शिक्ष्यते न यदि = सत्स्वभावमवबोध्यते न चेत् ॥

पुत्रबुद्धिमवलम्ब्य सस्वजे
पुण्यपूगसुगमः पुमानसौ ॥ ५५ ॥

मथ्नती दधि कदाचिदात्मजं
वीक्ष्य सा तदुपरोधनाकुलम् ।
संमदावशमनाः स्तनं ददौ
निर्ममन्थ च ससंभ्रमं पुनः ॥ ५६ ॥

क्षीरचोरमचिरात् पलायितं
पाशपाणिरथ केशवं बलात् ।
बन्धमोक्षणविचक्षणं नृणां
बन्धमानयदसावुलूखले ॥ ५७ ॥

दीनतां नियमनेन नाटयन्
सास्मितं सुरगणैर्विलोकितः ।
स्थूलमप्यलमुलूखलं बलात्
संचकर्ष सरसीरुहेक्षणः ॥ ५८ ॥

नारदस्य कुपितस्य शापतः
प्रापितौ ककुभतां व्रजान्तिके ।
राजराजतनयौ शनैश्शनै-
राजगाम कृपया जनार्दनः ॥ ५९ ॥

---

(५५) सस्वजे = आलिङ्गितः ॥

तिर्यगेष विचकर्ष शाखिनो-
रन्तरा यमळयोरुलूखलम् ।
अञ्जसा स विततान भञ्जनं
कुञ्जरेन्द्र इव तुङ्गयोस्तयोः ॥ ६० ॥

संनिपत्य पदयोर्जगत्पतेः
किन्नरेशतनयौ कृतस्तुती ।
स्वं निर्योगमथ तन्नियोगतः
सत्वरौ ययतुरुज्ज्वलाशयौ ॥ ६१ ॥

त्रुट्यतोर्विटपिनोश्चटत्कृतिः
स्फोटितश्रुतिपुटी पटीयसी ।
वज्रघोष इव भोगिमण्डलं
गोपलोकमखिलं व्यकम्पयत् ॥ ६२ ॥

अर्जुनौ निपतितौ च पीडया
वर्जितं च तमवेक्ष्य बालकम् ।
रक्षितोऽत्र विधिना व्रजेशितु-
र्नन्दसूनुरिति मेनिरे जनाः ॥ ६३ ॥

दुस्सहं महदरिष्टबाधनं
जृम्भते सकलमत्र गोधने ।

---

(६२) भोगिमण्डलम् = सर्पकुलम् । (६३) व्रजेशितुर्विधिना = नन्दस भाग्येन ॥

प्रागितस्तु विधिनैव पालिता
बालकाश्च सकलाश्च धेनवः ॥ ६४

वासभूमिरपरत्र कल्प्यतां
स्थातुमत्र न हि शक्नुमो वयम् ।
अन्यथा व्यसनमप्रतिक्रियं
गोकुलं परिभविष्यति ध्रुवम् ॥ ६५ ॥

इत्युदीर्य शकटैर्विशंकटै-
स्तुङ्गशृङ्गरवपूरिताम्बराः ।
नन्दगोपसहिता व्रजौकसो
वृन्दपूर्वमवनं प्रपेदिरे ॥ ६६ ॥

पादपानथ पलाशितान् क्रमात्
पाटलीकृतदिगन्तपल्लवान् ।
पूर्णभूरिफलभारनिस्सहान्
वीक्ष्य तत्र पशुपा मुदं ययुः ॥ ६७ ॥

शाद्वलान् मरतकोपमच्छवी-
न्मौक्तिकद्युतिसहोदरीरपः ।
वीक्ष्य गोकुलमनाकुलं बभौ
वृत्तिरेव जगतां मता न भूः ॥ ६८ ॥

---

(६६) वृन्दपूर्वमवनम् = वृन्दावनम् । (६६) पलाशितान् = संजातपत्रान् ॥

वीक्ष्य वीक्ष्य विपिनं जलाशयान्
संचरन् स सरसीरुहेक्षणः ।
आदितः कलितगोपदं गिरिं
वर्धनोत्तरपदं व्यलोकत ॥ ६९ ॥

सर्वतः शिशिरनिर्झरान्वितं
पर्वतं परिवृतं तृणाङ्कुरैः ।
वीक्ष्य कैटभरिपुः स्फुटं गवां
वर्धनोऽयमिति निश्चिकाय तम् ॥ ७० ॥

तुङ्गमूर्ध्वपरिघट्टिताम्बरं
पादरुद्धवसुधं महीधरम् ।
सेवितं द्विजगणैर्विलोकय-
न्नच्युतो बलिविमर्दमस्मरत् ॥ ७१ ॥

कल्मषौघशमने विचक्षणा-
मुन्मिषन्मधुरसारसस्वनाम् ।
बालमारुतविधूतकूलभू-
मालतीकुसुमलोलषट्पदाम् ॥ ७२ ॥

रम्यसूक्तिमिव सुप्रसन्नतां
बिभ्रतीमतिगभीरतामपि ।
माधुरीजितसुधां रसोत्सुकै-
रादृतां पिककुलैरनारतम् ॥ ७३ ॥

चक्रवाकविलसत्पयोधरां
चारुलोलशफरीविलोचनाम् ।
श्रोत्रहारिकळहंसनादिनीं
प्रेयसीमचरमां पयोनिधेः ॥ ७४ ॥

उष्णभानुतनयामपि स्फुटं
मुष्णतीमखिलतापसंहतिम् ।
पुष्णतीं विमलतां शरीरिणां
कृष्णतोयभरपूरितामपि ॥ ७५ ॥

स्पन्दमानसरसीरुहोदर-
स्यन्दमानमकरन्दशारिताम् ।
नन्दगोपतनयः कुतूहली
संददर्श स कळिन्दनन्दिनीम् ॥ ७६ ॥

तत्र नन्दसुतरोहिणीसुतौ
वर्धमानवपुषौ शनैश्शनैः ।
रक्षणाय जगतां विचक्षणौ
वत्सपालनपरौ बभूवतुः ॥ ७७ ॥

प्रातरेव कृतभोजनौ समं
प्राकृताविव जगत्त्रयेश्वरौ ।

---

(७५) उष्णभानुतनया = सूर्यसुता । विरोधाभासः । विभावना वा ॥

चारितप्रचुरवत्समण्डलौ
चेरतुः प्रतिवनं दिने दिने ॥ ७८ ॥

जातुचिन्नवशुकाङ्कोमळैः
शीतळैस्तृणचयैः समाचितम् ।
बालकैः सह कळिन्दकन्यका-
कूलमाप सबलो जनार्दनः ॥ ७९ ॥

बालयोर्विहितकूललीलयो-
रेतयोः शिशुगणैः समेतयोः ।
उत्सुकोऽथ हनने महाबलो
वत्सकाकृतिरवाप दानवः ॥ ८० ॥

अन्तिके तदनु वत्ससंतते-
रन्तराळगतमम्बुजेक्षणः ।
हन्तुकाममवलोक्य कल्पय-
न्नन्तकाय बलिमाससाद तम् ॥ ८१ ॥

करेण गृह्णन् कमलेक्षणः पदे
विलोक्य मन्दास्मितमञ्जुळाननः ।
समाक्षिपद्बालसमक्षमेव तं
समिद्धकोपः स कपित्थपादपे ॥ ८२ ॥

---

(७९) समाचितम् = व्याप्तम् ॥

सपदि पटुतरं ध्वनिं वितन्वन्
सह तरुणा चरणौ पपात दैत्यः ।
सरसिजनयनस्य पुष्पवृष्टिः
शिरसि च देवगणैर्विमुच्यमाना ॥ ८३ ॥

सेव्यां गणेन यमिनां यमुनां स गच्छ-
न्नच्छोदकां कळरणत्कळहंसमालाम् ।
रामादिभिः सह दिनेषु मनोऽभिरामे
रेमे तदीयपुळिने नळिनायताक्षः ॥ ८४ ॥

एवं वनेषु पुळिनेषु च संचरन्तं
देवं कदाचिदसुरो बकरूपधारी ।
नाम्ना बको ललितविग्रहमग्रहीत्त-
माम्नायगीतचरितं त्वरितं जिघांसुः ॥ ८५ ॥

तावत्तापिततालुमूलमसुरो बालं क्षणादुद्वमन्
भूयः खण्डयितुं स तुण्डयुगळेनारब्ध घोरध्वनिः ।
गृह्णन्नाशु करद्वयेन परुषां चञ्चुद्वयीं लीलया
तुङ्गक्ष्माधरश्रृङ्गसन्निभममुं द्वेधाकरोन्माधवः ॥ ८६ ॥

आत्मीयं भवनं जगाम च शनैराश्चर्यपर्याकुला-
मातन्वन्नतिदुष्करेण जनतामेतादृशा कर्मणा ।

---

(८६) आरब्ध = उद्युक्तवान् ॥

आलिङ्ग्य त्वरया समेत्य पितरौ फुल्लाननौ कानना-
दायातं च सुतं ममज्जतुरतीवानन्दवारांनिधौ ॥ ८७ ॥

इति श्रीशङ्करकविकृते श्रीकृष्णविजये
तृतीयः सर्गः ।

चतुर्थः सर्गः ।

अहर्मुखे केळिसमुन्मुखस्ततः
समावृतो गोपकुमारवत्सकैः ।
वनान्तरं दैत्यजनान्तलम्पट-
स्त्रिविक्रमो गन्तुमसौ प्रचक्रमे ॥ १ ॥
निष्कामता नन्दसुतेन साकं
मनांसि गोपालकुटुम्बिनीनाम् ।

---

(१) वत्सकम् = वत्ससमूहः । माघकाव्य इव नानावृत्तमयोऽयं तुरीयः सर्गः ॥

निश्चक्रमुस्तस्य कटाक्षलक्ष्मी-
पाशेन तावत् परतन्त्रितानि ॥ २ ॥

परिपूरिततुङ्गनादश्रृङ्गः
परितो गोपकुमारकैरुपेतः ।
पदपल्लवपांसुभिर्वनान्तं
परमात्मा स पवित्रयांचकार ॥ ३ ॥

प्रदर्शयन्नजगरवेषचातुरीं
विकासयन् वदनमघासुरो वने ।
रुरोध तत्पदमथ भोजभूपतेः
प्रियंकरः सपदि नृणां भयंकरः ॥ ४ ॥

उग्राचलेन्द्रवपुषा सरुषा तदानी-
मग्रासि तेन पशुवत्सकुमारसंघः ।
व्यग्रे च तत्र भगवान् करुणानिधाना-
मग्रेसरो झटिति तद्वदनं विवेश ॥ ५ ॥

तिरोहिते तस्य मुखोदरे हरौ
विधुंतुदस्येव निशीथिनीपतौ ।
विलोचनानन्दकरे सुरोत्तमा-
श्चकोरसंघा इव लेभिरे शुचम् ॥ ६ ॥

---

(४) अजगरः = महाकाय उरगः । रुचिरा वृत्तम् ॥

प्रविश्य सद्यो ववृधे गळोदरे
　　सहैव तस्य व्यथया स माधवः ।
विदारितात्तद्वपुषश्च निर्ययौ
　　पयोदगर्भादिव बालभास्करः　॥ ७ ॥

दलिताद्दनुजान्निरेत्य राशि-
　　र्महसामाशु विवेश केशवं तम् ।
जगतां जडिमान्धकारभेदी
　　तनुते किं न फलं तदङ्गसङ्गः　॥ ८ ॥

तदा तदीयोदरपञ्जरान्तरात्
　　समाकुलां वत्सकुमारमण्डलीम् ।
निपीडितां शोककृपीडजन्मना
　　वियोजयामास पयोजलोचनः　॥ ९ ॥

मधुमदजुषां जल्पाकीनां मधुव्रतयोषितां
कळकळरवोद्रेकादाकारणामिव तन्वतीम् ।
कुटिललहरीलीलालोलत्कुमारसमीरणां
तदनु गतवानम्भोजिन्यास्तटीं मधुसूदनः　॥ १० ॥

वत्साश्चरन्तु तृणसन्ततिमन्तिकेऽस्मि-
　　न्नस्माभिराशु विनिवेशितशिक्यभाण्डैः ।

---

(९) कृपीडजन्मा = अग्निः । (१०) जल्पाकी = शब्दायमाना । आकारणा = आह्वानम् । कुमारसमीरणो मन्दवायुः ॥

भोक्तव्यमित्थमभिधाय हरिः सखेलं
तस्यां सुखेन बुभुजे सह बालसंघैः ॥ ११ ॥

परीक्षितुं पङ्कजनेत्रमेनं गोवत्सकान् गोपकुमारसंघान् ।
अदृश्यरूपानपहृत्य वेगादन्तर्हितोऽभूदरविन्दजन्मा ॥ १२ ॥

लीलारतेषु सविधे विविधेषु तेषु
तीरोषितेषु सरसोऽथ तिरोहितेषु ।
आत्मानुभावतुलनाय स निश्चिकाय
पाद्मासनं कपटमेव पयोरुहाक्षः ॥ १३ ॥

गर्वमाशु स विधेरपनेतुं
दुर्वचेन निजवैभवभूम्ना ।
सर्वतर्णकशिशूनथ पूर्वै-
र्निर्विशेषमसृजन्नळिनाक्षः ॥ १४ ॥

चरमभूधरसाङ्गिनि कुङ्कुम-
स्तबकपाटववञ्चनचुञ्चुनि ।
गगनलङ्घिनि पङ्कजजीविते
भवनमाप स गोपसमन्वितः ॥ १५ ॥

क्षणात् क्षरत्क्षीरपयोधराणि
गम्भीरहुंकारवसंकुलानि ।
विलोक्य वत्सान् विपिनादुपेतान्
गत्वा लिहन्ति स्म गवां कुलानि ॥ १६ ॥

आपूर्णहर्षविवशमानसाना-
मानिर्भवद्बाष्पविलोचनानाम् ।
आस्थातिरेको जननीजनाना-
मासीत् स्वकीयेषु कुमारकेषु ॥ १७ ॥

भूयोभिरर्भकगणैरथ संयुतेन
भूयोऽपि नित्यममुना यमुनासमीपे ।
वृन्दावनेऽपि निरतेन पुरेव वत्स-
वृन्दावने विहरणा हरिणा वितेने ॥ १८ ॥

एकस्मिन् गतवति वत्सरे विरिञ्चो
वत्सौघानपि पृथुकान् वने प्रकाश्य ।
पूर्वेषां विततिषु मिश्रितेषु तेषु
व्यग्रोऽभूदथ स मिथो भिदामजानन् ॥ १९ ॥

वत्सान् कुमारनिकरानचिरात्स पूर्वान्
दूर्वाङ्कुरेण महसा कलहायमानान् ।
पीताम्बरान् भुजचतुष्टयपुष्टशोभान्
धाता दृशां झटिति गोचरयांचकार ॥ २० ॥

करकुड्मलकम्रनम्रमौळि-
र्घनरोमाञ्चकदम्बकञ्चुकश्रीः ।

---

(१८) विहरणा = विहृतिः ॥

पदपल्लवमस्य पद्मजन्मा
मकुटीसीमनि मण्डनीचकार ॥ २१ ॥

विमुह्यतो विस्मयपारतन्त्र्या-
च्चतुर्मुखी सा चतुराननस्य ।
प्राचीनवाक्चङ्क्रमकेळिभूमि-
र्वाचालिताभूच्छ्रुतिवाक्यगुम्फैः ॥ २२ ॥

इदमस्तु नमश्चिरन्तनीनां
भणितीनामवतंसमौक्तिकाय ।
कलशाम्बुधिकन्यकाकठोर-
स्तनशैलीरसपारदृश्वने ते ॥ २३ ॥

इति स्तावं स्तावं भवजलधिनावं प्रणमतां
मुहुर्नामं नामं सुकृतपरिणामं व्रजभुवाम् ।
जगन्मूलं बालं कपटपशुपालं विपिनतः
प्रसाद्यातो यातो भवनमनु पाथोजभवनः ॥ २४ ॥

साकं बालैरात्ममायातिरेका-
देकं वर्षं मन्यमानैः क्षणार्धम् ।
अम्भोजिन्याः कूलभूमेस्तदानी-
मम्भोजाक्षो गोपवाटीं प्रपेदे ॥ २५ ॥

---

(२२) प्राचीनवाक्चङ्क्रमकेलिभूमिः = श्रुतिविहारस्थानम् ॥
२४) स्तावं स्तावं = स्तुत्वा स्तुत्वा ॥

उपगतावथ तौ पशुपालता-
मखिलगोपकुमारसमावृतौ ।
प्रतिदिनं विपिनेषु विचेरतु-
र्विहृतिकौतुकिनौ बलकेशवौ ॥ २६ ॥

सरितं परितः समं कुमारैः
सविलासं विचरन् सरोजनेत्रः ।
अळिनां नळिनान्तरेषु शृण्वन्
कळनादाननुकूजितं वितेने ॥ २७ ॥

हुंकारतः क्वचिदसौ कळहंसमालां
पङ्केरुहान्तरगतां भ्रमयांचकार ।
भूयः प्रसारितकरः प्रसभं ग्रहीतुं
तामन्वधावदरविन्दपलाशनेत्रः ॥ २८ ॥

वल्लीनिकुञ्जकुहरे स निलीय कांश्चि-
ज्झिल्लीविलासकपटेन नियम्य बालान् ।
सिंहस्वनेन करताळकृताट्टहासो
रंहस्विनः स्फुटमधावयदन्यबालान् ॥ २९ ॥

---

(२७) सरितं परितः = नद्याः पार्श्वयोः ॥

(२९) रंहस्विनो वेगशालिनः । "अस्मायामेधास्रजो विनि"रिति विनिः ॥

संभूय गम्भीरमसौ कुमारै-
गुहान्तरे हुंकृतिमादधानः ।
शिखण्डिनां ताण्डवपण्डितानां-
मालोक्य लीलां मुमुदे मुकुन्दः ॥ ३० ॥

सकलसरितां कूले कूले तथैव वने वने
कुसुमसुरभौ कुञ्जे कुञ्जे कुतूहलसंकुलः ।
उलपविपिनं नायं नायं गवां ततिमादरा-
न्मधुरमधुरं गायं गायं चचार जनार्दनः ॥ ३१ ॥

तेजांसि दिक्षु विकिरन्नथ पान्थपङ्क्ति-
नाडिन्धमानि भगवान् नळिनैकबन्धुः ।
व्योमार्धमध्यमखिलक्षितिचक्रवाळ-
सीमातमश्शमनचुञ्चुरलंचकार ॥ ३२ ॥

पाथांसि पान्थजनपाणिनखंपचानि
पादद्रुहश्च पदवीषु परागपुञ्जाः ।
ऊष्मायमाणगतयो मरुतोऽप्यभूव-
न्नासीन्नभस्तलमरुन्तुदमीक्षणानाम् ॥ ३३ ॥

म्लानीकृता रविकरैर्दृढमौनमुद्रा
वानीरकुञ्जकुहरे कळहंससंघाः ।

---

(३०) गम्भीरमिति क्रियाविशेषणम् । (३१) उलपस्तृणम् ।
(३२) नाडिन्धमानि = मर्मभेदीनि । "नाडीमुष्ट्योश्चे"ति खश् ॥

उष्णालवः कमलिनीं विरहय्य तप्ता-
स्तृष्णातरङ्गितदृशो निभृतं निषेदुः ॥ ३४ ॥

आतपे महति शीतळोदरं पद्मिनीतटनिकुञ्जगह्वरम् ।
अध्युवास शतपत्रलोचनो मुग्धमारुतविधूतपल्लवम् ॥ ३५ ॥

मञ्जुक्वणन्मधुकरे तरुमञ्जरीणां
किञ्जल्कपुञ्जगळितैर्मिळिते रजोभिः ।
तस्मिन् प्रवाळशयने नयनाभिरामे
रामान्वितः सुखमशेत कुशेशयाक्षः ॥ ३६ ॥

पत्रं वटस्य कमलाकुचशातकुम्भ-
कुम्भद्वयीं च भुजगेन्द्रमयीं च शय्याम् ।
सस्मार नैव सरसीरुहलोचनोऽसौ
तस्मिन् म्रदीयसि घने शयने शयानः ॥३७॥

विकिरन्मकरन्दवारिपूरं चलयन् पल्लवतालवृन्तजालम् ।
श्रममम्बुजलोचनस्य मन्दं शमयामास तरङ्गिणीसमीरः॥३८॥

श्रीदामनामा तमुवाच गोपः श्रीवल्लभं पल्लवतल्पसंस्थम् ।
नेदीयसी नाथ विराजतेऽत्र स्वादीयसी तालवने फलाळी ॥३९॥

---

(३७) शातकुम्भकुम्भद्वयी – कनककलशयुगली । म्रदीयो मृदुतरम् ।
(३९) नेदीयसी – समीपवर्तिनी ॥

फलकाङ्क्षया वनमिदं समासेदुषां
करभाकृतिर्दनुजशेखरो धेनुकः ।
खुरपातकम्पितधरो ददाति क्षणात्
कुपितो नृणामसुवियोगरूपं फलम् ॥ ४० ॥

वचनादिति वल्लवस्य तावद्बलभद्रानुचरो बलिप्रमाथी ।
अटवीं प्रविवेश तालपूर्णां तटवीरुद्गहनोदरान्नलिन्याः ॥ ४१ ॥

स्थूलान् फलौकजटिलानथ नीलवासा-
स्तालान् करेण तरसा तरलीचकार ।
लोलास्तदा भयवशादिव पत्रिमालाः
कोलाहलैः सपदि ते रुदितं वितेनुः ॥ ४२ ॥

संक्षोभितस्तेन महानिनादः सहैव तेन द्रुतमापपात ।
तालद्रुमौघात् प्रकरः फलानां वनान्तराळादपि दैत्यराजः ॥४३॥

पाश्चात्यपादखुरपातकृतप्रहारं
पापासुरेन्द्रमचिरेण बली सलीलम् ।
धृत्वा विलोड्य तृणराजतरौ करेण
क्षिप्त्वा रुषा स मुसली शकलीचकार ॥ ४४ ॥

---

(४१) वीरुत् = लता ॥

पुनरपि परान् क्रूरानारावकम्पितकाननान्
सपदि विपिनात् प्राप्तान् दैत्यान् बलेन हलायुधः ।
अपरपदयोर्ग्राहं ग्राहं करेण खराकृतीन्
द्रुमविततिषु क्षेपं क्षेपं चकार कृतान्तसात् ॥ ४५ ॥

निरुध्यमाने च निपात्यमाने भये च तत्सैन्यचये च तेन ।
स्वान्तं च नृणामपि काननान्तमकम्पतां प्राप सकम्पतां च ॥४६॥

मरीचीन् संकोच्य प्रबलमभिमानं च सुदृशां
नभोलक्ष्मीकाश्मीरकतिलकलीलां प्रकटयन्
अलंचक्रे तावद्विकचशुकचञ्चूसमरुचि-
प्रपञ्चः प्रत्यश्वं धरणिधरमम्भोजरमणः ॥ ४७ ॥

गत्वाथ गोष्ठं नयनोत्सवं च कृत्वा जनानां सरसं स भुक्त्वा ।
तल्पे शयानः शरदिन्दुकल्पे रामानुजन्मा रजनीं निनाय ॥४८॥

क्रमेण कुमुदद्विषि स्फुरति पूष्णि कोष्णत्विषि
स्फुटे गगनचत्वरे तमसि सत्वरे गत्वरे ।
सहैव सुलभोलपे पशुपसूनुभिर्धेनुभि-
र्विहृत्य स मुदा वने विचरति स्म वृन्दावने ॥४९॥

---

(४५) कृतान्तसाच्चकार = हतवान् । (४९) सुलभोलपे = तृणसमृद्धे ॥

सरसचारुकिशोरसमीरणं सकलभूतलशोषिणि पूषणि ।
विपिनजातपरिश्रमशान्तये तपनजातटमाप जनार्दनः ॥ ५० ॥

आयुष्मदूष्मण्यचिरेण पूर्णे चण्डातपे दिक्षु पलायमानम् ।
तरङ्गिणीनां तलसीम्नि कोणे भीत्येव शैत्यं कुहचिन्निलिल्ये ॥५१॥

आपीय तस्याः सलिलं तदानीं गोपालगोपङ्क्तिमुपेतमोहाम् ।
आलोकनेनामृतवर्षिणाशु संजीवयामास सरोजनेत्रः ॥ ५२ ॥

फणिपतिविषवह्नेर्दुःसहान्निस्सरन्तीं
दिशि दिशि विसरन्तीं यामुने वारिपूरे ।
पुरहरगळनाळश्यामळां धूमलेखां
किमिदमिति शशङ्के वीक्ष्य पङ्केरुहाक्षः ॥ ५३ ॥

संनिवेश्य मुखमम्बुनि किञ्चिद्धावमानमचिरान्महिषौघम् ।
काण्डशेषमपि पादपषण्डं पुण्डरीकनयनोऽथ ददर्श ॥ ५४ ॥

गरळाग्निधूमदृढलीढतनून् गगनेचरान् झटिति पत्रिगणान् ।
करुणस्वनं निपततः सलिले कलयांचकार कमलारमणः ॥ ५५ ॥

रिरक्षिषुस्तत्क्षणमेव विश्वं निःशङ्कमभ्रङ्कषदीर्घशाखम् ।
आविःस्मितस्तीरगमारुरोह नीपद्रुमं नीरजलोचनोऽसौ ॥ ५६ ॥

---

(५०) तपनजा = यमुना । (५१) आयुष्मदूष्माणि = प्राणिसंतापहेतौ । निलिल्ये = निलीनम् ॥

आरोहतः परिवृतो मधुसूदनस्य
देहप्रभाभिरसितोत्पलसन्निभाभिः ।
शुष्कोऽपि नीपविटपी परिपूर्णपर्ण-
संघातसंकुल इव स्फुटमाबभासे ॥ ५७ ॥

उत्पत्य तस्मादुदकप्रवाहे पपात वेगेन पयोजनेत्रः ।
अमन्दफेनस्फुटहासलक्ष्मीस्तदा ननन्देव कळिन्दकन्या ॥ ५८ ॥

निश्चित्य तीक्ष्णगरळस्य भुजङ्गमस्य
निष्कासनं विषहुताशनशोषितानाम् ।
तस्मिन् क्षणे तपनजाशु तरङ्गहस्तै-
र्मूलं सिषेच मुदितेव तटद्रुमाणाम् ॥ ५९ ॥

क्षोभं प्रपेदे पयसां समूहैः काकोदरः काळियनामधेयः ।
शोकेन पूर्वं कलुषीकृतानि प्रसादमापुर्जगतां मनांसि ॥ ६० ॥

आस्यान्युदस्य तरळान् गरळाग्निलेशा-
नाशामुखेषु विकिरन्मुखरीकृतापः ।
भोगिव्रजेन परितस्त्वरितः समेतः
पाताळतः स निरगादुरगाधिराजः ॥ ६१ ॥

अविरळकाळनीरदकदम्बविडम्बिवपु-
र्मणिगणतुङ्गकान्तिभरसंगतपिङ्गळिमा ।

---

(५८) रूपकानुप्राणितोत्प्रेक्षा ॥

प्रचलितकल्पमारुतविधूतपरीतदव-
प्रतिभयनीलशैलरुचिमाप भुजङ्गमराट् ॥ ६२ ॥

लीलालोलं पाथसि स्फीतकोपो मर्मस्वेनं संदशन् दन्दशूकः ।
चण्डाकारो मण्डलीभूय दैत्यद्वेष्टारं तं वेष्टयामास वेगात् ॥६३॥

आववार वपुरेव केवलं माधवस्य न बलं महोरगः ।
लोलशैवलकदम्बसंवृतः किं विषीदति महामतङ्गजः ॥ ६४ ॥

आश्चर्यमेतदधिमर्म मुकुन्दमेव
संदष्टवानपि च वेष्टितवान् भुजङ्गः ।
स्तम्भं च तापमपि मोहमपि प्रकामं
संप्रापुराशु पुलिने पशुपालसंघाः ॥ ६५ ॥

तदा निवासे तरसैव जातान्युत्पातजातानि विलोक्य नन्दः ।
विशङ्कमानो विपदं मुकुन्दे विश्वैककन्दे विवशो बभूव ॥ ६६ ॥

हलधरनन्दगोपसहिताः सबालवनितास्तदैव पशुपाः
परिगळदश्रुपूरितदृशः कळिन्ददुहितुः समेत्य पुळिनम् ।
द्रुतमथ कुण्डलीन्द्रफणमण्डलीभिराभिवेष्टिताखिलतनुं
सरसिरुहाक्षमेनमुदके विलोक्य रुरुदुर्मुहुश्च मुमुहुः ॥ ६७ ॥

---

(६५) अधिमर्म = मर्मसु । असंगतिरलंकृतिः ॥

(६७) अद्रितनया वृत्तम् ॥

पतितानिरीक्ष्य रुदतो निजबन्धून्
पुळिनान्तरे स नळिनायतनेत्रः ।
दृढबन्धिनोऽस्य फणयन्त्रणमुक्तो
विततान मूर्धनि पदं करुणाब्धिः ॥ ६८ ॥

x पीताम्बराञ्चितकटीरतटीमनोज्ञ-
स्तिष्ठन् भुजङ्गपतिमूर्धनि पङ्कजाक्षः ।
संप्राप नीलगिरितुङ्गशिलानिषण्ण-
बालातपच्छुरितबालतमाललीलाम् ॥ ६९ ॥

अथ नर्तकनर्तमनृत्यदसौ फणपङ्क्तिषु सन्मणिसंततिषु ।
करपङ्कजसंकुलमञ्जुरणन्मणिकङ्कणसंगतताळलयम् ॥ ७० ॥

दीपायमानारुणरत्नकान्तौ रङ्गायमाणे फणचक्रवाळे ।
नटायमानं नळिनाक्षमेनं विलोक्य जग्मुर्विबुधाः प्रमोदम् ॥ ७१ ॥

रोषं त्यजन्तमचिरेण रुजं भजन्तं
रक्तं वमन्तमवसन्नतयानमन्तम् ।
सर्पं क्षणेन स विहाय विहीनदर्पं
प्रावोचदेनमुरगीपरिगीयमानः ॥ ७२ ॥

---

(७०) नर्तकनर्तमनृत्यत् = नर्तक इवानृत्यत् । (७१) अत्र रङ्गस्थानां विदुषां नटनदर्शनानन्दलाभलक्षणं वस्तु ध्वन्यते ॥

अमुष्यामावासं विजहिहि वृथा मा स्म तनुथा
नृणां तापं द्वीपं व्रज रमणकाख्यं फणिपते ।
फणेष्वास्माकीं ते पदनळिनमुद्रां स कलयन्
विरुन्धीत क्रोधादुरगपरिपन्थी त्वयि कथम् ॥ ७३ ॥

इति वदति हरौ त्रिजगदधिपतौ
विहितपदनतिर्विविधकृतनुतिः ।
सुतयुवतिशतैस्त्वरितमनुगतो
रमणकमगमत फणिपतितिलकः ॥ ७४ ॥

उरगेन्द्रममुं विसृज्य वेगादुदकात्तत्क्षणमुन्ममज्ज देवः ।
पशुपैस्तरसा परं ममज्जे परमानन्दपयोधिवारिपूरे ॥ ७५ ॥

[illegible]ै नितरां प्रमोदमक्ष्णोर्जनयन्तं तनयं तमाशु दृष्ट्वा ।
[illegible]भ्य दृढं पयोरुहाक्षं विगळद्बाष्पदृशौ विलेपतुस्तौ ॥ ७६ ॥

झटिति स्फुटितः शिखाच्छटाभि-
श्चटुलाभिर्जटिलो महान् दवाग्निः ।
सरितो निकटे तदा शयानं
परितो गोपसमूहमापपात ॥ ७७ ॥

---

(७३) मा स्म तनुथाः । "स्मोत्तरे लङ् चे"ति लङ् । उरग-[illegible]
[illegible]थी = गरुडः ॥ (७४) प्रहरणतिलकं वृत्तम् ॥

हा कृष्ण कृष्ण भुवनावननिष्ण वह्ने-
रह्नाय पालय कृपालय नो विपन्नान् ।
एवं निशम्य हरिणा सुहृदां प्रलापं
दावानलः स्फुटमपायित दारुणोऽसौ ॥ ७८ ॥

निष्क्रान्ता हुतवहसंकटाच्च दुःखात्
प्रातस्ते तपनसुतातटाच्च सर्वे ।
संप्रापुः परमपि विस्मयं प्रमोदं
नन्दाद्याः पुनरथ गोकुलं च गोपाः ॥ ७९ ॥

वहन्नूष्माद्वैतं सरितमपि कूलङ्कषजलां
कृशीकुर्वन्नौर्वप्रतिभटललाटन्तपरविः ।
ऋतुर्द्वैतीयीको हिमजलपटीरादि सुभगं-
भविष्णूकुर्वाणो निखिलजगतां यौवनभगात् ॥ ८० ॥

प्रमोदमथ विन्दता निजजनापदं भिन्दता
चलन्मृदुलमारुते तरुगशष्पनीशारिते ।
जगतत्रितयपालिना पशुपमण्डलीशालिना
व्यहारि सह सीरिणा विपिनमण्डले शौरिणा ॥ ८१ ॥

---

(७८) निष्णो निपुणः । अह्नाय = झटिति ॥

(८०) द्वैतीयीक ऋतुर्ग्रीष्मः ॥ (८१) व्यहारि = विहृतम् ॥

गोपायमानं निजलाञ्छनानि गोपायमानं दनुजं प्रलम्बम् ।
जानन्नपि स्वैरमसौ मुकुन्दस्तेनाथ सख्यं तरसा चकार ॥ ८२ ॥

भाण्डीरकाख्यस्य वटस्य मूले गिरा मुकुन्दस्य नियुद्धलीलाम् ।
जितेन जेतुर्वहनं च तस्यां गोपालकाः कौतुकिनो वितेनुः ॥८३॥

सीरिणा तत्क्षणं दारुणो निर्जितो
मानवेगोद्धतो दानवाधीश्वरः ।
स्कन्धभागे वहन्नन्धितात्मा रुषा
हन्तुमेनं क्षणादन्तरिक्षं ययौ ॥ ८४ ॥

मलीमसात्मानममुं तदानीं प्रलीनदर्पं दनुजं चिकीर्षुः ।
बली नभःसीमनि तस्य मुष्ट्या हली शिरःकुट्टनमाततान॥८५॥

विधुरितमतिरस्य मुष्टिनासौ
बधिरितदिङ्मुखनिस्वनो धरण्याम् ।
अधरिताशिखरी वपुर्गरिम्णा
रुधिरितवक्त्रदरीमुखः पपात ॥ ८६ ॥

पुनरपि च कदाचित् पुण्डरीकेक्षणोऽसौ
विपिनभुवि वितन्वन् वल्लवान् मीलिताक्षान् ।

---

(८१) गोपायमानम् = छादयन्तं, गोपवदाचरन्तमिति च । आद्ये चानश्, द्वितीये शानच् ॥ (८३) स्रग्विणी वृत्तम् ॥

स्फुटझटझटनादस्फोटिताशेषदारुं
दवदहनमपासीद्विश्वपीडानिरासी ॥ ८६ ॥

शनकैरथ तस्य शार्ङ्गपाणेर्वपुषा वल्गुविलासमन्थरेण ।
समशिक्ष्यत गोपकन्यकानां मनसो मन्मथतन्त्रमार्गशैली ॥ ८७ ॥

कोऽपि स्फुरन् मुहुरपाङ्गतरङ्गितेषु
बिम्बोकडम्बरविशृङ्खलितो विशेषः ।
गोपाय्यमानमपि गोपकुमारिकाणां
माराङ्कुरं मनसि मांसळितं शशंस ॥ ८८ ॥

जीमूतकम्बळितमम्बुजलोचनोऽथ
क्षेमङ्करं च समयं कमलाकराणाम् ।
गात्रेण वेणुरणितैर्नयनोत्सवं च
कर्णोत्सवं च जगतां जनयन्ननैषीत् ॥ ८९ ॥

इति श्रीशङ्करकविकृते श्रीकृष्णविजये
चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

२६२

प्रतिदिनमथ कान्ते यामुने सैकतान्ते
सहसि मदनबाणैस्तापिता गोपकन्याः ।
कमलनयनसक्ताः सैकतीमाद्रिकन्या-
मभिमतफलदात्रीमार्चयन्विश्वधात्रीम् ॥ १ ॥

मधुरमधरबिम्बं मञ्जुपातं कटाक्षं
मधुमुचमपि वाचं मन्थरं च प्रयाणम् ।
चिरमखिलपतेस्ताश्चिन्तयन्त्यो ममज्जु-
र्मुहुरवशममुद्रे रागरूपे समुद्रे ॥ २ ॥

तटभुवि वसनौघं स्थापयित्वा कदाचि-
न्मृदुतरळतरङ्गे मञ्जुगुञ्जत्पतङ्गे ।
विकचतरसरोजे यामुने कामिनीनां
विततिरुदकपूरे सा विजह्रे सलीलम् ॥ ३ ॥

सुररिपुरथ मुष्णन्नेष वासांसि तासा-
मधिपुलिनसमीपं तूर्णमारुह्य नीपम् ।

---

(१) सहसि = मार्गशीर्षे । सैकतीं = सिकतामयीम् ॥

वसनमपि यथास्वं नीयतां मत्सकाशा-
दिति स ललितमूचे स्मेरवक्त्रारविन्दः ॥ ४ ॥

तदनु वदनपद्मैर्डम्भमम्भोरुहाणां
सकलमपहरन्त्यः साकमाकण्ठमग्नाः ।
विवशनयनमास्यं वीक्षमाणा मिथस्ताः
परमदधत लज्जापारतन्त्र्यं मृगाक्ष्यः ॥ ५ ॥

कमलनयन, लीलामेवमस्मासु मा मा
कुरु बुधजननिन्द्यं कर्म ते नन्दसूनो ।
वितर वसनमासीदाम दासीधुरां ते
वयमिति पुनरूचुर्मन्दमिन्दीवराक्ष्यः ॥ ६ ॥

अथ मधुरिपुरूचे यत् समेताः स्थ यूयं
विवसनमिह तोयं तेन भग्नं व्रतं वः ।
सपदि तदुपहत्यै कोरकीकृत्य साकं
शिरसि करसरोजे नीयतामंशुकाळी ॥ ७ ॥

झटिति तटमुपैतुं व्रीळया रुध्यमाना
मुहुरपि वसनानां वाञ्छया चोद्यमानाः ।
चिरमथ सविकल्पं चेतसा वीचिलीला-
मनुविदधुरनङ्गेनातुराः कातराक्ष्यः ॥ ८ ॥

तदनु सलिलमध्यात्ताः समारुह्य मन्दं
निजगळतलदघ्नात्सन्दिहानाः क्रमेण ।
रहयितुमथ भूयः सोद्यमा नाभिमूल-
द्वयसमुदकपूरं नाशकन् पेशलाक्ष्यः ॥ ९ ॥

पुनरुपतटमेताः पूर्णलज्जं समेता
मुकुळितकरपद्मा मूर्ध्नि पद्मासमानाः ।
मधुरहसितमेनं माधवं वीक्ष्य जग्मुः
सचकितमथ कम्पं स्तम्भमम्भोरुहाक्ष्यः ॥ १० ॥

पुळिनमुपगतानां पुष्पबाणार्दितानां
पुळकनिचुळितानां पूर्णघर्माङ्कुराणाम् ।
वसनमखिलमासां वल्लवीनां स दत्वा
मधुरमधुरमूचे मन्दहासी मुकुन्दः ॥ ११ ॥

कलितकिसलयं यत्काङ्क्षितं वः पुरासीत्
कुसुमितमधुना तज्जायतामायताक्ष्यः ।
सपदि च सफलत्वे संशयस्तस्य को वा
व्रजमनु भवतीभिर्गम्यतां रम्यशीलाः ॥ २० ॥

।

(९) : दघ्नच्, द्वयसचौ प्रमाणार्थकौ प्रत्ययौ । प्रतिवत्सरम् ॥
सलयम् = पल्लवितम् । व्रजमनु = व्रजं प्रति ॥

कथमपि पुनरेताः कान्तिसंतानसिन्धौ
मधुदनुजनिहन्तुर्मग्नमाकृष्य नेत्रम् ।
हृदयमपि च तस्मिन् गोपिकाः स्थापयित्वा
दृढतरमुपजग्मुर्देहमात्रेण गेहम् ॥ १३ ॥

तदनु स वनमध्ये तापसानाश्रमस्थान्
विहितसवनदीक्षान् भक्तभिक्षां विधातुम् ।
विपिनविहरणार्तानेष मार्ताण्डतेजः-
प्रकरजनिततापान् प्रेषयामास गोपान् ॥ १४ ॥

द्रुतमथ कृतयात्रे वल्लवौघे विमोहा-
दखिलमुनिजनौघैराददे मौनमुद्रा ।
पुनरपि पशुपालास्तत्सनीडान्निवृत्ता
मधुमथननियोगं तत्कळत्राण्यवोचन् ॥ १५ ॥

पतिभिरपि निरुद्धा विप्रजायाः समीयु-
र्दधिमधुघृतसिक्तं भक्तमादाय शौरिम् ।
...भसमथ पत्या हस्तरोधं गृहीता
स्मृतहरिपदमन्या देहमुक्तिं वितेने ॥ १६ ॥

झटिति त...
मुहुरपि ...

चिरमथ सविक प्रतीत्यध्याहार्यम् । भक्तभिक्षा = अन्नयाञ्चा ॥
मनुविदधुरनङ्गैस्तयो रुध्वा । स्मृतेत्यादि क्रियाविशेषणम् ॥

त्वरितमनुगृहीताः शौरिणा विप्रपत्न्यो
निजवसतिमवापुर्निर्मलीभूतचित्ताः ।
अथ मुनिभिरभक्तिं चिन्तयित्वा मुकुन्दे
निखिलमपि निनिन्दे चेतसा पण्डितत्वम् ॥ १७ ॥

अथ शतमखयागव्याकुलं गोकुलं तत्
सकलमपि स पश्यन्नेकदा लोकनाथः ।
इह पशुपजनानां संभ्रमः कोऽयमित्थं
निखिलहृदयवर्ती पृष्टवान् नन्दगोपम् ॥ १८ ॥

शृणु तनय, मरुत्वानेव पर्जन्यरूपी
विसृजति भुवि तोयं प्राणिनां प्राणनार्थम् ।
शरदि शरदि तस्मादेवमस्माभिरस्मै
बलिरिह परिकल्प्यो नूनमित्याह नन्दः ॥ १९ ॥

दशनकिरणपङ्क्त्या निस्सरन्त्या वितन्वन्
मधुरमुखसरोजे मञ्जुकिञ्जल्कलक्ष्मीम् ।
दमयितुमतिवेलं दर्पभारं वलारेः
पतिमथ पशुपानां पद्मनाभो बभाषे ॥ २० ॥

जननिधनरक्षाः प्राणिनां कर्ममूला-
स्तदनुसरणमात्रं कर्तुमीशोऽयमीष्टे ।

---

(१९) पर्जन्यो मेघः । शरदि शरदि = प्रतिवत्सरम् ॥

नरपरिवृढबुद्ध्या कल्पितं कार्यजातं
न खलु किमनुगन्त्री मन्त्रिसंसन्मनीषा ॥ २१ ॥

निजकृतमनुभुङ्क्ते संततं कर्म जन्तु-
र्नियतिविहितमिन्द्रो नान्यथा कर्तुमीष्टे ।
भवति जगति वृत्तिर्येन वा मानवानां
परमपरममुष्माद्दैवतं नैव लोके ॥ २२ ॥

भवति परमधर्मः पालनं नः पशूनां
तदुपकरणहेतुः सर्वदा पर्वतोऽसौ ।
सपदि बलिरमुष्मै साध्यतां तन्मघोनः
सवनमिह विधातुं संभृतैर्द्रव्यजातैः ॥ २३ ॥

इति निगदति तस्मिन्नीश्वरे नन्दमुख्यै-
रतिमुदितमनोभिः प्रस्थितं तैरनोभिः ।
सकलमपि वहद्भिः साधनौघं महद्भिः
सह धरणिसुरौघैः सोऽधिजग्मे गिरीन्द्रः ॥ २४ ॥

सरसमृदुलमन्नं सौरभेयीसमूहं
विविधमपि धनौघं विप्रसात्कृत्य भक्त्या ।

---

(२१) राजशासनं किं न मन्त्रिणोऽनुसरन्तीत्युत्तरार्धसारः ॥

(२४) अनोभिः = शकटैः ॥

कुतुकविवशचित्ताः कुड्मळीभूतहस्ताः
पुळकितवपुषस्ते पूजयांचक्रुरद्रिम् ॥ २५ ।

पृथुलवपुरथासौ प्राप्य गोवर्धनत्वं
निखिलमपि च वेगेनादिवानोदनौघम् ।
पशुपनिवहविश्वासाय विश्वैकधात्रा
परमपि वपुरूहे पूर्ववत् पूजनार्थम् ॥ २६ ॥

द्रुतमथ निजपूजाभावचण्डानिलेन
प्रसभममरभर्तुर्दीपितः कोपवह्निः ।
ज्वलितकलुषलोलन्नेत्रबृन्दापदेशा-
द्बहिरिव बहुलत्वाद् दुस्सहो निस्ससार ॥ २७ ॥

अखिलभुवननाथं तर्जयन् वज्रपाणि-
र्निखिलमुदकपूरे गोकुलं मज्जयिष्यन् ।
चलकुलगिरिकल्पानाशु कल्पान्तमेघान्
प्रकटमुखरधारान् प्रेरयामास घोरान् ॥ २८ ॥

तदनु विपुलमूर्तिस्तूर्णमाधोरणौघै-
रिव पवनसमूहैः सम्यगास्तीर्यमाणा ।
शकलितहरिनीलश्यामळा व्योमरूपे
करिणि जलधराळी कम्बळत्वं प्रपेदे ॥ २९ ॥

---

(२६) आदिवान् = अभक्षयत् । (२९) आधोरणो हस्तिपः ॥

जहसुरिव वलाकामण्डलीभिः पयोदा
वक्मुरिव तटिद्भिः स्फूर्जितं कोपवह्निम् ।
बभणुरिव कठोरं गर्जितैर्गोपसंघान्
व्यधुरिव पवमानैर्घोरनिश्वासधाराम ॥ ३० ॥

पटुरटितविलोलन्मारुता वारिधाराः
परुषकुलिशधाराकर्कशाः शर्कराळीः ।
मुमुचुरथ दिगन्तव्यापिनो गोपवाटे
भ्रमितभुवनान्ता भैरवा वारिवाहाः ॥ ३१ ॥

ज्वलितचलितविद्युद्दामजातैरलातैः
शतमखबलिभोगात्ताडितो मेघवृन्दैः ।
स्तनितजनितघोषो गह्वरे विह्वलात्मा
गिरिपतिरथ चक्रन्देव गोवर्धनोऽसौ ॥ ३२ ॥

अथ पशुपसमूहैरम्बुनिर्भिन्नदेहैः
सह पशुभिरशेषैः सत्वरं प्राणशेषैः ।
पदसरसिजयुग्मे पद्मनाभस्य जग्मे
निपतनमतितिग्मे तापसिन्धौ निमग्नैः ॥ ३३ ॥

---

(३१) शर्करा = वर्षोपलः

शमयितुमथ तेषां शोकभारं दयालु-
  र्नमयितुमतिदर्पादुन्नतं शक्रशीर्षम् ।
करसरसिरुहेण *स्थूलमुन्मूल्य मूला-
  न्मधुरिपुरदधात्तं लीलया शैलनाथम् ॥ ३४ ॥

झटिति पटपटायन् स्थूलमूलप्रसक्ति-
  प्रविघटननिनादैस्तर्जयन्नेप शैलः ।
निजजनपरिपीडाजातरोषस्तदानीं
  स्वयमुपरि पयोदानुत्पपातेव जेतुम् ॥ ३५ ॥

तदनु भुजगलोकान्निस्सरन्ति स्म रन्ध्रैः
  फणिगणमणिपङ्क्तेः स्थूलदीर्घा मयूखाः ।
कमलनयनभक्त्या धर्तुमद्रीन्द्रमेनं
  स्वयमिव फणिराजेनोद्धृताः स्तम्भदण्डाः ॥ ३६ ॥

पशुपशुपकदम्बं पद्मनेत्रः समस्तं
  ततमृदुसिकताभं तस्य चाधःप्रदेशम् ।
गळितशिशिरबाधं गर्भगेहायमानं
  प्रमुदितमणिदीपं प्रापयामास भूयः ॥ ३७ ॥

---

* छत्रधायं सखेलमिति पाठान्तरम् । छत्रधायमदधादित्यन्वयः । छत्र-मिवादधादित्यर्थः ॥

भवति जगति शैले केवलं पल्लवस्य
स्थितिरिह न हि दृष्टं क्वापि तद्वैपरीत्यम् ।
अभवदिति तदानीमद्भुतं संस्थितोऽसौ
करकिसलयमध्ये कैटभारेर्गिरीन्द्रः ॥ ३८ ॥

परमपुरुषशक्त्या पर्वतेऽस्मिन् महत्या
शिखरचयनिषण्णा नैव सत्त्वा विषण्णाः ।
अपि च पशुपसंघैरम्बुदैर्दुर्विलङ्घै-
र्जगति जनितकम्पे नैव किञ्चिच्चकम्पे ॥ ३९ ॥

शिखरिणि हरिणास्मिन्नुद्धृते सप्तरात्रं
महति च सति वर्षे गोकुले जातहर्षे ।
सुरपतिरथ मुञ्चन्नस्मितां विस्मितात्मा
* पशुपकृतविरोधं मेघबृन्दं रुरोध ॥ ४० ॥

तदनु तपनबिम्बं मुच्यमानं घनौघैः
प्रथममधिकसूक्ष्मज्योतिरुत्प्रेक्ष्यमाणम् ।
पुनरतिमृदुवासस्संवृतादर्शबिम्ब-
द्युति पुनरतिरूक्षं दुर्निरीक्ष्यं चकाशे ॥ ४१ ॥

गतवति कटुपाते चण्डवाताभिघाते
कथमपि दधतीनां दिग्वधूनां प्रसादम् ।

(४०) अस्मिता = अहङ्कारः ॥ * कृतपशुपविरोधमित्यपि पाठः ॥

स्मितरुचिरिव रेजुर्लोलजीमूतखण्डाः
स्फुटजरठमृणालीकाण्डपाण्डित्यचोराः ॥ ४२ ॥

पशुकुलमपि गोपान्निर्गमय्याशु मूलात्
करसरसिजमध्यादुन्नतं शैलभारम् ।
मधुरिपुरवतार्य स्थापयित्वा स मूर्ध्ना
पुनरमरविमुक्तं पुष्पभारं बभार ॥ ४३ ॥

स्तुतिमुखरदिगन्तस्तूर्णमापत्य भूमौ
पदसरसिजयुग्मं पद्मनाभं तदानीम् ।
चुलुकितदुरितौघं चूडयामास मूर्ध्नि
प्रकटमकुटदीप्रे लज्जितो वज्रपाणिः ॥ ४४ ॥

सुरभिकलशधारापूरसंसेकगौरी-
कृतरुचिरशरीराल्लब्धगोविन्दनाम्नः ।
सुरपतिरथ लब्ध्वा चक्रपाणेरनुज्ञा-
मगमदधिकमोदेनाकुलो नाकलोकम ॥ ४५ ॥

हरितिथिमथ नीत्वा सोपवासं कदाचित्
पयसि तपनजाया नन्दगोपो निमज्जन् ।
प्रसभमसुरवेलास्नानतः किंकरेण
द्रुततरमुपनीतो वारुणीं राजधानीम् ॥ ४६ ॥

---

(४५) सुरभिः = कामधेनुः । कलशधारा = क्षीरधारा ॥

तदनु पशुपलोके पूर्णशोके मुकुन्दो
* वरुणमुपगतोऽसौ मानितस्तेन भक्त्या ।
झटिति निजनिकेतं तातमानीय भीतान्
प्रमदमतिमहान्तं प्रापयामास सर्वान् ॥ ४७ ॥

अथ पशुपवधूनां पुण्यपूरेण सार्धं
व्रजपतिसुतचन्द्रो वृद्धिमाप क्रमेण ।
रतिपतिरपि साकं धैर्यसारेण तासा-
मखिलभुवनजैत्रीमाददे चापवल्लीम् ॥ ४८ ॥

वपुषि कृतविहारं कैशवे शैशवं तत्
सुचिरमतिबलिष्ठे यौवने वर्धमाने ।
तदभिभवनभीत्येवापयातं समीपे
सति महति विपक्षे दुर्बलः किं करोतु ॥ ४९ ॥

सकलभुवननाथे यौवनश्रीसनाथे
दिनमनु ववृधे या शोभना कापि कान्तिः ।
प्रणयजलधिपूरे सा पुनर्गोपिकाना-
मनवरतमसीमे कौमुदीत्वं प्रपेदे ॥ ५० ॥

---

* वरुणसदनयातस्तत्सपर्यां गृहीत्वा ।
निजजनकममुष्माद्गोष्ठमानीय दीना''निति द्वितीयतृतीयपादयोः पाठान्तरम् ॥

मरतकमणिनीलं मञ्जुळापाङ्गलीलं
चतुरतरविलासं चन्द्रिकामञ्जुहासम् ।
दिशि दिशि वलमानाः शौरिमालोकमाना
मुनिभिरपि च धन्या मेनिरे गोपकन्याः ॥ ५१ ॥

* शितशरशतपातप्रक्रियाप्रक्रमेण
त्रिभुवनजयलक्ष्मीचुञ्चुना पञ्चबाणः ।
पशुपसरसिजाक्षीः पाठ्यमानानुराग-
प्रकटनपरिभाषाः स्वैरमोषांचकार ॥ ५२ ॥

तरळितहृदयानां तादृशा प्रेमभूम्ना
परिगळितधृतीनां पक्ष्मलाक्षीजनानाम् ।
मधुरिपुरथ जज्ञे मन्मथाद्वैतविद्या-
कलितगुणनिकानां काङ्क्षितं कर्तुकामः ॥ ५३ ॥

कुटिलचटुलचिल्लीलास्यलाळित्यरम्ये
वदननळिनबिम्बे वल्लवीनां मुरारेः ।
मसृणरुचिरचारी मन्दहासानुसारी
मनसिजरसलीलामन्थरो दृष्टिपातः ॥ ५४ ॥

---

(५१) मेनिरे इति कर्मणि लिट् ॥ (५२) * शिततरशरपात इत्यपि पाठान्तरम् ॥ ओषांचकार = ददाह ॥ (५३) गुणनिका = आम्रेडनम् ॥

अधिकशिथिलमासीदंशुकं मानसं च
त्रुटितमजनि काञ्चीदाम धैर्यं च तासाम् ।
अपि च नयनपाते कापि कौटिल्यमुद्रा
पदमतनुत सद्यः पौष्पबाणे च चापे ॥ ५५ ॥

चतुरमधुपशिञ्जे चारुवीरुन्निकुञ्जे
मुदितकुसुमधन्वा साङ्गनः शार्ङ्गधन्वा ।
वलदतिमृदुवीचीवातपोताभिरामे
सुखतरमथ रेमे यामुने काननान्ते ॥ ५६ ॥

अथ कुरवकपुष्पैः प्रौढयन् हासलक्ष्मीं
रचयितुमिव पूजां राजदम्भोजधारी ।
विकसितपिकनादच्छद्मना पद्मनाभं
स्तुतिमुखरदिगन्तस्तं प्रपेदे वसन्तः ॥ ५७ ॥

प्रतिदिवसमुपोष्य प्राप्तमौनातिरेकान्
प्रकटितनिजभक्तीन् प्राप्तसङ्गश्चिरेण ।
परभृतनिजशिष्यान् पाठयामास ताव-
न्मदननिगमतन्त्रं माधवश्रोत्रियोऽसौ ॥ ५८ ॥

मधुपनिनदरूपां सामिधेनीमधीय-
न्मदनशिखिनमन्तर्मानिनीनां वसन्तः ।

---

(५९) अधीयन् "इङ्धार्योः शत्रकृच्छ्रिणि" इति शता ॥

मलयगिरिसमुत्थैर्मारुतैर्दीपयित्वा
महति पुनरमुष्मिन् मानहव्यं जुहाव ॥ ५९ ॥

सरभसमथ धून्वन् भासुरां केसरालीं
विरहिमृगसमूहं रंहसा संहरिष्यन् ।
उदपतदलिनादैर्घोरहुङ्कारशाली
मलयशिखरिशृङ्गान्मारुताख्यो मृगेन्द्रः ॥ ६० ॥

कपिलकमलधूलीपिङ्गलश्मश्रुकेशाः
कलितमधुकरालीपाशपालीकरालाः ।
कुसुमशरकृतान्तप्रेरिता वातदूता
विरहिजनमशेषं प्राणशून्यं वितेनुः ॥ ६१ ॥

विधुतकरसरोजां पद्मिनीं वेपमानां
जटिलविशदघर्मां शीकरैर्माकरन्दैः ।
चतुरचटुलभृङ्गीझंकृतैश्चाटुकारो
मुहुरिव परिरेभे मुग्धचारः समीरः ॥ ६२ ॥

मनुरजनि महीयान्मारणाकर्षणार्थं
परभृतकलनादः पञ्चबाणस्य मन्ये ।

---

(६२) मनुर्मन्त्रः ॥

सपदि तमुपकर्ण्य प्रोषितो यन्मृतोऽभूत्
स्वयमपि निजकान्तं मानिनी यत् प्रपेदे॥ ६३ ॥

उपवनभवनान्ते रिङ्खणं व्यादधानाः
परिपतितपरागैर्धूसराः केसराणाम् ।
क्वणितमधुकरालीकिङ्किणीका विचेरु-
र्विगलितमधुलालापाथसो वातपोताः ॥ ६४ ॥

सुरभिसमयलक्ष्मीं सुन्दरीभिः सहैनां
विपिनभुवि मुकुन्दे वीक्ष्य मोदं प्रपन्ने ।
स्वगुणगणमशेषं संनिधौ तस्य तूर्णं
प्रकटयितुमिवाथ प्रादुरासीन्निदाघः ॥ ६५ ॥

परिहसितशुकास्यैः पाटलानां प्रसूनैः
परित इव दधानः पान्थलोकान्त्रमालाः ।
घनमथ विजजृम्भे घर्मकालाभिधानो
दधदधिकमसह्यां रूक्षतां राक्षसेन्द्रः ॥ ६६ ॥

कुसुमसमयसक्ताः कोकिलाः शोकमाप-
न्नृतुषु मधुपसंघाः संततं साम्यभाजः ।
अदधुरपि निदाघे संमदं पक्षपाता-
ज्जगति हि सफलत्वं याति ताटस्थ्यमेवम् ॥ ६७॥

पवनविचलिताम्रा पङ्कजाली नदीना-
मभवदतिकृशानामुन्नमन्ती सनालम् ।

तरणिकिरणमालातापभारासहत्वात्
करततिरिव ताभिः काममुत्क्षिप्यमाणा ॥ ६८ ॥

शिशिरकरकराळीशीतळैश्चन्दनौघैः
सरसि सरसि शीते संततं सन्निपातैः ।
तरळनळिनवृन्दैस्तालवृन्तैश्च लोकैः
कथमपि स विषेहे कर्कशो घर्मकालः ॥ ६९ ॥

सकलमथ जनौघं संततं ग्रीष्मतप्तं
सकरुण इव दृष्ट्वा सर्वसंतापहारी ।
मरतकमणिनीलैर्मांसळैर्वारिवाहै-
* र्मलिनितजगदन्तो मेघकालो जजृम्भे ॥ ७० ॥

विचलदळिकदम्बैराबभासे कदम्बै-
रधिकमधुरकण्ठैः कूजितं नीलकण्ठैः ।
जगति जनितकम्पा गर्जितैर्लोलशम्पा
रुचितुलिततमाला रेजिरे मेघमालाः ॥ ७१ ॥

नवजलधरभेरीनादसंक्षोभिताश-
श्चलदमलवलाकाचामरालीसमेतः ।
कळरवशिखिपाळीकाहळो मेघकाल-
क्षितिपतिरथ निन्ये क्षीणतां राजहंसान् ॥ ७२ ॥

---

(६९) संनिपातो मज्जनम् ॥ * मलिनितवियदन्त इति च पाठः ॥
(७२) कळरवशिखिपाळी = मधुरनादमयूरमाला ॥

मदनशिखिशिखाभिर्मण्डलैश्चण्डभानो-
 र्मुहुरपि किरणानां प्रापिता तापभारम् ।
अधिकचपलभावा भूतधात्री च साकं
 पतति सलिलपूरे बाष्पधारां मुमोच ॥ ७३ ॥

चलितजलधराळीचारुवीचीविलासः
 शशिविशदवलाकाशंखसंघातपूर्णः ।
बहळतरळविद्युद्वाडवज्वालमालो
 गगनसलिलराशिर्गाढनादो बभासे ॥ ७४ ॥

द्रुतमजनि सनाभिर्वज्रवह्नेर्महीयान्
 कुसुमशरकृशानुर्योषितां प्रोषितानाम् ।
कथमिव पृथुरासीदन्यथा तस्य दीप्ति-
 र्मुहुरपि घनवृन्दैर्मुच्यमाने जलौघे ॥ ७५ ॥

---

(७३) मदनशिखिशिखाभिः तापभारं प्रापिता अधिकचपलभावा, चण्डभानोः किरणानां मण्डलैः तापभारं प्रापिता भूतधात्री च बाष्पधारां मुमोचेत्यन्वयः । सहोक्तिरलङ्कारः । सपदि पथिकनारी भूतधात्री च साकमित्यपि पाठान्तरमस्ति । तत्तु हृद्यतरम् (७४) विशदो धवलः । रूपकमलङ्कारः । (७५) सनाभिः सदृशः । प्रोषितानां प्रोषितभर्तृकाणां, यद्वा प्रोषितानां या योषितस्तासामिति वैयधिकरण्येनान्वयः ॥

विकचकुटचवर्णाः क्ष्मातलं श्वेतयन्तः
प्रतिदिशमथ रेजुः प्रस्फुटन्तः शिलीन्ध्राः ।
जलनिधिजलपूरैः साकमाकृष्य मेघैः
सरभसमिव मुक्ताः शुक्तिकानां समूहाः ॥ ७६ ॥

सकलमपि वितन्वल्लोकमन्धंभविष्णुं
प्रकटजलदघोषप्रौढिमाढ्यंभविष्णुः ।
विरहिपरिषदुग्रप्रत्ययशस्पाविलासः
परिणतिमथ कालः प्राप मेघंकरोऽसौ ॥ ७७ ॥

अधिकधवलिताशामण्डलैः पुण्डरीकै-
र्मुहुरिव विहसन्ती मेघकालस्य लक्ष्मीम् ।
गगनममलयन्ती तूललीलां नयन्ती
शरदथ जलदालीं मेदुरां प्रादुरासीत् ॥ ७८ ॥

विकसितसितचञ्चत्केसरैर्भासमानै-
स्तदनु च वनमध्यादुत्थितं पुण्डरीकैः ।
अपगतमपि मूकैर्मेघमातङ्गयूथै-
रुपसरति विपक्षे युक्तमेतज्जडानाम् ॥ ७९ ॥

---

(७९) वनम् = जलमरण्यं च । पुण्डरीकम् = पद्मम् । पुण्डरीको व्याघ्रश्च । जडानामिति लडयोरभेदः ॥

अधिकचपलभावानाक्रमादात्मपीडा-
मनवधि विदधानान् हन्त दृष्ट्वा जलौघान् ।
शरदृतुसमयेन क्षीणतां नीयमानान्
परमतनुत हासं पद्मिनीनां समूहः ॥ ८० ॥

मधुरमधुरमाध्वीपूरकुक्षिंभरीणां
मधुकरयुवतीनां मञ्जुना झंकृतेन ।
उरुतरजलमध्यादुत्थिता मन्दमन्दं
व्यधुरिव कुतुकेन व्यावहारीं नळिन्यः ॥ ८१ ॥

कळकळकपटेन स्वैरमाधाव्य भृङ्गै-
रनुपदमथ चौरंकारमादश्यमानः ।
वनभुवि मुहुरन्तर्धित्सयेवाशु कुञ्जे
सरसिजमधुहारी बंभ्रमीति स्म वातः ॥ ८२ ॥

दिशि दिशि कळभृङ्गीनादसंगीतभङ्गी-
शिथिलितमदिराक्षीमौनमुद्रा विचेरुः ।
नवनळिनवनाळीधूतनाळीककेळी-
परिमिळितमधूळीबिन्दवो मन्दवाताः ॥ ८३ ॥

---

(८१) व्यावहारी = मिथो व्यवहारः । "कर्मव्यतिहारे णच् स्त्रिया"-मिति णच् ॥ (८२) चौरङ्कारमादश्यमानः = चोरस्त्वमसीति निर्भत्स्य दश्यमानः । "कर्मण्याक्रोशे कृञः खमुञि"ति खमुञ् । बम्भ्रमीतीति यङ्लुकि । चौरङ्कारमाक्रुश्यमान इति पाठान्तरम् ॥

तदनु निबिडनीहाराळिनीशारिताशा
स्तबकितनवकुन्दं तन्वती काननान्तम् ।
श्रियमलभत वेला हैमनी कामिनीनां
स्तनतटभवदूष्मोद्रेकसाफल्यदात्री ॥ ८४ ॥

प्रसभमथ हिमौघैः प्रोद्धतैर्बाध्यमानाः
परिभवितुमशक्यैः पद्मिनीर्वीक्षमाणः ।
मुहुरिव गुरुशोकग्लानिमान् भानुमाली
निरवधिरुचिसीमा मन्दधामा बभूव ॥ ८५ ॥

कुचसरसिजयुग्मं कुङ्कुमालेपकान्तं
कुवलयनयनानां कोष्णमालिङ्ग्य गाढम् ।
रचितरुचिरशय्या रम्यहर्म्याधिरूढा
रजनिषु सविलासं रेमिरे कामिलोकाः ॥ ८६ ॥

शिशिरतुहिनपाथश्शीकरक्षारपाता-
न्नलिनवनसमूहे नाळशेषे द्विरेफाः ।
रुरुदुरिव जलान्ते संभ्रमन्तः समन्ता-
ज्जगति विगतवृत्तेः कस्य न स्याद्विषादः ॥ ८७ ॥

---

(८४) हैमनी वेला = हेमन्तकालः । "सर्वत्राण् च तलोपश्चे"ति त-लोपाणौ ॥ (८७) तुहिनपाथो हिमजलम् ॥

मनसि मनसिजाग्निं दीपयन्मानिनीनां
सरसि सरसि कुर्वन्नातलं शीतभावम् ।
तरळविरळतूलाकारनीहारपूरः
पथिकमथनकालो माघकालोऽथ रेजे ॥ ८८ ॥

ककुभि ककुभि जापं जापमासङ्गिभृङ्ग-
ध्वनिभिरिव वितीर्णैः प्रोद्धतैर्लोध्रचूर्णैः ।
युवतिकलहरोगं मोघयन्माघजन्मा
व्यतनुत कुसुमेषोर्बन्धुतां गन्धवाहः ॥ ८९ ॥

इति प्रौढिं यान्ती मदनशिखिनाडिन्धममरुद्
द्विरेफाळीकेळीकळरणितवाचालविपिना ।
ऋतूनां सामग्री वनभुवि विलासार्थमचिरा-
दमन्दं मौकुन्दे मनसि जनयामास कुतुकम् ॥ ९० ॥

इति शङ्करकविकृते श्रीकृष्णविजये
पञ्चमः सर्गः ।

---

(८८) पथिकानां मथने कालोऽन्तकः ॥ (८९) ककुभि ककुभि = दिशि दिशि । जापं जापम् = पुनः पुनर्जप्त्वा । गन्धवाहे मान्त्रिकत्वारोपः प्रतीयते ॥

षष्ठः सर्गः ।

आलम्बहेतुमथ मन्मथविक्रमाणां
लोलम्बकम्बळितकोमळपुष्पपूर्णम् ।
श्रीमन्तमेष विपिनान्तमगान्मुकुन्दः
सीमन्तिनीकरगृहीतकरारविन्दः ॥ १ ॥

दामोदरीयकरपल्लवसंगमेन
कामातुरीकृतधियां कमनीजनानाम् ।
विस्रस्तनीवि विगळत्कचबन्धमुद्यद्-
घर्मोदबिन्दु घनकण्टकमङ्गमासीत् ॥ २ ॥

मन्दप्रचारनिरतो विपिनान्तराळे
नन्दप्रसूतिररविन्दविलोचनानाम ।
इन्दुप्रकाशशिशिरैरपि मन्दहासैः
कन्दर्पवह्निमधिकं ज्वलयांचकार ॥ ३ ॥

---

(३) नन्दप्रसूतिः = नन्दसूनुः ॥

स्त्रीणां प्रयातुमलसं विलसन्नितम्ब-
श्रोणीभरेण गुरुणा चरणारविन्दम् ।
शिञ्जाननूपुरझणत्कृतिकैतवेन
संजातखेदमिव रोदनमाततान ॥ ४ ॥

आसां प्रवाळमसृणौ चरणौ धरण्या-
मासीदतां न खलु खेदमितीव मत्वा ।
वृक्षान्विधूय सरणौ हरिणेक्षणानां
चिक्षेप चारु कुसुमास्तरणं समीरः ॥ ५ ॥

संजल्पितेन सरसेन मनोहरेण
मञ्जुस्मितेन तरळीकृतवल्लवीकः ।
कुञ्जस्थलीषु मकरन्दझरीविहार-
गुञ्जद्द्विरेफनिकरासु चचार शौरिः ॥ ६ ॥

स्पृष्टास्तदा वनलताः कुसुमानि हर्तुं
नारीजनेन निजभूषणतां गतानि ।
आलोलपल्लवकरा इव रोदमापु-
र्भृङ्गस्वनेन विगळन्मकरन्दबाष्पाः ॥ ७ ॥

भङ्गे लताकिसलयस्य रुषेव तूर्ण-
मारुण्यमाप करपल्लवमङ्गनानाम् ।

---

(८) भङ्गे = विदलने, पराभवे च ॥

म्लानिं ययौ तदपि हन्त शुचेव को वा
नैवावसीदति मृदुः परिभूयमानः ॥ ८ ॥

कान्ताजनैः स्वयमुपेत्य कराम्बुजेन
स्पृष्टा रसेन तरुणा इव रागपूर्णाः ।
स्वाधीनतामुपययुर्नतिमाप्नुवन्त-
श्चापल्यमेत्य तरसैव नवाः प्रवाळाः ॥ ९ ॥

काचिद् द्विरेफनिकरे मुखरे वहन्ती
कम्पं भयेन गुरुणा हरिणायताक्षी ।
आमुक्तपुष्पततिराशु पयोरुहाक्ष-
मामिश्रघर्मकुचमण्डलमालिलिङ्ग ॥ १० ॥

लोलीचकार वलयं शिथिलीचकार
नीवीं नितम्बनिकटं प्रकटीचकार ।
प्रौढीचकार पुळकं चुलुकीचकार
धैर्योदयं तरुणवत् सुदृशां द्विरेफः ॥ ११ ॥

ताम्यन्मुखी विटपमुत्कुसुमं कथञ्चि-
त्तन्वी घनस्तनभरा नमयांचकार ।
उन्माष्टुंकाम इव घर्मकणान् क्षणेन
पस्पर्श पल्लवकरेण स तन्मुखेन्दुम् ॥ १२ ॥

कुञ्जान्तरे कुरवकाः कुचमण्डलेन
नारीजनस्य नवयौवनमांसळेन ।
संपर्कमेत्य तरसा विकसत्प्रसून-
संपन्निभेषेण जहसुस्तरुबृन्दमन्यत् ॥ १३ ॥

कंचिन्निकुञ्जमुपगम्य निगूढमेव
संचुम्बति प्रियतमावदनं मुकुन्दे ।
किंचिन्न दृश्यमनयेदमितीव बाष्पैः
संछन्नमाशु नयनाम्बुजमन्यनार्याः ॥ १४ ॥

कान्तारयानघनघर्मकणाङ्कुराभि-
स्तान्तारविन्दतरळायतलोचनाभिः ।
क्लान्ताभिरातपबलेन समं मुकुन्दः
कान्ताभिराप यमुनातटकाननान्तम् ॥ १५ ॥

हारिण्यतीव मृदुले हरिणेक्षणाना-
मारण्यमार्गगमनादवशे शरीरे ।
तारुण्यपूर्णकुसुमा मकरन्दपूरान्
कारुण्यवन्त इव शाखिगणा व्यमुञ्चन् ॥ १६ ॥

---

(१३) वनिताङ्गसङ्गात्कुरवके पुष्पोत्पत्तिः कविसमयसिद्धा ॥
(१६) तारुण्यपूर्णकुसुमाः = अम्लानपुष्पशालिनः ॥

आरभ्य षट्पदरवैर्जयशब्दमुच्चैः
सौरभ्यशालि विकिरन् नवपुष्पजालम् ।
सानन्दबाष्प इव तोयकणैर्मुकुन्द-
मेनं कलिन्दतनयापवनः सिषेवे ॥ १७ ॥

मन्दानिलाचालितनूतनचूतवल्ली-
मन्दारकेसरकदम्बसुगन्धपूर्णे ।
तीरे पुराणपुरुषस्तरुषण्डरुद्ध-
चण्डातपे स निषसाद कलिन्दजायाः ॥ १८ ॥

आलोलदुल्लसितफुल्लसितारविन्द-
जालोपमां तरळतुङ्गतरङ्गलनिाम् ।
लीलायितं विदधतीं कळहंसमाला-
मालोकयन् स मुमुदे जगदेकनाथः ॥ १९ ॥

कूलस्थलीषु चरतां कुतुकातिरेकात
कम्रं विलोक्य गमनं कमनजिनानाम् ।
आधावति स्म पुळिनात् कळहंसमाला
लज्जाभरेण नियतं न हि साध्वसेन ॥ २० ॥

त्रस्तासु तासु तरुणीषु सफेनहासा
हस्तावलम्बमिव सूर्यसुता विधातुम् ।

हंसस्वनेन दधती मधुरानुलापं
दीर्घीचकार तटसीम्नि तरङ्गबाहुम् ॥ २१ ॥

काचित् करेण हरिणा यमुनाम्बुपूरे
भीता कथंचन शनैरवगाह्यमाना ।
मीनप्रचारचकिता किल गाढलग्न-
पीनस्तनी तदुरसि स्फुटमाललम्बे ॥ २२ ॥

अन्या विलोलनयना पशुपालकन्या
भीतिं चिरेण तटसीमनि नाटयन्ती ।
बाहूपपीडममुना परिगृह्य नीता
शीतालुराशु सलिलं कमलेक्षणेन ॥ २३ ॥

श्रोणीपयोधरनितम्बभरातिरेक-
मेणीदृशां झटिति वोढुमशक्नुवानः ।
फेनं वमन्नधिकमाकुलवीचिबाहु-
र्नूनं ननाद चलितो यमुनाप्रवाहः ॥ २४ ॥

उन्मिश्रनादतरलोर्मि तमालनील-
मुन्मग्नमग्नरमणीरमणीयमम्भः ।

---

(२३) बाहूपपीडम्=बाह्वोरुपपीड्य । "सप्तम्यां चोपपीडरुधकर्षः" इति णमुल् ॥ (२४) शक्नुवान इति चानशि रूपम् ॥

गम्भीरघोषघनमण्डलकम्पमान-
शम्पाकुलं गगनबिम्बमिवाबभासे ॥ २५ ॥

सत्पात्रतामुपगतोऽप्यतिनिर्मलोऽपि
गम्भीरभावनिलयोऽपि जनैर्नुतोऽपि ।
स्त्रीसंगमेन चपलोऽजनि वारिपूर-
श्चित्रं कमेव चलयन्ति न चञ्चलाक्ष्यः ॥ २६ ॥

मुक्तानि यानि हरिणा करकुग्मळेन
मुग्धासु तासु यमुनासलिलानि तानि ।
नीलान्यपि स्फुटमकुर्वत रागमासां
शीतान्यपि स्मरहुताशमदीपयन्त ॥ २७ ॥

नीलं निसर्गतरळं नितरां विशालं
स्वच्छान्तरं सुक्तातिभिः सुलभावलोकम् ।
पर्याकुलं पय इवाशु कळिन्दजायाः
कालुष्यमाप नयनं कमलेक्षणानाम् ॥ २८ ॥

सावर्ण्यभाञ्जि यमुनापयसा रुषेव
निर्वासितानि वनितानयनाञ्जनानि ।

---

(२६) सत्पात्रता = विद्यमानयानपात्रता । योग्यता च ॥
(२७) विषमालङ्कारः ॥

आयाति वेगवति वैरिणि जायते हि
भूयानहो परिभवश्चपलाश्रयाणाम् ॥ २९ ॥

गोपाङ्गनाजनसहस्रसमक्षमेव
संपर्कमेत्य यमुना नळिनेक्षणेन ।
कम्पाकुला तटविलङ्घनकैतवेन
सापत्नपेव विपिनान्तमियेष गन्तुम् ॥ ३० ॥

संक्रीडमानकमनीकुचकुङ्कुमौघ-
संकीर्णपाथसि विहृत्य कळिन्दजायाः ।
संफुल्लवक्त्रनळिनः सह कामिनीभिः
संप्राप तीरसरणिं सरसीरुहाक्षः ॥ ३१ ॥

आरब्धतीरगमनेषु वधूजनेषु
स्वैरं विहृत्य यमुना विरहेण खिन्ना ।
वेगात् कृतानुगमना निरुरुत्सयेव
वीचीकरेण जगृहे चरणाम्बुजानि ॥ ३२ ॥

दुर्लङ्घदीर्घवियदङ्कणलङ्घनेन
विश्रम्य किञ्चिदिव गन्तुमनास्तदानीम् ।

---

(३१) संक्रीडमान इति "क्रीडोऽनुसंपरिभ्यश्च" त्यात्मनेपदम् ॥
(३२) निरोद्धुमिच्छा निरुरुत्सा ॥

प्रक्षीणपादपटिमा स्फुटमन्दकान्ति-
रस्ताद्रिमस्तकमलंकुरुते स्म भानुः ॥ ३३ ॥

चण्डेतरांशु चरमाचलचूडचुम्बि
तन्द्रीप्रदानपटु तामरसाकराणाम् ।
पर्यायतः परिपचेलिमडाडिमश्री-
पाण्डित्यतस्करमहस्करबिम्बमासीत् ॥ ३४ ॥

प्राचीमवाप्य नितरामनुरागशाली
पूर्वं शठोऽयमधुना पुनरागतो माम् ।
एवं विचिन्त्य रुषितेव परं प्रतीची
भानौ समीपमुषि शोणमुखी बभूव ॥ ३५ ॥

पाश्चात्यदिङ्मुखविसर्पिणि मन्दमन्दं
पाटल्यडम्भपरिपन्थिनि पल्लवानाम् ।
मार्ताण्डधाम्नि मसृणे धृतलोहितिम्नि
माञ्जिष्ठमम्बरमिवाम्बरमाबभासे ॥ ३६ ॥

---

(३३) पटिमा = पटुत्वम् ॥ (३५) रुषिता। "रुष्यमत्वर" इति वेट् ॥

(३६) माञ्जिष्ठमम्बरम् = मञ्जिष्ठया रञ्जितं वसनम् । 'तेन रक्तं रागादि'' त्यण् ॥

बद्धे दृढं झटिति पत्रपुटीकपाटे
पद्माकरेण पथिका इव षट्पदौघाः ।
संतर्ज्य तं प्रकटझंकृतिकैतवेन
संभूय कैरवगृहं विविशुः प्रसन्नाः ॥ ३७ ॥

सन्ध्यानले तपनमण्डलहेमपिण्डं
संतापयन्नथ दिनान्तसुवर्णकारः ।
ऊर्ध्वांशुविष्फुरदुदङ्कगृहीतमब्धौ
चिक्षेप तावदुदगामि तमिस्रधूमैः ॥ ३८ ॥

उद्दण्डदर्पमुदजृम्भितरामुलूकैः
कोकैश्च शोकजलधौ विधुरीबभूवे ।
व्यामिश्रमेव भवतीह सुखं च दुःखं
सामग्र्यमस्ति खलु कस्य सुखस्य जन्तोः ॥ ३९ ॥

भानोर्मरीचिघुसृणच्छुरणात् प्रतीचीं
शोणायितच्छविपयोधरशोभमानाम् ।
प्राची सखेदमिव वीक्ष्य तमःकदम्ब-
नीलांशुकेन मुखमावृणुते स्म मन्दम् ॥ ४० ॥

---

(३८) उदङ्कः उद्धरणी ॥ (४०) घुसृणम् = कुङ्कुमम् ॥

कामानले निहितवान् किमु चण्डधामा
रामाजनस्य निजरश्मिसहस्रदीप्तिम् ।
सीमादरिद्रमगमत् कथमन्यथासौ
भूमानमुज्झति दृशोः पदवीं पतङ्गे ॥ ४१ ॥

क्षोणीतलं च निखिलं गगनान्तरं च
श्रेणीं तथैव ककुभामपि सान्ध्यकान्तिः ।
शोणीचकार तरसा विरहातुराणा-
मेणीदृशां तु वदनं मलिनीचकार ॥ ४२ ॥

अस्तं गतस्य तरणेः किरणैः सुमेरो-
राधाव्यमान इव तत्क्षणमन्यभागात् ।
वेगादुपेत्य वियदन्तरमन्धकारः
काळायकान्तिरखिलं कबळीचकार ॥ ४३ ॥

नव्यां किमञ्जनततिं नयनार्तिहेतुं
कस्तूरिकापटलिकां किमु गन्धशून्याम् ।
आहोस्विदम्बुदकदम्बमपेतवर्षं
वेधास्तमिस्रकपटात् प्रकटीचकार ॥ ४४ ॥

---

(४१) असौ = कामानलः । सीमादरिद्रं भूमानम् = अतिबाहुल्यम् ॥
(४३) काळायकान्तिः = काळायसद्युतिः । कळायकुसुमद्युतिरिति वा ॥

वृद्धिं तमस्युपगते विगतप्रसादं
विस्रस्तरागमभवद्वियदन्तरालम् ।
चित्रं तदैव हृदयं त्वधिकं प्रसन्न-
मत्यन्तरक्तमपि कामिजनस्य जज्ञे ॥ ४५ ॥

कान्ता रुचिस्तदनु काचन लोचनाना-
मानन्दिनी कुमुदमण्डलभाग्यसीमा ।
स्वैरं भ्रमत्सु दधती तिमिरेषु वैरं
पौरन्दरीहरिदुपान्तमलंचकार ॥ ४६ ॥

अङ्गारराशिरिव पान्थविलोचनानां
कौसुम्भमम्बरमिवेन्द्रदिगङ्गनायाः ।
और्वानलार्चिरिव गाढतमःपयोधे-
श्चारुप्रभा तदनु चान्द्रमसी चकाशे ॥ ४७ ॥

रात्रीविभूषणमणिः स्मरवीर्यसार-
सर्वस्ववस्तु भगवान् कुमुदैकबन्धुः ।
नेत्रोत्सवस्त्रिभुवनस्य चकोरबृन्द-
प्राणावलम्बपरमौषधमाविरासीत् ॥ ४८ ॥

---

(४६) पौरन्दरीहरिदिति "वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे" इति पुंवद्भावप्रतिषेधः ॥ (४७) और्वानलो बडवाग्निः ॥

उत्क्षिप्य पादमतिनिर्मलशोभमान-
नक्षत्रमालमयुगायुधबान्धवार्थी ।
जेतुं जगन्ति शिशिरद्युतिरन्तरिक्ष-
मातङ्गनाथमधिकोन्नतमारुरोह

स्थूलंभविष्णुषु करेषु तुषारभानो-
र्लोलं मनश्चलदृशां शिथिलीबभूव ।
चित्रीयते किमिह यत् कठिनत्वसीमा
पाषाणसंहतिरपि द्रवतां प्रपेदे ॥ ५० ॥

प्राचीमुखं सपदि चुम्बति शीतभानौ
तत्सङ्गमं कुमुदिनी प्रतिपालयन्ती ।
लोलम्बपुञ्जरुचिकालिमकैतवेन
मालिन्यभारमिव शोकवशात् प्रपेदे ॥ ५१ ॥

श्यामापटीरतिलकं हरिनीलनील-
व्योमान्तरालकमलाकरफेनपिण्डम् ।
लोकेन नेत्रघनसाररजःकदम्बं
बिम्बं विलोक्य मुमुदे कुमुदैकबन्धोः ॥ ५२ ॥

---

(४९) अयुगायुधबान्धवम् = कामसाहाय्यम् ॥ (५२) श्यामा = रात्रिः । यौवनवतीति च गम्यते । व्योमान्तरालमकराकर इति वा पठः । घनसारः = कर्पूरम् ॥

पङ्केरुहं च तिमिरं कलहं च यूनां
संकोचयन्युगपदेव तुषारभानुः ।
कान्ताजनं रमयितुं कमलेक्षणस्य
कौतूहलं मनसि कन्दळयांचकार ॥ ५३ ॥

आकृष्टलोकमनसा घनसारभासा
नैशाकरेण महसा शिशिरीकृताशे ।
आमोदिमन्दपवने यमुनातटान्ते
दामोदरेण मुरळी मुखरीकृतासीत् ॥ ५४ ॥

तस्मिन् क्षणे तरळिता मुरळीनिनादैः
स्वस्मिन् गृहे पतिजने च परं निराशाः ।
स्वाभाविकप्रणयपाशविकृष्यमाणा
गोपाङ्गनास्तपनजासविधं समीयुः ॥ ५५ ॥

विस्रंसमानचिकुरा विगळद्दुकूला
वल्गद्घनस्तनभरा वलमानपार्श्वाः ।
प्रापुः सरोजनयनाः प्रणयप्रणुन्नाः
पुण्यातिरेकसुगमं पुरुषं पुराणम् ॥ ५६ ॥

निश्वासनृत्यदळकाः पुळकप्रपञ्च-
संछाद्यमानवपुषः सरसीरुहाक्ष्यः ।

किञ्चित् क्षणं कमलनेत्रमवेक्ष्य किञ्चि-
न्नाज्ञासिषुः स्फुटमनुष्ठितमन्मथाज्ञाः ॥ ५७ ॥

रोमाञ्चितान्निपतितं कुचकुड्मलान्तात्
क्षौमाञ्चलं च गलितां ललितां च काञ्चीम् ।
वासस्तथैव शिथिलं पृथुलान्नितम्बात्
कामातुरा न विविदुः कमलायताक्ष्यः ॥ ५८ ॥

चाटूक्तिभिश्च सुतरां चतुरैर्विलासैः
प्रेयानिव प्रकटयन् प्रणयातिरेकम् ।
रामाजनं स रमयन् सुभगत्वदर्पं
तासां व्यपोहितुमनास्तरसा तिरोऽधात् ॥ ५९ ॥

तावन्नदीपरिसरेषु वनेषु गायं
गायं विषादभरिताश्चरितानि शौरेः ।
गोप्यो विलप्य बहुधा पुनरप्यदृष्ट्वा
चक्रन्दुरम्बुरुहलोचनमात्तमोहाः ॥ ६० ॥

कृष्णैकसक्तमनसो विपिने चरन्त्य-
स्तास्ता जगत्त्रयपतेरनुकृत्य लीलाः ।
संदर्शनाय सरसीरुहलोचनस्य
गीतिं वितेनुरबला यमुनातटान्ते ॥ ६१ ॥

अस्माननन्यशरणास्त्वमुपेक्षसे किं
पद्मायताक्ष, तव पादपरागदासीः ।
वात्सल्यमाश्रितजने तव कुत्र यातं
गीतो जनैर्ननु भवान् करुणाम्बुराशिः ॥ ६२ ॥

यामः कमेव शरणं पुनरम्बुजाक्ष,
दीना वयं विकरुणस्त्वमुपेक्षसे चेत् ।
जैवातृकादिह विना जगदीश को वा
जीवातुभावमुपयातु कुमुद्वतीनाम् ॥ ६३ ॥

भर्तॄन् विहाय भगवन् भवनं च बन्धून्
वर्तामहे तव विलासविधूतधैर्याः ।
जानासि नैव किमिदं कमलायताक्ष,
साक्षी समस्तजगतामखिलान्तरात्मा ॥ ६४ ॥

मन्दं गतं च मधुबिन्दुमयी च वाणी
मञ्जु स्मितं च मधुरं च विलोकनं ते ।
संचिन्त्यमानमिदमम्बुजनेत्र, सर्वं
चण्डानिलत्वमुपयाति मनोभवाग्नेः ॥ ६५ ॥

---

(६२) पादसरोजदासीरिति पाठान्तरम् ॥ (६३) जैवातृकश्चन्द्रः । जीवातुर्जीवनौषधम् ॥

हा हन्त हन्त मुहुरर्पितकल्पवह्नि-
दाहं तनोति भगवन्, विरहाग्निरेषः ।
कस्माद्विलम्बनमुपैति कटाक्षमेघः
कारुण्यवारिलहरीपरिपूरितस्ते ॥ ६६ ॥

उत्फुल्ललोचनमुदञ्चितमञ्जुहास-
मुन्निद्रगण्डतलमुद्यदपाङ्गलीलम् ।
मुग्धं प्रकाशय मुकुन्द, भवन्मुखेन्दु-
माश्वासमेतु हृदयं क्षणमस्मदीयम् ॥ ६७ ॥

एवं विलप्य पतिता विरहाग्निमध्ये
मुग्धा हरिण्य इव तावदरण्यवह्नौ ।
बाष्पाम्बुनिर्झरतरङ्गनिमज्जमान-
वक्त्राम्बुजा रुरुदुरेव विमुक्तकण्ठम् ॥ ६८ ॥

तिग्मत्विषेव कुसुमायुधपावकेन
म्लानीकृताः कुमुदिनीरिव गोपकन्याः ।
नीहारभानुरिव नन्दयितुं कृपावा-
नाविर्बभूव भगवानरविन्दनाभः ॥ ६९ ॥

वर्धिष्णुना विरहचण्डसमीरणेन
सन्धुक्षिते निपतिता गुरुशोकवह्नौ ।
आकृष्य गोपललनाः स कटाक्षपाशै-
रानन्दवारिधिमवापितवान्मुकुन्दः ॥ ७० ॥

मुक्तारजोधवळचन्द्रमरीचिधौते
विस्तारशालिनि तटे तपनात्मजायाः ।
रामाजनेन सह रागभराकुलेन
रामानुजो व्यधित रासविलासकाङ्क्षाम् ॥ ७१ ॥

मुग्धाजनस्य परिमण्डलितस्य मध्ये
मध्ये मनोहरविलासमनेकरूपी ।
संसक्तबाहुरुभयोरुभयोस्तरुण्यो-
रंसस्थले विहरणं स चकार शौरिः ॥ ७२ ॥

तानप्रदानलयताळविमिश्रमञ्जु-
गानप्रयोगतरळीकृतविश्वलोकाः ।
पीनस्तनद्वयनता ननृतुर्मृगाक्ष्यो
मीनध्वजप्रहरणक्षणभिन्नधैर्याः ॥ ७३ ॥

वाचालमञ्जुमणिनूपुरपादपद्म-
न्यासैर्घनस्तननितम्बभरेण मन्दैः ।
भ्रूभङ्गिभिर्भुजविधूतिभिराबभासे
मन्दस्मितैश्च मधुरैर्मदिरेक्षणाभैः ॥ ७४ ॥

अंसस्थलीनिहितबाहुलतस्य तस्य
पुंसः स्थितस्य वचसां मनसां च दूरे ।

---

(७४) आबभासे भावे लिट् ॥

माधुर्यमङ्गलगृहैर्नयनप्रचारै-
वैधुर्यमेत्य वनिता न किमप्यजानन् ॥ ७५ ॥

सन्नं बभूव मृदुबाहुलतामृणाळं
खिन्नं क्रमेण वदनं सदनं रुचीनाम् ।
उन्नम्रमांसळनितम्बभरेण नुन्नं
खिन्नं क्षणेन चरणं तरुणीजनानाम् ॥ ७६ ॥

एवं विधाय भगवानथ रासगोष्ठी-
मानन्दयन् सुरजनानरविन्दनेत्रः ।
यावद्वधूजनमुपात्तवपुर्बभूव
संमोदनाय सरसीरुहलोचनानाम् ॥ ७७ ॥

कल्हारमारुतकिशोरकपूरिताशे
कन्दर्पवन्दिकळझंकृतभृङ्गसंघे ।
हारोपमेन्दुरुचिशीतळिते स रेमे
तीरोपकण्ठविपिने तपनात्मजायाः ॥ ७८ ॥

भामिनीस्तपनजातटभूमौ कामिनीः स रमयन्ननुरक्ताः ।
यामिनीशरुचिसङ्गमरम्या यामिनीरिति निनाय मुकुन्दः॥७९॥

इति शङ्करकविकृते श्रीकृष्णविजये

षष्ठः सर्गः ।

सप्तमः सर्गः ।

अथ नन्दादयो गोपाः प्रमोदपरतन्त्रिताः ।
अम्बिकापतिपूजार्थमम्बिकावनमाययुः ॥ १ ॥
ते च स्नात्वा सरस्वत्यां चूडालं शशिलेखया ।
तेजोविशेषमानर्चुरङ्गार्द्धेन कळत्रिणम् ॥ २ ॥

इन्दुशेखरभक्तास्ते नन्दगोपपुरस्सराः ।
वन्दनीयान् महीदेवान् नन्दयांचक्रिरे धनैः ॥ ३ ॥
अधिरात्रि शयानेषु गोपेषु तटिनीतटे ।
अग्रासि नन्दगोपोऽसौ दन्दशूकेन केनचित् ॥ ४ ॥

नन्दे भुजङ्गमग्रस्ते खिन्दाना गोपमण्डली ।
सत्वरं ग्रस्यमानाभूत् साध्वसेन गरीयसा ॥ ५ ॥
नन्दं तं विह्वलं वीक्ष्य क्रन्दन्तं शार्ङ्गधन्वना ।
पादपल्लवसंस्पर्शात्पातितोऽभूत् स पन्नगः ॥ ६ ॥

तदैव दिव्यरूपोऽसौ परिपृष्टोऽथ शार्ङ्गिणा ।
युगळीं मुकुळीकृत्य करयोर्मूर्ध्न्यभाषत ॥ ७ ॥

नमस्करोति दासोऽयं जनस्ते जगदीश्वर ।
असुरेन्द्रपुरस्त्रीणां कण्ठालङ्करणद्रुहे ॥ ८ ॥

त्वन्माहात्म्यपथं यान्ती वैधसी सापि वैखरी ।
प्रयात्येव पयोजाक्ष पङ्गुतामपटीयसी ॥ ९ ॥

इयत्तया दरिद्राणं रूपमीदृक्तया च ते ।
गोचरीकुर्वतां वाचः कथंकारं मनांसि च ॥ १० ॥

विद्याधरोऽहं वंशेन स्वामिन् नाम्ना सुदर्शनः ।
परिपाकेन पुण्यानां नीतस्त्वत्पादसन्निधिम् ॥ ११ ॥

मद्र्वनाम्ना व्याधेन मुनिशापाख्यपञ्जरे ।
यन्त्रितः शुकवत् स्वामिन्मुक्तोऽहं त्वत्कृपाबलात् ॥ १२ ॥

इत्यादि बहुधा स्तुत्वा भक्त्या नत्वा सुदर्शनः ।
स्मारं स्मारं ययौ शौरिं स्वैरं पौरन्दरीं पुरीम् ॥ १३ ॥

काश्मीरमञ्जरीशोणं रत्नच्छत्रमिवाम्बुधेः ।
बिम्बमम्बुजिनीबन्धोर्लम्बे तावदम्बरात् ॥ १४ ॥

ततश्चुचुम्बे चन्द्रेण पौलस्त्यगिरिमस्तकम् ।
मान्मथोपनिषन्मार्गव्याक्रियापारदृश्वना ॥ १५ ॥

चञ्चूपुटे चकोरीणां लिम्पन् पीयूषभेषजम् ।

---

(८) "स्वयम्भुवे नमस्कृत्य" इतिवन्नमस्करोति ते इति प्रयोगः ॥
(९) वैधसी वैखरी = वेदवाक् ॥

मानग्रहमहारोगं चिकित्सामास चन्द्रमाः ॥ १६ ॥
धाव्यमान इवाशान्तादैन्दवीभिर्मरीचिभिः ।
तापो विरहिणीचेतोदुर्गं प्राप्य व्यतिष्ठत ॥ १७ ॥
निमग्ना इव दुग्धाब्धौ गङ्गयालिङ्गिता इव ।
सुधाभिरिव चालिप्ता रेजुश्चान्द्रिकया दिशः ॥ १८ ॥
कल्हाराकरसंश्लेषकषायमृदुमारुते ।
चिक्रीड चक्री हलिना कानने मानिनीसखः ॥ १९ ॥
कालयांचक्रिरे गोप्यो लीलया तरळीकृताः ।
यक्षेण शंखचूडेन तत्क्षणं पक्ष्मळेक्षणाः ॥ २० ॥
तेनालोक्यानुधावन्तौ बलभद्रबलिद्विषौ ।
विमुच्य कामिनीलोकमहंकारं च दुद्रुवे ॥ २१ ॥
जिजीवषन्तं धावन्तमन्वधावत्स माधवः ।
अतिक्षीणाः सरोजाक्षीररक्षीन्मुसलायुधः ॥ २२ ॥
गोपीनां साध्वसं तस्य मूर्धानमपि धावतः ।
जहार दीप्रं तत्रत्यं मणिं च मधुसूदनः ॥ २३ ॥
अळकां गन्तुमुद्युक्ते नीतेऽस्मिन्नान्तकीं पुरीम् ।
प्रददे बलदेवाय मणिरेष मधुद्विषा ॥ २४ ॥
अथ गोष्ठमरिष्टाख्यो भोजराजवशंवदः ।

---

(२०) कालयांचक्रिरे = नीताः ॥

अगच्छदुररीकृत्य दैत्यः काकुद्मतीं तनुम् ॥ २५ ॥

नेत्रान्धंकरणीं पांसुपङ्क्तिं मांसळयन् दिशि ।
द्रुमानुन्मूलयांचक्रे चित्रं तद्वालमारुतः ॥ २६ ॥

रुरुत्सतीव मार्ताण्डं विन्ध्यशृङ्गविशङ्कटे ।
तस्य प्रौढककुत्कूटे ललम्बे मेघमण्डली ॥ २७ ॥

जजृम्भे दिक्षु गम्भीरो निर्घोषस्तस्य भीषणः ।
प्राणप्रयाणसन्नाहदुन्दुभेरिव निस्वनः ॥ २८ ॥

युगळी शृङ्गयोस्तस्य नभःप्राङ्कणजाङ्घिकी ।
चकर्ष लोलतूलाळीविभ्रमामभ्रमालिकाम् ॥ २९ ॥

मांसळध्वनितप्रौढितस्करस्तत्खुरध्वनिः ।
दिशो वाचालयामास श्रवणानामरुन्तुदः ॥ ३० ॥

प्रापुः श्रोत्राणि नेत्राणि हृदयानि व्रजौकसाम् ।
तन्निर्घोषेण तद्धूळ्या तद्भियान्धंभविष्णुताम् ॥ ३१ ॥

वल्गद्वत्सो वलद्धेनुश्चलत्पांसुपरम्परः ।
तन्मध्ये ददृशे गोपैः कोऽपि शाक्करशेखरः ॥ ३२ ॥

अक्षीणबलमुक्षाणं दुर्निरीक्ष्यं निरीक्ष्य तम् ।
शौरिं शरणयांचक्रुर्व्याकुला गोकुलौकसः ॥ ३३ ॥

---

(२५) काकुद्मती तनुः = वृषभरूपम् ॥ (३२) शाक्करशेखरः = महोक्षः ॥

आस्फोट्य कैटभद्वेष्टा स्फुटं कपटशाकरन् ।
शृङ्गोपपीडं पाणिभ्यां पद्भ्यामभ्याजघान तम् ॥ ३४ ॥
अधोक्षजपदाघातैर्महोक्षोऽसौ निपातितः ।
आसीत् कातान्तनगरीमार्गपान्थधुरन्धरः ॥ ३५ ॥
महर्षभे हते तस्मिन् महर्षिः कलहप्रियः ।
बीजभूतो विरोधानां भोजराजमभाषत ॥ ३६ ॥
विचित्रं वसुदेवस्य महत्कपटपाटवम् ।
त्वया किमपि नाज्ञायि यदुराजशिखामणे ! ॥ ३७ ॥
ऋजुरेव भवद्बुद्धिरहो भोजमहीपते ! ।
कुटिलेषु तु कौटिल्यपरिभाषा पटीयसी ॥ ३८ ॥
भवित्री प्राणसंहर्त्री संततिः स्वसुरष्टमी ।
इत्थं वार्ता पुरैव त्वत्कर्णमार्गमगाऽत ॥ ३९ ॥
वसुदेवसुते जाते त्वत्प्राणपरिपन्थिनि ।
विनिमायामुना गेहं निन्ये नन्दकुमारिका ॥ ४० ॥
गोकुले रौहिणेयं च न्यक्षिपत्त्वद्भयादसौ ।
खेलन्तौ धृतहेलं तौ ववृधाते शनैः शनैः ॥ ४१ ॥
भवता दनुजन्मानो नियुज्यन्ते दिने दिने ।

---

(४०) विनिमया = विनिमयं कृत्वा ॥

कदाचित्तेषु यातेषु किमु कश्चिन्न्यवर्तत ॥ ४२ ॥
गता गता दितिसुता जातास्ते कीदृशा इति ।
जानात्येव तयोर्बाहुदण्डपाण्डित्यचण्डिमा ॥ ४३ ॥
वैरिभिः कैरिमौ प्राप्य जीवनाशं न नश्यते ।
कुत्र श्रुतं पतङ्गानां चित्रभानोर्निवर्तनम् ॥ ४४ ॥
त्वामपि क्रमशो जाने तद्दोर्विक्रमचातुरी ।
कारयिष्यति चैतेषामनुयात्रामहोत्सवम् ॥ ४५ ॥
त्वत्पक्षपातप्राबल्यपारतन्त्र्यं नरेन्द्र माम् ।
वाचालीकुरुते भूयो भवन्मङ्गल्यकाङ्क्षिणम् ॥ ४६ ॥
विपत्प्रतिक्रियामार्गे तज्जागृहि यथाबलम् ।
पाको विधिविलासानां परिच्छेत्तुं न पार्यते ॥ ४७ ॥
नारदस्य गिरं श्रुत्वा नीरदध्वनिसन्निभाम् ।
उत्पपाताद्रिशृङ्गाभादासनात् कंसकेसरी ॥ ४८ ॥
ततो ववल्गे खड्गेन तरसा तत्कराञ्चले ।
देवकीवसुदेवासुदेहराहित्यकाङ्क्षिणः ॥ ४९ ॥
नारदेन शमं नीतः कंसो हिंसोद्यतस्तयोः ।
महान् गारुडिकेनेव दारुणो भोगिपुङ्गवः ॥ ५० ॥

---

(४४) जीवनाशं नश्यत इति "कर्त्रोर्जीवपुरुषयोर्नशिवहो"रिति णमुल्। "कषादिषु यथाविध्यनुप्रयोगः" इति नश्यतेरनुप्रयोगः। नश्यत इति भावे ॥

गते तदनु देवर्षौ सामर्षः प्राप्य भोजराट् ।
भगिनीं वसुदेवं च यन्त्रयामास शृङ्खलैः ॥ ५१ ॥

तौ निबध्य च तत्पुत्रवधोपायं व्यचिन्तयत् ।
कालपाशं पतिष्यन्तं नाज्ञासीत् स्वगळे च सः ॥ ५२ ॥

सविमर्शं सरोषं च सखेदं च महीपतिः ।
इष्टान्मुष्टिकचाणूरमुखान्मल्लानभाषत ॥ ५३ ॥

संपत्तौ च विपत्तौ च वाहुप्राचण्ड्यचुञ्चवः ।
यूयं नः सहजप्रेमसिन्धवः प्रियबन्धवः ॥ ५४ ॥

गोपितौ वसुदेवेन स्थापितौ नन्दगोकुले ।
स्वपुत्रौ कृष्णरामाख्यौ वर्तेते किल बालकौ ॥ ५५ ॥

तयोः किल विधिश्चक्रे मत्प्राणाहृतिनैपुणम् ।
इत्थमाकस्मिकं वाक्यमश्रौषं नारदादहम् ॥ ५६ ॥

धनुर्मखे समारब्धे जाते गोपालसङ्गमे ।
तयोश्च प्राप्तिरत्रैव जाघटीति न सन्दिहे ॥ ५७ ॥

अस्मत्प्रियङ्करा यूयमित्येतत् पिष्टपेषणम् ।
तयोः स्फुटीभवत्वेव युष्मदोःस्तम्भनैपुणी ॥ ५८ ॥

हस्ती कुवलयापीडो वयं यूयं च सैनिकाः ।
सर्वं किन्नु तयोर्याति द्विरदस्नानविभ्रमम् ॥ ५९ ॥

इत्युक्त्वा पुनरक्रूरं न्ययुङ्क्तासौ महीपतिः ।
द्रुतं सरामकृष्णानां गोपानामानिनीषया ॥ ६० ॥

ततस्तुरङ्गमीभूय केशी कंसप्रियङ्करः ।
हेषया कम्पयन्नाशा भीषयामास गोकुलम् ॥ ६१ ॥

सटाभिर्वल्गतस्तस्य कशाभिरिव ताडिता ।
प्रतिनादापदेशेन चक्रन्देव नभस्थली ॥ ६२ ॥

पश्येयुश्चेदिमं गोपा नश्येयुर्नैव संशयः ।
इतीव पिदधे चक्षुस्तेषां तत्खुरजं रजः ॥ ६३ ॥

दध्वने तेन स ध्वानः कम्पयामास भूतलम् ।
स कम्पो भीतिमातेने नृणां सा मोहमावहत् ॥ ६४ ॥

दूरेऽथ पङ्कजाक्षेण चिक्षिपे स महासुरः ।
भूयोऽपि रोषाज्जघटे शौरिणा दारुणारवः ॥ ६५ ॥

भुजं निवेशयामास शौरिस्तन्मुखकन्दरे ।
हृदये तस्य चामर्षमाश्चर्यं च व्रजौकसाम् ॥ ६६ ॥

व्यथया सह दैत्यस्य जयशब्देन नाकिनाम् ।
प्रहर्षेण च गोपानां ववृधे स महान् भुजः ॥ ६७ ॥

स कंसमागमिष्यन्तं प्रत्युद्गन्तुमना इव ।
प्रागेव गमनात्तस्य स्वयं संयमिनीं ययौ ॥ ६८ ॥

तदा स केशवः केशिनाशपेशलकौशलः ।

---

(६४) एकावलिरलंकृतिः ॥

कलिप्रियेण मुनिना तुष्टुवे तुष्टचेतसा ॥ ६९ ॥

अवते भवते विश्वं शौरये दुर्जनारये ।
गोपबालाय काळायरुचये रचयेऽञ्जलिम् ॥ ७० ॥

अकस्माद्भववाग्गुम्भचूडाशेखरचातुरीम् ।
गच्छतस्तव माहात्म्यं पन्थानं लङ्घते गिराम् ॥ ७१ ॥

जीवातुरवतारस्ते यदि न स्याज्जगत्पते ।
एवंकारं कथं तिष्ठेद्धरित्रीयमभङ्गुरा ॥ ७२ ॥

एतादृशासुरध्वंसलीलालोककुतूहलम् ।
कूलङ्कषत्वमायाति नेत्रयोर्मामकीनयोः ॥ ७३ ॥

इति स्तुत्वा गते तस्मिन्महर्षौ मधुसूदनः ।
अवाप भवनं चित्तमाश्वासोऽपि व्रजौकसाम् ॥ ७४ ॥

अथाक्रूरः पुरात् कृष्णवियोगव्यसनादिव ।
निष्क्रम्य पदमातेने रथे हर्षोऽस्य मानसे ॥ ७५ ॥

प्रागेव हृदयं तस्य प्राप पङ्कजलोचनम् ।
अजनिष्ट परं गात्रमात्राधिकरणं रथः ॥ ७६ ॥

मुखेन्दोः स्मरणेनैव मुकुन्दस्य मुहुर्मुहुः ।
चित्रमुत्कूलयांचक्रे तदानन्दामृताम्बुधिः ॥ ७७ ॥

---

(६९) कलिप्रियेण मुनिना = नारदेन ॥ (७१) अकस्माद्भववाग्गुम्भः = वेदः । तच्चूडा = उपनिषदः ॥

ह्रसीयानभवत्तस्य मार्गो दीर्घोऽपि स क्षणात् ।
भक्तिर्द्राघीयसी भूयो भूयो जज्ञे जनार्दने ॥ ७८ ॥
तदानीं भगवान् भानुर्ममज्ज मकराकरे ।
सोऽपि गोपगृहान् पश्यन्नानन्दामृतसागरे ॥ ७९ ॥
तदानीं तरुणाम्भोदहरिणाङ्कसहोदरौ ।
गोपीनयनमीनौघवापीभूताङ्गकोमळौ ॥ ८० ॥
निटिलप्राङ्कणान्दोळन्मन्थराळकबन्धुरौ ।
मञ्जुस्मितप्रभापुञ्जकिञ्जल्कितमुखाम्बुजौ ॥ ८१ ॥
धेनुसन्दोहनालोककौतूहलतरङ्गितौ ।
आत्तचङ्क्रमणौ मन्दं गोष्ठप्राङ्कणसीमसु ॥ ८२ ॥
अक्रूरस्य दृशोर्मार्गे चक्रायुधहलायुधौ ।
अलंचक्रतुराद्यन्तशून्यौ मान्यौ मनीषिणाम् ॥ ८३ ॥
कराब्जं कोरकीचक्रे तस्य तद्भक्तिकौमुदी ।
मुहुर्विकासयामास चित्रं वक्त्रसरोरुहम् ॥ ८४ ॥
कंसेनैकेन यः पूर्वं कण्टकेन शुचं ययौ ।
स कण्टकसहस्रेण वृतोऽपि मुमुदे तदा ॥ ८५ ॥
अवरुह्य रथात्तूर्णमारुह्य च मनोरथम् ।

---

(७८) ह्रसीयान् = ह्रस्वतरः, द्राघीयसी = दीर्घतरा ॥
(८५) कण्टकः = शत्रुः, रोमाञ्चश्च ॥

परस्मात् परयोः पुंसोः पादमूले पपात सः ॥ ८६ ॥
सन्नमन्तं तमक्रूरमुन्नमय्योपगूह्य तौ ।
अन्वितौ नन्दगोपाद्यैर्निन्यतुर्निजमन्दिरम् ॥ ८७ ॥
आद्येन पुंसा पाद्येन मधुपर्केण चार्चितः ।
नव्येन स्वादुगव्येन सिक्तं भक्तमभुक्त सः ॥ ८८ ॥
भुक्तवन्तं परिश्रान्तिं मुक्तवन्तं रहस्यमुम ।
हेतुं तदागतेर्ज्ञातुं पप्रच्छ परमः पुमान् ॥ ८९ ॥
नारदस्य गिरा ज्ञातं वृत्तान्तं भोजभूभुजा ।
धनुर्मखमशेषं च हिंसोपायं शशंस सः ॥ ९० ॥
चापाध्वरविधिं नन्दो भूपालस्य निशम्य सः ।
सोपायनः समं गन्तुं गोपालैर्विदधे मतिम् ॥ ९१ ॥
ततो निर्गमवार्तायां श्रुतायां कृष्णरामयोः ।
व्यानशे मानसे तापः कोऽपि गोपमृगीदृशाम् ॥ ९२ ॥
गळदश्रुझरीपूरा गद्गदस्खलदक्षराः ।
खिन्ना गोपकुटुम्बिन्यो विलेपुर्विरहातुराः ॥ ९३ ॥
हा हा किमेवमस्मासु विधातस्तावकं मनः ।
मैत्रीं तनोति दम्भोलिधाराकार्कश्यमुद्रया ॥ ९४ ॥
हन्त प्राचीनपापौघपारम्पर्यविजृम्भितम् ।

---

(९४) दम्भोलिर्वज्रम्

दुःखमीदृशमित्यस्माननध्यापयति साम्प्रतम् ॥ ९५ ॥
नूनं गोपपुरन्ध्रीणां प्रणाशमिह सूचयन् ।
रामकेशवनेतासौ धूमकेतुरिवागतः । ॥ ९६ ॥
सुकृतैर्दुष्कृतैश्चास्य पुरन्ध्रीणां च मादृशाम् ।
साफल्यमपि वैफल्यं जायते हन्त चक्षुषः ॥ ९७ ॥
वञ्चिता विधिना किं वा ब्रूमहे किं च कुर्महे ।
अधन्यागणनेऽस्माभिः कनिष्ठाङ्गुलिराश्रिता ॥ ९८ ॥
वियुज्य भूयो युज्यन्ते नळिन्यश्चण्डभानुना ।
अस्मानधन्या भूयः किं स्मरिष्यत्यपि माधवः ॥ ९९ ॥
एवं विलप्य संतापसंकुला निशि गोपिकाः ।
नन्दसूनो,मुकुन्देति क्रन्दन्त्यो मुमुहुर्मुहुः ॥ १०० ॥
कुरुविन्दोपमास्तावदरविन्दैकबन्धवः ।
प्राच्यं गिरिमलंचक्रुः पातङ्गाः किरणाङ्कुराः ॥ १०१ ॥
नीवारशूकपाटल्यतस्करा भास्करांशवः ।
सैन्दूरोष्णीषवैदग्ध्यं प्रापुः प्राचीनभूभृतः ॥ १०२ ॥
अवाप्यमलोलम्बमतन्द्रालुसरोरुहम् । Blooming
अम्भोजकाननं रेजे सुभगंभावुकं दृशोः ॥ १०३ ॥
पूर्वाद्रिकुञ्जादुत्थाय मार्ताण्डकरतस्कराः ।

(१०२) प्राचीनभूभृतः = उदयपर्वतस्य । राज्ञ इति च गम्यते ॥

तमःपटं दिवो जहुस्ताराहारावलीमपि ॥ १०४ ॥

मित्रं निजगृहं प्राप्तमार्चितुं वज्रपाणिना ।
वितानमिव कौसुम्भं कृतं रेजे रवेर्महः ॥ १०५ ॥

क्षणात् प्रसेदुराशाश्च गगनं च महीतलम् ।
कुमुदेन्यश्च गोप्यश्च केवलं म्लानिमाययुः ॥ १०६ ॥

तदानीं गोकुलात् कृष्णो निश्चक्राम सबान्धवः ।
प्रविवेश च वेगेन गोकुलं शोकपावकः ॥ १०७ ॥

भोजानां कर्तुमानन्दमम्भोजानां च तत्क्षणम् ।
आरुरोह रथं शौरिरुदयाद्रिं च भास्करः ॥ १०८ ॥

वल्लवीभिः परित्यक्तो निराश्रय इव क्षणात् ।
प्रहर्षो हृदयं प्राप मधुरापुरयोषिताम् ॥ १०९ ॥

यान्तमन्वयुरात्मीयं कान्तमेनं मृगीदृशः ।
कान्तया स गिरा ताश्च सान्त्वयामास माधवः ॥ ११० ॥

अथ सङ्कर्षणाक्रूरनन्दगोपादिसंवृतः ।
बलिंदमो जवात् प्राप कलिन्ददुहितुस्तटीम् ॥ १११ ॥

पद्माकरपरिष्वङ्गकेलिसौगन्ध्यबन्धवः ।
अध्वश्रान्तिमुषः शौरिमसेवन्त समीरणाः ॥ ११२ ॥

---

(१०५) मित्रः सूर्यः मित्रं सुहृत् ॥ (१११) बलिन्दमो मुकुन्दः । "संज्ञायां भृतॄ" इत्यादिना खश्

स्यन्दने तस्थतुस्तत्र बलभद्रबलिद्विषौ ।
अमज्जदधिकालिन्दि नियमी गान्दिनीसुतः ॥ ११३ ॥

स मग्नः संस्थितौ पश्यन्नम्भःकुहरसीमनि ।
उन्मग्नः स्यन्दनस्थौ च कृष्णरामौ विसिष्मिये॥ ११४ ॥

पुनरप्येष निर्मज्य पुण्यभाजां पुरस्सरः ।
शयानं शयनीभूते दन्दशूकशिखामणौ ॥ ११५ ॥

विविधस्तोत्रनिकाणवाचालीकृतदिङ्मुखैः ।
सम्भाव्यमानमम्भोजयोनिजम्भान्तकादिभिः ॥ ११६ ॥

रुचा किरीटरत्नानां सान्ध्यकान्तिमदद्रुहा ।
दिगन्तराणि युञ्जानमारुण्याद्वैतमुद्रया ॥ ११७ ॥

वितन्वानं सितेनौष्ठज्योतिषा च निजात्विषा ।
प्रसूनितं पल्लवितं तथा शाद्वलितं नभः ॥ ११८ ॥

लक्ष्मीकटाक्षकालिम्ना मुहुः शैवाङ्कितामिव ।
वहन्तं वक्षसा हारसुषमांसुरनिम्नगाम् ॥ ११९ ॥

कलशीसिन्धुनन्दिन्याः कुलशैले कुचाह्वये ।
धातुश्रियं वितन्वानं कौस्तुभीयैर्गभस्तिभिः ॥ १२० ॥

---

(११६) जम्भान्तक इन्द्रः ॥ (११८) प्रसूनितम् = कुसुमितम् ॥ तद्गुणालंकारः ॥ (१२०) कलशीसिन्धुनन्दिनी = रमा ॥

चकोरकोकजीवाभ्यां प्रदीपाभ्यां जगद्गृहे ।
निशादिवसबीजाभ्यां लोचनाभ्यामलंकृतम् ॥ १२१ ॥
चिरन्तनीनां सूक्तीनां सिरासीमनि जाग्रतम् ।
साक्षादेव सरोजाक्षमीक्षामास सनातनम् ॥ १२२ ॥
मुहुः प्रणमतस्तस्य मुदा मांसळितात्मनः ।
मुखं मुखरयांचक्रे स्तोत्रप्रक्रमचातुरी ॥ १२३ ॥
अयमञ्जलिबन्धस्ते जागर्तु जगदीश्वर! ।
जाड्यपाथोजसंतानशान्तिहेमन्तवासर! ॥ १२४ ॥
मत्का वाक्कणिकाः स्तोतुमीशते कथमीश ते ।
माहात्म्यं *जिह्मितब्रह्मवैखरीपाकपाटवम् ॥ १२५ ॥
इत्यादि बहुधा स्तोत्रं तन्वानेऽस्मिन् मुहुर्मुदा ।
अन्तर्धिं प्रापयामास स्वरूपं तज्जनार्दनः ॥ १२६ ॥
उन्मज्य तोयादायातान्मुकुन्दो गान्दिनीसुतात् ।
स्मयमानोऽथ शुश्राव तदीयाद्भुतकारणम् ॥ १२७ ॥
ततः सबलदेवोऽसौ तरसा बान्धवावृतः ।
मधुरापुरपर्यन्तं मधुप्रतिभटो ययौ ॥ १२८ ॥

---

(१२१) "कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने" इति मुरारिः ॥
* विजितब्रह्मेति पाठान्तरम् ब्रह्मवैखरी = श्रुतिः ॥

पवित्रीकुरु पादाभ्यां मद्गृहानिति वादिनम् ।
एष्यामीति तमक्रूरं विससर्ज स माधवः ॥ १२९ ॥

तद्वाक्यादागतिं ज्ञात्वा कंसः कृष्णस्य विव्यथे ।
चरणायुधनिकाणादुलूक इव भास्वतः ॥ १३० ॥

अद्भुतेन च हर्षेण कौतुकेन च तत् पुरम् ।
प्रथमं विविशे भृत्यवर्गेणेव मधुद्विषः ॥ १३१ ॥

पञ्चबाणमिवायान्तं किञ्चि*दुन्मीलितस्मितम् ।
चञ्चलाक्ष्यो हरिं द्रष्टुं मञ्चमारुरुहुः क्षणात् ॥१३२॥

*अहंप्रथमिका काचित् ससंभ्रममजृम्भत ।
मृगेक्षणाकटाक्षाणां गवाक्षाङ्कणसीमसु ॥ १३३ ॥

प्रवृद्धे परमानन्दे मुहुर्नगरवासिनाम् ।
असूययेव संतापो ववृधे कंसमानसे ॥ १३४ ॥

रजकस्तत्र कंसस्य याचितो हरिणांशुकम् ।
अतर्जयद्गन्तुकामैः प्रेर्यमाण इवासुभिः ॥ १३५ ॥

आहन्यमानो हरिणा कंसायेर्ष्यन्निव क्षणात् ।
तदुपान्तं स संत्यज्य कृतान्तोपान्तमाययौ ॥ १३६ ॥

---

(१३०) चरणायुधः कुक्कुटः॥ (१३२) *उन्मिषितस्मितां [illegible] पाठान्तरम् ॥
(१३३) *अहंप्रथमिकः कश्चित् सम्भ्रमः समजृम्भतेति [illegible]व पाठः ॥
(१३६) कंसायेर्ष्यन् । क्रुधद्रुहेर्ष्यासूयेत्यादिना चतुर्थी ॥

भक्तिपाशेन सुदृढमाकृष्ट इव माधवः ।
बलदेवसखः प्राप मालाकारस्य मन्दिरम् ॥ १३७ ॥

स तयोर्गतयोर्नन्दसुतयोर्निजमन्दिरम् ।
लेभे माल्यप्रदानेन निरर्घं तदनुग्रहम् ॥ १३८ ॥

रथ्यासीमन्यसौ काञ्चित् सञ्चरिष्णुर्व्यलोकयत् ।
पुरन्ध्रीं कंससैरन्ध्रीं कुब्जामब्जायतेक्षणः ॥ १३९ ॥

अरविन्दाक्षमानर्च सा नव्यैरनुलेपनैः ।
सौगन्ध्योद्रेकजातान्ध्यसंभ्रान्तकुसुमंधयैः ॥ १४० ॥

कराग्रेण पदाग्रेण चिबुकप्रपदस्पृशा ।
कुब्जामताद्दशीं चक्रे शौरिः कारुणिकाग्रणीः ॥ १४१ ॥

ऋज्वी बभूव सा यावत् प्रहर्तुं तावदेव ताम् ।
कौसुमं कुटिलीचक्रे कोदण्डं कुसुमायुधः ॥ १४२ ॥

करसङ्गान्मुकुन्दस्य भानोरिव सरोजिनी ।
कमनीयरुचिस्तावत् कमनीयमराजत ॥ १४३ ॥

अहार्षीद्विकृतिं तस्या वपुषः पुरुषोत्तमः ।
अवर्धयत तां तस्या मानसे मीनकेतनः ॥ १४४ ॥

तां चानुरक्तामाश्वास्य पुनरागतिवार्तया ।
* स्थ[illegible]ोद्दण्डकोदण्डं मण्डपं प्राप माधवः ॥ १४५ ॥

---

(१४०) कुसुमंधयो भ्रमरः । बाहुलकात् खश् ॥ * अर्चितोद्दण्डेति वा पाठः ॥

स्थापितो

आदाय धनुराकृष्य जवादारोप्य केशवः ।
स्फुटमास्फाल्य चिच्छेद क्षणादाशां च रक्षिणाम् ॥ १४६ ॥

जनितनिखिलकर्णरन्ध्रभेदं ध्वनितदिगन्तरमाशु चापभङ्गे ।
स्वनितमथ निशम्य भोजभूपः स्तनितमिवोरगपुङ्गवश्चकम्पे ॥

चरमशिखरिभाजि पद्मबन्धौ
मुरमथिता सह बन्धुभिः समस्तैः ।
प्रकटितनिजदोर्बलातिरेकः
शकटगतः कृतभोजनोऽथ शिश्ये ॥ १४८ ॥

निशि गुरुतरभीतिं वीक्ष्य दुःस्वप्नजातं
समरविधिषु सर्वान् संनियुज्याथ मल्लान् ।
उदयति सति कंसः पूष्णि पापावतंसः
समजनि गतमञ्चः प्रतिबन्धुप्रपञ्चः ॥ १४९ ॥

इति शङ्करकविकृते श्रीकृष्णविजये
सप्तमः सर्गः ।

३४०

अष्टमः सर्गः ।

अथ मल्लसमूहदुन्दुभीनां ध्वनिना नन्दसुतो विधूतनिद्रः ।
शयनात्सबलः शनैरुदस्थाद्द्विरदानामिव बृंहितेन सिंहः ॥ १ ॥

नयनाम्बुरुहैर्नितम्बिनीनां परितोषात् परितो निपीयमानः ।
मधुरस्मितफुल्लगण्डलक्ष्मीर्मधुशत्रुः स जगाम राजवीथीम् ॥ २ ॥

मधुरापुरमार्गपक्ष्मळाक्षीररविन्दाक्षकटाक्षदेशिकेन्द्रः ।
अचिरादनुरागपारतन्त्रीपरिभाषामथ पाठयांचकार ॥ ३ ॥

तरुणीहृदयं तरङ्गयन्तं तरुणाम्भोजदृशं तमालनीलम् ।
करकुग्मळकल्पितावतंसा जनतास्तं जगदीश्वरं प्रणेमुः ॥ ४ ॥

अथ बृंहितघोषकम्पिताशस्ततसिन्दूरतटित्प्रभापिशङ्गः ।
हरिणा तरुणाम्बुदानुकारी ददृशे रङ्गमुखे मतङ्गजेन्द्रः ॥ ५ ॥

करिणा सह ते कुतूहलं किं पुरमालोकयितुं परेतभर्तुः ।
इति नन्दसुतेन तर्ज्यमानो द्विरदं प्रेषितवान् रुषा निषादी ॥ ६ ॥

कुलिशाङ्कितपाणिपङ्कजस्य स्फुटचण्डानिलकर्णताळकेळिः ।
जघटे निकटे हरेः करीन्द्रः शतमन्योरिव पक्षवान् गिरीन्द्रः ॥ ७ ॥

---

(५) मतङ्गजेन्द्रः कुवलयापीडः ॥ (७) कुलिशं श्रीकृष्णपक्षे रेखारूपम् ॥

करकुण्डलयन्त्रणं स नीतः करिणा तेन कराळबृंहितेन ।
चरणे चरणे निलीय शौरिर्गळितोऽस्माज्झळितास्सितो विजह्रे ॥८॥

करिणश्चरणभ्रमीषु शौरेस्तरुणार्कच्छविरंशुकस्य लक्ष्मीः ।
तरळेव तटिल्लता पयोदे ददृशे विस्मयशालिभिर्जनौघैः ॥ ९ ॥

हरिदन्तरमाशु कम्पयन्तं खरदन्तं द्विरदं तमम्बुजाक्षः ।
भ्रमयन्तमशेषलोकमुर्वीं नमयन्तं भुवि पातयांचकार ॥ १० ॥

परिणाहपराजिताचलेन्द्रे हरिणास्मिन्द्विरदे निपात्यमाने ।
कुलिशत्रुटितः कुलाद्रिकूटः स्फुटमस्मारि दिगन्तदन्तियूथैः ॥११॥

क्षुभितक्षितिचक्रभारभुग्ने फणचक्रे फणिलोकचक्रवर्ती ।
स्फुटमध्वनयद्भुजङ्गलोकं पटुना फूत्कृतिचण्डमारुतेन ॥ १२ ॥

उदमूलयदेष दन्तमस्माद्गिरिशृङ्गादिव पादपं द्विपेन्द्रः ।
अभिहत्य च तेन हस्तिपालान् गजभर्तुर्गमयांचकार मार्गम् १३॥

गजदन्तमसौ गजेन्द्रगामी निदधौ तं मदधौतमंसभागे ।
अपरं मुसली दधौ सलीलं स्थिरपक्षप्रतिपक्षकक्षवह्निः ॥ १४ ॥

कनकच्छवितस्करांशुकश्रीः कमलाक्षः स करीन्द्रदन्तपाणिः ।
तटिदुल्लसितो धृतेन्दुरेखस्तरुणाम्भोद इवाधिकं बभासे ॥ १५ ॥

सबलः स पदं चकार रङ्गे रिपुचक्रस्य च कृष्णिमा मुखेन्दौ ।
नयनेष्वनिमेषता नराणां हृदि कंसस्य च साध्वसातिरेकः ॥१६॥

---

(१६) तुल्ययोगितालंकृतिः ॥

स्तनितप्रतिमल्लचण्डिमानस्तरसा तुन्दिलदुन्दुभिप्रणादाः ।
कटुसंहितमल्लसिंहनादाः ककुबन्तानथ कम्पयांबभूवुः ॥ १७ ॥

अथ मल्लजनस्य रोषरूक्षः क्षितिपस्यापि मुहुर्मुहुः सशङ्कः ।
महतां च नृणां *दयोदयार्द्रो युगपत्तत्र चचार दृष्टिपातः ॥ १८ ॥

परमो निलयः पराक्रमाणामथ चाणूरमवाप चक्रपाणिः ।
अतिरुष्टमनाश्च मुष्टिकाख्यं मुसली फुल्लमुखोऽथ मल्लमौलिम् १९॥

बहुमण्डलचारिणो हसन्तः प्रहरन्तो मुहुरन्तरे पतन्तः ।
नमनोन्नमनैर्निरर्थयन्तः प्रहृतिं ते विहृतिं रणे वितेनुः ॥ २० ॥

प्रथनेन किमत्र मल्लवर्यं प्रथने वक्रधियं स चक्रपाणिः ।
अचिरेण पिपेष रङ्गसीमन्यपरं धीरमतिश्च सीरपाणिः ॥ २१ ॥

अपरानहतां क्षणेन मल्लान् द्विपराजप्रतिमल्लदोर्बलौ तौ ।
शिरसा च नृणां सविस्मयानां मनसा चाथ महीपतेश्चकम्पे २२॥

अतितुङ्गमिमं च मञ्चमध्यं कथमारोहति गोपसूनुरेषः ।
इति निश्चयमाप भोजभूपो बुबुधे नैव परात् परं पुमांसम्॥२३॥

अथ कंसकठोरतर्जनाख्यस्फुटचण्डानिलदीप्तिकोपवह्निः ।
विदितोत्पतनो जनैर्न कैश्चिद्ददृशे मञ्चगतो जगन्निवासः॥ २४ ॥

---

* प्रमोदपूर्ण इति पाठान्तरम् ॥ (२१) प्रथनेन किम् = विस्तरेणालम् ॥
(२२) अहतामिति हन्तेर्लङि प्रथमपुरुषद्विवचनम् ॥

धरणौ विनिपात्य भोजभूभृत्करिणं मञ्चगिरीन्द्रतुङ्गशृङ्गात् ।
घनगर्जमसौ जगर्ज तस्मिन् निपतन्नाशु मुकुन्दकेसरीन्द्रः ॥२५॥

तरसैव नृपस्य जीवहव्यं सुरसंघान् सुखयन्मुकुन्दयज्वा ।
प्रथमं परुषाक्षराज्यसिक्तज्वलिते कोपहुताशने जुहाव ॥ २६ ॥

प्रतिघेन हली च सोदरौघान् परिघेणास्य कृतान्तसाच्चकार ।
मृगभर्तुरिभेन्द्रदर्पहर्तुर्मृगविध्वंसविधौ कियान् प्रयासः ॥ २७ ॥

रुदतीः स्वपतेर्वियोगखिन्नाः सुदतीः सादरमेष सान्त्वयित्वा ।
भुवनैकपतिर्विवेश पित्रोर्भवनं भक्तिभरावनम्रमौलिः ॥ २८ ॥

नतबन्धहरो मुमोच बन्धं निजपित्रोः शतपत्रलोचनोऽसौ ।
निगळेन तदैव तावभूतां दृढवात्सल्यमयेन बध्यमानौ ॥ २९ ॥

पुरतः प्रणमन्मुदा पुराणः पुरुषोऽसौ परिषस्वजे पितृभ्याम् ।
परमार्थविदौ च तौ विदित्वा पदमूले निपतन्निदं जगाद॥ ३० ॥

पितरौ नितरामपुण्यभाजां प्रथमावेव जगत्सु नूनमावाम् ।
भवतोः परितोषपोषकत्वं यदगाद्दिष्ट न शैशवी दशा नौ ॥३१॥

हृदि यादृशमातनोति पित्रोः परितोषं निजशैशवेन सूनुः ।
न हि तादृशमात्तयौवनोऽसौ वसुभिर्वा परिचर्ययापि गुर्व्या ३२॥

युवयोश्चिरमावयोश्च हा हा सहवासोद्भवहर्षवर्षलक्ष्म्याः ।

---

(२७) प्रतिघः = कोपः ॥

उदभूत् परमुग्रसेनसूनुः शिखितीक्ष्णोऽयमवग्रहो बलीयान् ॥ ३३ ॥
इति तौ बहुधा गिरा मुरारिः सुखयित्वा तरसैव कंसबद्धम् ।
यदुचक्रशिखामणिं स चक्रे सुधियामग्रसरं तमुग्रसेनम् ॥ ३४ ॥
अथ कंसनिदाघकालतापस्थिरशोकां यदुलोकचातकाळीम् ।
मुदितामतनोद्धनाम्बुवर्षं मुहुरापाद्य मुकुन्दकाळमेघः ॥ ३५ ॥
सधनैः ससुतैः सबन्धुलोकैः सकळत्रैः सनिवेशनैः सधान्यैः ।
कमलाक्षकटाक्षकामधेनोः कृपया वृष्णिभिरन्वहं ननन्दे ॥ ३६ ॥
परिरभ्य परं वियोगखेदी बलभद्रं च बलिद्रुहं च भूयः ।
गळदश्रुसहायवान् प्रतस्थे मुहुरामन्त्र्य च गोकुलाय नन्दः ॥ ३७ ॥
अथ गच्छति गोकुलं च नन्दे सुदृशां शङ्कितकेशवागतीनाम् ।
प्रमदः स महान् प्रवर्द्धमानस्तरसावाप तटिल्लताविलासम् ॥ ३८ ॥
मधुरानगरान्निराश्रयत्वात् किमु नन्देन समं जगाम शोकः ।
ववृधे कथमन्यथा तदानीं व्यसनं गोपकुटुम्बिनीजनानाम् ॥ ३९ ॥
कृतसंस्करणः पुरोहितेन द्विजतां प्राप्य हलायुधेन साकम् ।
पठितुं पितुराज्ञया स विद्यामथ सान्दीपनिमाप नन्दसूनुः ॥ ४० ॥
अनयोर्हृदये समस्तविद्यासमुदायो विमले गुरूपदिष्टः ।
शशिबिम्ब इवाम्बुपूरमध्ये सरसां संक्रमणं क्षणात् प्रपेदे ॥ ४१ ॥

---

(३३) अवग्रहः अनावृष्टिः ॥　　(३८) तटिल्लताविलासम् = क्षणमात्रस्थायिताम् ॥

मुदितेन सविस्मयेन शौरिर्मुनिनासौ गुरुदक्षिणाप्रसङ्गे ।
निजमात्मभवं प्रभासतीर्थे हतजीवं गृहिणीगिरा ययाचे॥ ४२ ॥
प्रणतौ पदयोर्गुरोः प्रसन्नौ बलिनौ तौ बलदेववासुदेवौ ।
रथिनौ चलवीचिलास्यभूमिं तटसीमानमवापतुः पयोधेः॥ ४३ ॥
वरुणस्य गिरा सुरेन्द्रशत्रो*र्गुरुपुत्रासुहरस्य वासुदेवः ।
द्रुतमम्बु विगाह्य कम्बुमूर्तेरकरोत् पञ्चजनस्य पञ्चभावम्॥४४॥
अथ शंखवरं स पङ्कजाक्षो दनुजाङ्गोद्भवमाशु पाञ्चजन्यम् ।
उररीकुरुते स्म नीलमेघस्वररीतिप्रातिमल्लमन्द्रघोषम् ॥ ४५ ॥
अमुना परिपूर्य पाञ्चजन्यं यमुनाभ्रातुरथाहृतं प्रदाय ।
गुरवे मुरवैरिणा तनूजं दुरवापं निरवापि शोकवह्निः ॥ ४६ ॥
नयपद्धतिलब्धवर्णमाद्यं सुहृदामुद्धवमेष शुद्धशीलम् ।
हृदि नन्दयशोदयोरमन्दं व्यसनं भङ्क्तुमना न्ययुङ्क्त शौरिः॥
त्वरमाणरथस्तदा स गत्वा चरमाद्रौ कृतसंगमे पतङ्गे ।
परिधूसरिताम्बरं पशूनां खुरधूळीभिरवाप नन्दगोष्ठम् ॥ ४८ ॥
अधिगच्छति कृष्णवल्लभेऽस्मिन्नधिकं नन्दयशोदयोः प्रमोदात् ।
नभसीव मुहुर्नदीप्रवाहो ववृधे बाष्पपरम्परातिरेकः ॥ ४९ ॥

---

(४४) *गुरुपुत्राहरणायेति च पाठः । पञ्चभावो मरणम् ॥

(४६) यमुनाभ्रातुरन्तकात् । निरवापि = निर्वापितः ॥ (४७) लब्धवर्णो विचक्षणः ॥ (४९) नभसि = श्रावणमासि ॥

परिगृह्य पयोजनेत्रबन्धुं परमानन्दभरेण नन्दगोपः ।
विगतश्रममुद्धवं बभाषे विगळद्बाष्पततिर्विचिन्त्य शौरिम् ॥५०॥

सुखमद्य मया विचार्यते किं सुहृदामस्ति हि तत्र वासुदेवः ।
कुमुदाकरबन्धुरीक्षणानां कुरुते नैव जनस्य कस्य मोदम् ॥५१॥

मुहुरञ्चितमुग्धहासभासा मुखचन्द्रेण सुधाकिरा गिरा च ।
सफलीकुरुते कदा नु शौरिर्नयनं च श्रवणं च मामकीनम् ॥५२॥

न परो रमणीयवस्तुसार्थः सुखदायी व्रजवासिलोचनानाम् ।
कमनीयरुचिः करोति मोदं कमलानां किमु कौमुदीसहायः ५३॥

सकलाश्च वयं सबालवृद्धा व्यसनाम्भोधिषु दुस्तरेषु मग्नाः ।
अयमेव विपक्षधूमकेतुर्जगतां हेतुरमीषु सेतुरासीत् ॥ ५४ ॥

जगदे पुनरुद्धवेन नन्दो बत चित्रं मधुसूदनैकतानः ।
इह भाग्यवतां त्वमेव पुंसां मकुटीमण्डनविभ्रमं दधासि॥ ५५ ॥

तनयः किमसौ तव त्रिधामा परमोऽयं भगवान् पयोजनेत्रः ।
दनुजप्रकरान् दमं निनीषुर्मनुजत्वं जगृहे महाप्रभावः ॥ ५६ ॥

इति वादिनि पद्मनाभबन्धौ विहसन् किंशुकमंशुकन्दळेन ।
चरमेतरशैलमौलिसीमां परिचस्कार पयोजिनीसहायः ॥ ५७ ॥

---

(५७) परिचस्कार = अलंचकार । "सम्पर्युपेभ्यः करोतौ भूषणे" इति सुट् ॥

मकरध्वजबाणमर्दिताभिर्मदिराक्षीभिरुपेत्य मन्दमन्दम् ।
नियमावसितौ निशावसाने जगदे सोऽथ जगन्निवासदूतः ॥५८॥

सुभगाग्रसरः सुखं किमास्ते नगरे तत्र स नन्दगोपसूनुः ।
कळहंसधुरन्धरो विलासी कुचपद्मेषु कुरङ्गलोचनानाम् ॥ ५९ ॥

किमु नः स्मरति क्षणं मुकुन्दः पुरनारीजनपूर्णपुण्यसीमा ।
पिचुमन्दलताः पिकः किमिच्छेद्विहरन्नूतनचूतवल्लरीषु ॥ ६० ॥

वयमेव तु तद्वियोगखिन्नाः कमलाक्षस्य न तस्य कापि हानिः ।
विरहे शशिनो विषादपूर्णाः कुमुदिन्यः कुरुते स किं स्म खेदम् ॥

वरिवस्यति विप्रयोगखेदो मुहुरस्मान्नियमेन जागरूकः ।
अभिषेचनमश्रुभिर्वितन्वन्नवनीधूळिभिरङ्गरागमुद्राम् ॥ ६२ ॥

मधुरानगरीनितम्बिनीनां पुनरासां व्रजयोषितामकस्मात् ।
युगपत् कथमेवमाविरासीद् गुरु भाग्यं बत तद्विपर्ययश्च ॥६३॥

इति वादिनि वल्लवीजनेऽस्मिन् मधुरं माधववल्लभो बभाषे ।
कमलेक्षणवाचिकं मृगाक्ष्यो भवतीनां श्रवणामृतीकरोमि॥ ६४ ॥

मयि शश्वदशेषविश्वमूर्तौ भवतीनां हृदयैकगोचरेऽस्मिन् ।
कथमत्र पुनर्वियोगवार्ता विरमत्वेष तदुत्कटो विषादः ॥ ६५ ॥

मम नूनमयं त्वसन्निकर्षो भवतीनामियतीं तनोति भक्तिम् ।

---

(६०) पिचुमन्दो निम्बः ॥

अनयैव समग्रथिष्यते तत् क्रमशो मद्गतिरम्बुजेक्षणा वः॥ ६६ ॥

इति कृष्णवचो वियोगतप्तं तरुणीनां शिशिरीचकार चेतः ।
विपिनं दववह्निदह्यमानं नवमेघैरिव मुच्यमानमम्भः ॥ ६७ ॥

सुखयन्निति गोकुलं मुकुन्दे गतचित्तं कतिचिद्दिनानि नीत्वा ।
मधुरापुरमेत्य माधवं तं व्रजवृत्तान्तमवोचदुद्धवोऽसौ ॥ ६८ ॥

कमलारमणः कदाचनासौ कुटिलाक्षीं कुसुमेषुमथ्यमानाम् ।
प्रथमं प्रगुणीकृतां स्वशक्त्या रमयामास रमासमानरूपाम् ६९॥

पुनरुद्धवसीरिसंयुतोऽसौ प्रभुरक्रूरनिवेशनं कदाचित् ।
पदपांसुभिरस्य भाग्यसीमापरिपाकेन पवित्रयांचकार ॥ ७० ॥

करकोरकचारुमौळिरेनान् *कमलाक्षप्रमुखान् स पूजयित्वा ।
बलभद्रबलिद्विषौ बभाषे बलिना बाष्पभरेण रुद्धकण्ठः ॥ ७१ ॥

करणे भरणे च विश्वभाजां हरणे कारणयोः पुराणपुंसोः ।
चरणं युवयोरहं प्रपद्ये शरणं पालयतं कृपालयौ माम् ॥ ७२ ॥

इति तं बहुधा मुहुः स्तुवन्तं प्रणमन्तं मधुरं वदन्मुकुन्दः ।
अवगन्तुमनाः स्वबन्धुभद्रं त्वरया दन्तिपुरं न्ययुङ्क्त गन्तुम् ॥

करिपूर्वमसौ पुरं प्रपेदे परिपूर्णं कुरुपुङ्गवैः समन्तात् ।
धृतराष्ट्रधुरं ददर्श तस्मिन् धृतराष्ट्रं च तथैव भीष्ममुख्यान् ७४॥

---

(६९) कुटिलाक्षी=कुब्जा । कुटिलाङ्गीमिति वा पाठः सम्भाव्यते ॥
* कमलाकान्तमुखानिति च पाठः ॥ (७३) दन्तिपुरम्=हस्तिनपत्तनम् ॥

विदुरश्चरितं विदन्नशेषं विषदानप्रमुखं विषादपूर्णः ।
पृथया सह गान्दिनीतनूजं कथयामास कृतं सुयोधनाद्यैः ॥७५॥
कुरुपाण्डुसुतेषु नेतुकामं समतां संसदि गान्दिनेयवाक्यम् ।
हितमप्यफलं चकार राज्ञो विवशस्यात्मनि वक्रिमातिरेकः॥७६॥
परमाकुलितस्य मोहपाशैर्गिरमाकर्ण्य नृपस्य तावदेव ।
मुरमाथिनमेत्य गान्दिनेयः परमार्थं स निवेदयांचकार ॥ ७७ ॥
अथ कंसवधो निजात्मजाभ्यां विधवाभ्यां समुपेत्य कथ्यमानः ।
चलितोऽजनि चण्डमातरिश्वा मगधानामधिपस्य कोपवह्नेः॥७८॥
दशनैर्दशनाम्बरे ललाटे भ्रुकुटीभिर्नयने च लोहितिम्ना ।
वपुषि श्रमवारिणा कराग्रे करवाळ्या नृपतेः पदं वितेने॥ ७९ ॥
नयनद्वयघूर्णनं च पीठात् प्रसभोत्थानमुदञ्चितश्च कम्पः ।
सहसास्य ततान सैनिकानां समराडम्बरवेगबंहिमानम ॥ ८० ॥
अवदच्च ममैष बाहुदण्डः कुटिलं डाम्भिकमाशु गोपडिम्भम् ।
सपुरं सबलं सबन्धुलोकं न किमद्यैव वचःपथे करोति ॥ ८१ ॥
पुरतस्त्वरितस्ततः प्रतस्थे नरपालः परिपाटलाक्षिरूक्षः ।
मुहुरुद्भटतद्भटोत्तमानां हृदयं सङ्गरसम्भ्रमो विवेश ॥ ८२ ॥
कटुभिः करटिस्वनै रथानां रटितैर्घोटकपेटकप्रणादैः ।

---

(७९) दशनाम्बरमधरः ॥ (८०) बंहिमा=बाहुल्यम ॥
(८२) करटी=गजः ॥

प्रकटैः क्षितिभृद्घटादरीषु स्फुटत्वाचाटितर्दिक्तटैर्जजृम्भे ॥ ८३ ॥

अमदैर्द्विरदैरगाढकोपैर्भटलोकैरमनोजवैस्तुरङ्गैः ।
अमरुत्पथलङ्घिभिर्ध्वजाग्रैर्न बभूवे मगधेन्द्रसैन्यमध्ये ॥ ८४ ॥

मगधाधिपतेर्महानिनादो मधुरामाशु रुरोध सैन्यराशिः ।
सरसीरुहनेत्रदर्शनार्थी सहसा संश्रितवानिवाम्बुराशिः ॥ ८५ ॥

यदुराजपराजयावलोके मधुरा खेदमिवाधिकं वहन्ती ।
अवगुण्ठनमात्मनो वितेने तरसा मांसळपांसुकम्बळेन ॥ ८६ ॥

नयने कपिलीचकार चापग्रहणाय त्वरयांचकार पाणिम् ।
भ्रुकुटी प्रकटीचकार शौरेर्मगधाधीश्वरसैन्यसिंहनादः ॥ ८७ ॥

नगरान्नगराजतुङ्गसालान्नळिनाक्षो हलिनानुगम्यमानः ।
द्विषतां मिषतां सशार्ङ्गबाणो निरियाय त्वरया रथाधिरूढः ८८॥

अतिचित्रमिदं गुणी मुरारेः कुटिलत्वं यदवाप चापदण्डः ।
विशिखास्तु गुणं विमुच्य याता यदवापन्नृजुतां विपक्षपाताः ८९

कुटिलभ्रु कराळवभ्रुनेत्रं चटुलभ्रूकुटिलं मुखारविन्दम् ।
हृदयं प्रतिपक्षसैनिकानां भयसंक्षोभतरङ्गितं चकार ॥ ९० ॥

युगपत् प्रतिपक्षमुच्यमानैः सुकुमारेऽपि सरोजनेत्रगात्रे ।
सफलैरपि सायकैरनेकैर्विफलैरेव रणाङ्गणे बभूवे ॥ ९१ ॥

मधुसूदनमन्थभूधरोऽसौ मगधाधीशबलाम्बुधिं ममन्थ ।
अमृतं च यशोमयं वितन्वन् सुरसङ्घानपि तोषयांचकार ९२॥

बद्धं सीरधरेण नीरथममुं विद्धं मुहुर्मार्गणैः
प्रक्षीणं कृपया मुमोच भगवाल्लक्ष्मीपतिर्मागधम् ।
उद्योगं तपसे चकार स पुनः सद्यो निराशस्तदा
निन्युर्मन्दिरमाशु तं क्षितिभुजो मन्युं हरन्तः शनैः१३॥
प्रक्षोभी मगधेश्वरोऽथ नितरामक्षौहिणीभिः समं
विंशत्या तिसृभिर्यदुक्षितिभृतां वंशप्रणाशोद्यतः ।
वारान् सप्तदशावृणोन्मधुपुरीं वीराग्रणीस्तत्क्षणं
वृष्णिभ्यश्च परं ययौ परिभवं कृष्णप्रभावोदयात् ॥ १४ ॥

इति शङ्करकविकृते श्रीकृष्णविजये
अष्टमः सर्गः ।

नवमः सर्गः ।

अथ क्षणादप्रतिमानशक्तिर्नानाबलो नारदचोद्यमानः ।
यदून्निरोद्धुं यदुराजधानीं यमोपमानो यवनः प्रपेदे ॥ १ ॥
पांसुव्रजैः पक्ष्मळयन् दिगन्तान् पयोनिधीन् पङ्किलयन् समन्तात्
महीं विधून्वन्मकराकरश्रीर्महान् बलौघो मधुरां रुरोध ॥ २ ॥

और्वाग्निधूमैरिव वारिराशौ नीलाम्बुवाहैरिव वायुमार्गे ।
निचोळपट्टैरिव दिग्वधूषु रेजे तदा रेणुपरम्पराभिः ॥ ३ ॥

पांसुच्छटा सा कुलटेव तावज्जलाशयान् पङ्किलयांचकार ।
तुषारपृथ्वीधरकन्यकेव दिगम्बरालिङ्गनमाततान ॥ ४ ॥

म्लेच्छैर्जनैः सङ्गमनेन यावद्दिगङ्गनाः पांसुलतामवापुः ।
तावन्न पस्पर्श करैस्तदङ्गं सन्मार्गभाजां प्रथमो विवस्वान् ॥ ५ ॥

महीपरागेण महाजनानां पदं कृतं मूर्धनि युक्तमेतत् ।
यतः स्वतोऽसौ मलिनो लघीयानौद्धत्यशाली चपलस्वभावः ॥६॥

सैन्ये रिपूणां सविधं प्रपन्ने संचिन्त्य सद्यः सरसीरुहाक्षः ।
कान्तां पुरीं कामपि निर्ममेऽसौ मध्येपयोराशि महानुभावः ॥ ७॥

विधैकरङ्गैर्विहितारिभङ्गैर्महाजनेष्टैर्महनीयचेष्टैः ।
यस्यां बलिष्ठैर्यमसत्यनिष्ठैः श्रिया सुरेन्द्रैः शुशुभे नरेन्द्रैः ॥ ८ ॥

मुक्तामया यत्र विशुद्धवृत्ता गुणावलम्बा गुरुतां वहन्तः ।
कुचान्तराळे कुटिलेक्षणानां हाराश्च पौराश्च विलासमापुः॥ ९ ॥

---

(४) दिगम्बरः शिवः । दिशामम्बरस्य चालिङ्गनं पांसुपक्षे ॥

(५) सन्मार्गो नक्षत्रमार्गः, साधुमार्गश्च ॥

(९) मुक्तामयाः, मुक्ताफलमयाः, रोगवर्जिताश्च । गुणः सूत्रं शौर्यादिरपि ॥

कळङ्कशून्याः कमनीयविद्युत्प्रभाः सुवर्णत्वमुपाश्रयन्त्यः ।
परस्परालङ्करणीबभूवुर्योषाश्च भूषाश्च गृहेषु यस्याम् ॥ १० ॥

यत्सौधशृङ्गे नगराजतुङ्गे संजातसङ्गः सहसा पतङ्गः ।
अकाण्ड एवारुणरत्नकान्तिप्रकाण्डभिन्नो रुचमाप सान्ध्यीम् ११॥

माणिक्यरत्नप्रकरो महीयान् महेन्द्रनीलच्छाविभिर्विभिन्नः ।
विनिस्सरन्यत्र रराज सिन्धौ धूमच्छटावानिव बाडवाग्निः॥१२॥

मुहुर्मुहुश्चम्पककुग्मळेभ्यो मुग्धाजनानां च मुखाम्बुजेभ्यः ।
सुगन्धमादाय दिगन्तराणि मन्दं यदुद्यानमरुज्जगाहे ॥ १३ ॥

नान्यत्र कुत्रापि च सावकाशा चाञ्चल्यमुद्रा च दरिद्रता च ।
यद्वीथिभाजामलसेक्षणानामक्ष्णा च मध्येन च रक्षितासीत् १४॥

संमोहयन्यत्र मनांसि यूनां वामभ्रुवां विभ्रमकौशलेन ।
स्मरः परं शून्यकरत्वशङ्की कोदण्डदण्डं बिभरांबभूव ॥ १५ ॥

पराजयं यत्र च भूमिपालाः पयोधराः पङ्कजलोचनानाम् ।
अपत्रभङ्गाश्च सपत्रभङ्गा महीभृतां तुङ्गतया वितेनुः ॥ १६ ॥

यस्यामवाप्तोदयमात्तशोभमानन्दनं मण्डलमक्षिणानाम् ।
योधेषु सौधेषु च यादवं च सौधाकरं शेखरतां चकार ॥ १७ ॥

क्षणे क्षणे यत्र रुचा विभिन्ना नानामणीनां शरदम्बुवाहाः ।
नीलांशुकानां हरितांशुकानां शोणांशुकानां च विलासमापुः॥१८॥

स्वेच्छावशात्तत्र निधाय बन्धून् म्लेच्छावृतां तां मधुरां मुकुन्दः ।

मूर्च्छालभूपांसुपरम्पराभिराच्छादिताशामचिरात् प्रपेदे ॥ १९ ॥
पीताम्बरः पीनविशालवक्षाश्चतुर्भुजश्चारुपयोजनेत्रः ।
दुद्राव निष्क्रम्य पुरात स तस्मात् क्षुद्रात्मनः पश्यत एव शत्रोः
धावन्तमग्रे यवनो मुकुन्दं जिघृक्षया तत्क्षणमन्वधावत् ।
पलायमानं यवनं च तावत् कृतस्मितस्तूर्णगतिः कृतान्तः॥ २१॥
सुरौघदत्तेन वरेण यातः सुखेन निद्रां गिरिकन्दरायाम् ।
क्षणान्मुकुन्दो मुचुकुन्दनाम्नः क्षमाभृतः पृष्ठगतो निलिल्ये॥२२॥
पश्चाद्गतः पर्वतगह्वरं स पद्माक्षबुद्ध्या परिपूर्णनिद्रम ।
पापाग्रगण्यः परमं नरेन्द्रं पादेन रोषात् परुषं जघान ॥ २३ ॥
द्राघीयसीं प्राप्तुमनाः स निद्रां निद्रान्तरायं क्षितिपस्य कुर्वन् ।
कठोरतत्कोपहुताशमध्ये द्रुतं पतङ्गव्रतमाततान ॥ २४ ॥
भस्मैकशेषे यवने मुकुन्दस्तस्मै नरेन्द्राय निजस्वरूपम् ।
प्रकाशयामास वपुःप्रभाभिः प्रौढान्धकारं च गुहान्तरालम्॥२५॥
सविस्मयं सारधिया स तेन पृष्टस्तदा तुष्टमना मुकुन्दः ।
निसर्गभक्ताय निजस्वरूपं निवेदयामास नृपाय तस्मै ॥ २६ ॥
कृष्णस्य निषण्णस्य वरप्रदाने चूडातटीचूडितपादपांसुः ।

---

(२४) द्राघीयसीं निद्रां=मृतिम् ॥

(२२) निद्रां यातः = गच्छतः ॥

स्तोत्रारवैर्मांसळयन् गुहां तां वव्रे स भक्तिं वसुधाधिनाथः २७॥

तस्मिन् गते तत्क्षणमुत्तराशां भाग्यैकगम्यो भगवान्मुकुन्दः ।
क्षुद्रं स हत्वा यवनस्य सैन्यं तद्द्रव्यजातं नगरीं निनाय ॥२८॥

ततः पुरे मागधसैन्यरुद्धे निजे भयेनेव परौ पुमांसौ ।
प्रधाव्य वेगात् प्रथितानुभावौ प्रवर्षणाद्रिं प्रतिपेदिवांसौ॥ २९ ॥

दिधक्षमाणो वसुदेवपुत्रौ स पर्वतं पावकसाच्चकार ।
उत्पत्य तौ द्वारवतीमगातां स्वयं तु कोपाग्निवशेन देहं ॥ ३० ॥

भ्रमन्मृगौघं विचलन्मृगेन्द्रं पतत्पतङ्गं विचलद्द्रुमौघम् ।
स्फुटत्स्फुलिङ्गो दहनः स शैलं क्वथत्पयःपल्वलमुल्ललङ्घे॥ ३१ ॥

शुष्यन्नदीशिकिरशीत्कृतेन चङ्क्रम्यमाणद्विपफीत्कृतेन ।
स्फुटद्द्रुमव्रातचटत्कृतेन क्रूरेण रोदःकुहरं पुपूरे ॥ ३२ ॥

नभःपथे नीलघनायितेन दिगङ्गनानामळकायितेन ।
चक्षुर्द्रुहा धूमचयेन विश्वं रोचिष्णुना मेचकिमानमाप ॥ ३३ ॥

मध्येहुताशं महितौ पुमांसौ मत्वा स लीनौ मगधाधिराजः ।
निवर्त्य सैन्यं निखिलं प्रपेदे निस्सीमहर्षो निजराजधानीम्॥३४॥

पुरीमलंकुर्वति पूर्णमोदे सबन्धुलोके सरसीरुहाक्षे ।
राज्ञो विदर्भाधिपतेर्बभूव रुग्म्यादिकं पञ्चकमात्मजानाम् ॥३५॥

महीपतेस्तस्य च मारवीरसाम्राज्यसर्वस्वविहारसीमा ।
विळासकल्लोलितकान्तिपूरकल्लोलिनी काचन कन्यकासीत् ॥३६॥

बीजाङ्कुरो मन्मथविक्रमाणां महोत्सवो लोकविलोचनानाम् ।
दिनोदयो विभ्रमपङ्कजानां तस्या बभौ कश्चन कान्तिभूमा ॥३७॥

सञ्चारिणी कान्तितरङ्गिणीव पञ्चायुधीया परदेवतेव ।
शृङ्गारसर्वस्वकलेव मूर्ता तारुण्यमेषा शनकैर्जगाहे ॥ ३८ ॥

अनङ्गसाहाय्यविशारदेन दशाविशेषेण कृशोदरी सा ।
अन्यादृशीं रीतिमगाज्जनानां विलोचनाकर्षणमन्त्रमूर्तिः॥ ३९ ॥

काळाम्बुदश्रीः कबरीभरोऽस्या ममार्ज जङ्घां मदिरेक्षणायाः ।
शनैश्शनैः स्मेरमुखः स्मरोऽपि कोदण्डमौर्वीं करपल्लवेन॥ ४० ॥

विलासतारळ्यवशंवदानि मन्दाक्षमुद्रापरतन्त्रितानि ।
भ्रूवल्लरीवेल्लनलाळितानि चकार सा मुग्धविलोकनानि ॥ ४१ ॥

कटाक्षविक्षेपणतालवृन्तैः सम्भाव्यमानः स्मितचामरैश्च ।
मनोभवस्तद्वदनारविन्दे साम्राज्यसिंहासनमारुरोह ॥ ४२ ॥

मुहुः श्रियं प्रापतुरत्युदारां विलोचने सारसलोचनायाः ।
किमत्र चित्रं खलु नित्यमेव तयोः स्थितिर्वैश्रवणोपकण्ठे ॥ ४३ ॥

उरःस्थलीं मारपराक्रमस्य कोऽपि क्रमः कोरकितां वितेने ।
दृगञ्चलं कश्चिदलंचकार तस्याः क्रमाद्वक्रिमसंप्रदायः ॥ ४४ ॥

---

(४३) वै श्रवणोपकण्ठे श्रवणसमीप एव । कुबेरसमीपे इति च श्लेषेणार्थः ॥

मदेन सार्धं मकरध्वजस्य पुण्येन सार्धं पुरुषोत्तमस्य ।
कुचाङ्कुरोऽस्या ववृधे कुमार्याः कुरङ्गशावायतलोचनायाः॥४५॥
घने नितम्बे स्तनयोश्च बिम्बे मध्यः कृशीयान्मदिरेक्षणायाः ।
मध्यस्थितः स्यान्महतां महीयानित्थं गिरं व्यर्थतया युयोज॥४६॥
विशृङ्खलौ सिन्धुरकुम्भगर्वमसूयया मन्थरलोचनायाः ।
स्तनौ सुवृत्तावपि जग्मतुस्तौ काठिन्यमौद्धत्यमपीति चित्रम्॥४७॥
जेतुं वयः शैशवमङ्गजन्मसाहाय्यभाजा नवयौवनेन ।
*उत्क्षिप्यमाणेव कृपाणरेखा तनीयसी रोमलता चकाशे॥ ४८ ॥
साधर्म्यमाप स्मरभूमिपस्य नितम्बवीथ्यां खुरळीप्रसङ्गे ।
खड्गक्वणत्किङ्किणिकारवेण काञ्चीध्वनिः कातरलोचनायाः॥४९॥
कार्कश्यसीमा करिणां करश्चेत् कदुष्णतां कोमळतां च यायात् ।
ब्रूमः कथङ्कारममी तथापि तदूरुकाण्डस्य च तस्य साम्यम्॥५०॥
मञ्जीरमञ्जुध्वनिरम्यमस्या मन्दं चरन्त्या मणिमन्दिरेषु ।
पादश्रिया पद्मविलोचनायाः पर्यन्तभूः पाटलिमानमाप॥ ५१ ॥
तदङ्गरङ्गे स्तनपूर्णकुम्भे सन्दीप्तबिम्बोष्ठमणिप्रदीपे ।
वितानिते कान्तिपरम्पराभिस्ततान लास्यं नवयौवनश्रीः॥ ५२ ॥
तस्याः क्रमादित्थमुपाश्रयन्त्यास्तारुण्यलक्ष्मीं तरळेक्षणायाः ।

---

* उद्वेल्लिता खड्गलतेव तस्या इति पाठान्तरम् ॥

महान्मधुद्वेषिगुणातिरेको मनो मुहुर्मन्मथसाच्चकार ॥ ५३ ॥

आकर्ण्य चैनामनवद्यशीलामाकम्रलीलामरविन्दनाभः ।
आरूढरागामभिरामरूपामात्मानुरूपामचिरादमंस्त ॥ ५४ ॥
रुग्मी तु धन्यां नरपालकन्यां संबन्धहेतुं स विचिन्त्य दातुम् ।
दौरात्म्यधाम्ने शिशुपालनाम्ने भूपाय मानी हृदयं व्यतानीत् ५५ ॥
घोरा च सा चैद्यविवाहवार्ता नाराचवत् कर्णमवाप तस्याः ।
संत्यज्य सन्तानकशाखिनं किं कारस्करं काङ्क्षति कल्पवल्ली ५६
कंचिद्द्विजं पञ्चशरेण नुन्ना संदिश्य सा नन्दसुताय तन्वी ।
निजामवस्थां निरवद्यशीला स्वयं तदा तापवशा न्ययुङ्क्त ॥५७॥
संदेशहारी सहसैव विप्रः संद्रष्टुकामः सरसीरुहाक्षम् ।
पूर्णां नरैः पुण्यकृतां वरेण्यैः पुंसः पुराणस्य पुरीं प्रपेदे ॥ ५८ ॥
आनीय वेगादवनीसुरं तमाराध्य हर्षादथ शार्ङ्गधन्वा ।
आपूर्णहर्षाकुलमासनस्थमाविःस्मितः साञ्जलिराबभाषे ॥ ५९ ॥
मन्ये महात्मन्नहमेव नूनं पुरोगमः पुण्यकृतां जनानाम् ।
पवित्रितं यत् पदजन्मभिस्ते परागपूरैर्भवनं मदीयम् ॥ ६० ॥
ब्रह्मन् प्रियं किं करवामहै ते किं कारणं वास्मदनुग्रहस्य ।
कल्याणबुद्धे कथयस्व सर्वं जिज्ञासते सम्प्रति मानसं नः॥ ६१ ॥
इत्युक्तवन्तं जगतीमवन्तं प्रमोदवन्तं स च माधवं तम् ।
अमोघजन्मा मुनिभिः सधर्मा प्रवृद्धशर्मा न्यगदद्द्विजन्मा ६२॥

विदर्भदेशान्विधिनैव रक्षन्विभाति धीमान्विपुलप्रतापः ।
भीष्मो द्विषां भीष्मकनामधेयः कश्चिन्नृपो दुश्च्यवनप्रभावः ६३

महीभृतामग्रसरस्य तस्य सन्मार्गसंसर्गपरस्य नित्यम् ।
शिवे परां भक्तिमुपाश्रयन्ती शिवेव रम्याजनि कापि कन्या ६४

आ शैशवात् केशव तावकानि नामानि वीर्याणि मनोभिरामा ।
आकर्ण्य सा कोकनदायताक्षी कां कां दशां प्राप्तवती न जाने ६५

मन्दं च यानं मधुरं च हासं रूपं च तापिञ्छसहोदरं ते ।
संचिन्त्य संचिन्त्य तदीयमन्यत् किञ्चिन्न संचुम्बति हन्तचेतः ६६

मीनध्वजातङ्कबलात् कुमार्या दीनत्वमत्यन्तमुपाश्रयन्त्या ।
संदिश्यते सम्प्रति मन्मुखेन संश्रूयतां सारसनेत्र सर्वम् ॥ ६७ ॥

भवद्गुणाः श्रोत्रसुखायमाना दिवानिशं देव जगन्निवास ।
मत्कं मनो मन्मथमार्गणाळीवशंवदत्वं प्रसभं नयन्ति ॥ ६८ ॥

मुहुर्गुणैर्वीक्ष्य विकृष्यमाणं मुकुन्द चेतो मम तावकीनैः ।
भियेव संत्यज्य तदीयसख्यमपत्रपा कुत्र गता न जाने ॥ ६९ ॥

भ्राता स्वतोऽयं शिशुपालबन्धुस्तातोऽपि मे तन्मत एव तिष्ठन् ।
एकाकिनी संप्रति केकिनीव मेघागमं त्वां प्रतिपालयामि ॥ ७० ॥

इत्थं निशम्य भगवान्मुदितो मुकुन्दः
संदेशवाक्यमरविन्दविलोचनायाः ।
आरूढवानथ रथं च मनोरथं च
साकं द्विजेन च विदर्भपुरीं प्रपेदे ॥ ७१ ॥

आर्तां निशम्य शिशुपालविवाहवार्तां
विप्रस्तदा नृपसुतां सुखयांचकार ।
अम्भोजिनीमिव तुषारनिपीड्यमाना-
मुद्यन् द्रुतं पतगपुङ्गवपूर्वजन्मा ॥ ७२ ॥

पुण्डरीकनयनं प्रति राज्ञां मण्डलीमथ विचिन्त्य सरोषाम् ।
मण्डनं क्षितितलस्य तदानीं कुण्डिनं प्रति ययौ बलदेवः॥ ७३ ॥

आद्यं पुमांसमवलोक्य तथैव चैद्य-
मन्योन्यमित्थमथ पौरजनो बभाषे ।
कान्तं विहाय कनकं कथमारकूटे
कम्रं मणिं घटयितुं यतते कुमारः ॥ ७४ ॥

परिपूज्य हरिं च सीरपाणिं तनयाधीनमना विदर्भराजः ।
परिणीतिदिनागमे सुतायाः शिशुपालस्य च मङ्गलानि चक्रे ॥७५॥

अथ रचयितुं प्रीत्या कात्यायनीचरणार्चनं
कमलनयने लोला लीलातरङ्गितलोचना ।
स्मरशरपराधीना दीना घनस्तनमण्डला
नरपतिसुता मन्दं मन्दं ययौ नृपमन्दिरात् ॥ ७६ ॥

---

(७२) पतगपुङ्गवपूर्वजन्मा = अरुणः ॥

(७४) आरकूटम् = रीतिः । कुमारो रुग्मी ॥

चरणरुचिभिरुर्वीं रञ्जयन्ती जयन्ती
निरुपमतनुकान्त्या दिव्यनारीः कुमारी ।
कवळितयुवधैर्यैः कान्तिरङ्गैरपाङ्गै-
र्व्यतनुत गिरिजायास्तत्र वर्या सपर्याम ॥ ७७ ॥

नृपतिभिरथ नीतां दुर्गतान्निर्गतान्तां
कमलनयनमार्गे चक्षुषी विक्षिपन्तीम् ।
अहृत झटिति हृष्टः स्पष्टमारोप्य यानं
पुळककवळिताङ्गीं पुण्डरीकायताक्षः ॥ ७८ ॥

भ्राता च व्यतनोत् पिता च गृहिणीं माता च चैद्याय तां
सा तु प्रत्युत तत्क्षणं वृतवती पद्मेक्षणं भामिनी ।
चित्रं चित्रमहो विधेः सदृशयोः संयोजने साहसं
सम्प्राप्नोत्यपरं कमेव जलधिं संत्यज्य मन्दाकिनी ॥ ७९ ॥

संक्षोभं द्रुतमाप भीष्मकसुतः सम्प्रापुरीर्ष्यां द्विषः
सन्तोषं प्रतिपेदिरे यदुजनाः कम्पं ययौ कुण्डिनम् ।
संजग्मुश्च कृतार्थतां यदुजना लज्जां दधौ चेदिराट्
गम्भीरोऽथ मुकुन्ददुन्दुभिरवो दिङ्मण्डलं व्यानशे ॥ ८० ॥

---

(७९) "जलनिधिमनुरूपं जह्नुकन्यावतीर्णा" इत्यजेन्दुमतीसमागमे काळिदासः ॥

पवनजवनत्वङ्गत्तुङ्गस्फुरत्तुरगक्षत-
क्षितितलमिळद्धूळीपाळीकराळितदिङ्मुखाः ।
कुटिलचटुलभ्रूवल्लीकाः स्फुरद्भ्रुकुटीलता-
जटिलनिटिलाः कोपाद्भूपा ययुर्मधुसूदनम् ॥ ८१ ॥

अहत्वा पद्माक्षं सपदि न विशाम्यद्य नगरी-
मिति क्रुद्धं युद्धं विदधतममुं भीष्मकसुतम् ।
विरूपं तं कृत्वा हरिरपि च बध्वा बलगिरा
पुनर्मुक्त्वा जित्वा नृपकुलमगच्छन्निजपुरीम् ॥ ८२ ॥

इति शङ्करकविकृते श्रीकृष्णविजये
नवमः सर्गः ।

दशमः सर्गः ।

ततो यथावत्तरुणीशिखामणिं परं प्रसन्नः परिणीय रुग्मिणीम् ।
अनिन्द्यशीलामधिरूढयौवनामरीरमत्तामरविन्दलोचनः ॥ १ ॥

---

(१) अरीरमत् = रमयामास ॥

मुखं निजं पश्यति संमुखीनतां
मुमोच सा पृच्छति मौनमाददे ।
करेण काञ्चीं स्पृशति प्रिये ययौ
त्रपां च कम्पं च कुरङ्गलोचना ॥ २ ॥

यदा तनीयान्मदनोऽथ चापलं विधातुमुत्थानमगान्मृगीदृशः ।
तदा समुत्थाय रुषेव सत्वरं त्रपा च भीतिश्च शमं निनाय तम् ॥

मुखं मुकुन्दस्य तदिन्दुमण्डलं न चात्र संदेहलवोऽपि मादृशाम्
तदग्रतोऽभूत्तरसा मृगीदृशो निमीलनं यन्नयनारविन्दयोः ॥ ४

कदाचिदेनां कमनीं त्रपाकुलां करेण गृह्णन् कमलेक्षणो हठात् ।
मुखेन्दुमस्या मुकुलीकृतेक्षणं मुहुः स चुम्बन् मुदितः स्मितं ययौ

निरुन्धतीं तां करपल्लवं हरेर्निरीक्ष्य काञ्चीगुणमूलचञ्चलम् ।
स्वयं प्रियं कर्तुमिवास्य योषितो नितम्बबिम्बाज्जगळेऽथ वाससा ॥

दिनानि सा मौनमवाप्य कानिचित्सखीसमक्षं पुनरैक्षत प्रियम् ।
पुनश्शनैराह तदुत्तरं क्रमात् प्रगल्भतामाप चकोरलोचना ॥ ७ ॥

निशात्यये निश्वसिताकुलालकं नवीनदन्तव्रणबन्धुराधरम् ।
प्रियामुखं जागरघूर्णितेक्षणं मुदं ययौ वीक्ष्य सरोरुहेक्षणः ॥८॥

कलासु बाला सकलासु पेशला विलासमेवं विविधं वितन्वती ।
क्रमादतीतासु निशासु कासुचित्तनूजरत्नं जनयांचकार सा ॥ ९ ॥

तदैव सिन्धौ विससर्ज शम्बरः सुतं * ततः कोऽपि झषस्तमग्रसीत्
झषं च तं जालगृहीतमानयन्निकेतनं शाम्बरमाशु धीवराः ॥१०॥
विदर्भराजन्यतनूद्भवासुते तटित्प्रकाशेन तुलामुपेयुषि ।
अदभ्रबाष्पाम्बुकदम्बवर्षिणो यदुप्रवीरा जलदव्रतं ययुः ॥ ११ ॥
विदारिते शष्कुलया महाझषे तदीयसूदैस्तरसा तदन्तरात् ।
समीरभिन्नादिव बालभास्करो वलाहकादाविरभूत् कुमारकः १२॥
विषादिनी तन्नगरीनिषादिनी तदा रतिर्नारदवाक्यगौरवात् ।
मनोहरं तं मकरध्वजं प्रियं विवर्धयामास समृद्धसंमदा ॥ १३ ॥
व यथा यथा भार्गविकारभद्रया मनोभवो विभ्रममाप भद्रया ।
तथा तथा रागविकारसूचिनी रतेश्च लीलाजनि धैर्यमोचिनी १४
तरङ्गितापाङ्गविलासशालिनी कुरङ्गनेत्रा कुसुमायुधेन सा ।
विशङ्कमानेन विचारिताखिलं निवेदयामास निजोद्भवादिकम् १५
वितीर्य विद्यां महतीं महात्मना निपात्य भर्त्रा युधि शाम्बरं शिरः
विलासिनी सा वियदन्तगामिनी निनाय कान्तं निजतातमन्दिरम्
पुरीं प्रपन्नं पुरुषं मनोहरं समं तरुण्या सरसीरुहेक्षणम् ।
मुकुन्दतुल्यं मुहुरापुरद्भुतं कुतूहलाद्वीक्ष्य कुरङ्गलोचनम् ॥१७॥
पयोधरः प्रस्नुत एव तं सुतं जगाद सद्यो जननीं ससंशयाम् ।

---

* स केनापि झषेण जग्रसे इति वा पाठः ॥

पुनस्तमुद्दिश्य तु नारदेरितं जगाम शङ्के पुनरुक्ततां वचः॥१८॥

इयानभूत् पौरजनस्य संमदस्तदेति वक्तुं न हि शक्नुमो वयम्।
पयोनिधेः पार्वणचन्द्रदर्शने पयःप्रवृद्धिं तुलयेत कः पुमान् १९॥

समेत्य सत्राजिदथ स्यमन्तकं मणिं महान्तं महसामधीश्वरात्।
दधद्गले तं दश दीपयन् दिशो दिदेश लोकाय दिनेशसंशयम्२०

सरोरुहाक्षाय स याचते मणिं तदा ददौ नैव तमोविमोहितः।
किमत्र चित्रं धनलुब्धचेतसो जनस्य सत्पात्रविवेकिता कुतः २१

मृगाधिराजो मृगयापरं वने निहत्य तत्सोदरमग्रहीन्मणिम्।
विधाय तं प्रत्यपि तादृशीं दशामगाद्गुहां तत्क्षणमृक्षपुङ्गवः २२

प्रसेनहन्तेति मणिस्पृहावशाद्विशङ्कितो विश्वजनेन केशवः।
वने समं बन्धुजनेन सञ्चरन् परं प्रमार्ष्टुं परिवादमैहत॥२३॥

निविश्य कृष्णेन निजं गुहान्तरं नियुध्य निष्पिष्टतनुः स जाम्बवान्
स्तुवन्नतस्तच्चरणे तदा ददौ मणिं च तां जाम्बवतीं च नन्दनाम्॥

सतामभीष्टार्थसमुद्यतात्मनां विशिष्टमन्यच्च भवेत् प्रयोजनम्।
स्यमन्तकं रत्नमवाप्य यत्नतः स कन्यकारत्नमपि प्रपेदिवान्२५

समेत्य सत्राजितमाह्वयन्मणिं समर्पयामास सरोजलोचनः।
तदा स रत्नं च नमन्मुखाम्बुजत्रपां च भीतिं च समं समाददे॥

निजापराधप्रशमाय शार्ङ्गिणे मणिं ददौ तं सह सत्यभामया।
सुतामयं रत्नमयं समाददे स्यमन्तकाख्यं न सरोजलोचनः २७॥

कदापि दग्धान् करुणापयोनिधिर्निशम्य पार्थान्निरवद्यमानसान् ।
समेतशोकः सह सीरपाणिना पुरीं कुरूणां पुरुषोत्तमो ययौ२८॥
गते मुकुन्दे कृतवर्मगान्दिनीतनूजयोः प्रेरणया सरोषयोः ।
अघानि सत्राजिदहारि च क्षणात्स्यमन्तकाख्यः शतधन्वना मणिः
अनर्गलाश्रुस्नपितास्यपङ्कजां वधात् पितुर्वीक्ष्य निजां नितम्बिनीम्
उपागतामुत्कटरोषभीषणः परः पुमान् द्वारवतीमुपागमत् ॥३०॥
स्यमन्तकं दानपतौ निधाय तं पलायमानस्य तदा तुरङ्गिणः ।
जहार शीर्षं शतधन्वनः क्षणादनुप्रधावन्नरविन्दलोचनः ॥ ३१ ॥
अलब्धरत्नः पुनरागतः पुरीं भयार्तमाहूय स गान्दिनीसुतम् ।
ततः समादाय मणिं सभान्तरे तदैव तस्मै प्रददौ मृदुस्मितः ३२
पुरन्दरप्रस्थगतः पुरातनः पुमान् कदाचित्सह सव्यसाचिना ।
विहर्तुकामो विपिनान्तरे चरन् कालिन्दकन्यातटकाननं ययौ ३३
तरङ्गिणीतीरसमीपचारिणीं कुरङ्गशावप्रतिमल्ललोचनाम् ।
कृशोदरीं कामपि कन्यकामसौ कुशेशयाक्षो ललितां व्यलोकयत्
विचार्य सर्वं विजयोऽथ शासनान्मधोर्निहन्तुर्मदनाकुलीकृताम् ।
पयोजनेत्रं पतिमाप्तुमिच्छतीं कलिन्दकन्यां कथयांचकार सः३५
रथं समारोप्य रथाङ्गपाणिना पुरन्दरप्रस्थपुरीमनायि सा ।
तदीयसाहाय्यमवाप्य दग्धवान् स पाण्डवः खाण्डवकाननं ततः॥

---

(२९) अघानि = हतः ॥ (३१) दानपतिरक्रूरः ॥

मयेन निर्माप्य सभां महीभुजे पुरे पुराणः पुरुषो निराकुलः ।
कलिन्दपुत्र्या हृतया स्वयंवरे तथैव रेमे सह मित्रविन्दया ३७॥

निगृह्य सप्त प्रसभं वृषोत्तमान् जगाम सत्यां जगदेकनायकः ।
अवाप भद्रामथ केकयेश्वरात् सुलक्षणां मद्रपतेश्च लक्षणाम् ३८॥

निरीक्ष्य शक्रं नरकेण पीडितं खगेन्द्रमारुह्य मृगेन्द्रविक्रमः ।
ससत्यभामः सहसैव * तत्पुरः समीपमापत् सरसीरुहेक्षणः ३९॥

स्थिराणि संरोधकराणि वैरिणां निरस्य दुर्गाणि पुरस्य लीलया
दयाविहीनो गदया दिविस्पृशं रुरोज सालं च सरोजलोचनः ॥

निशातशूलोऽथ दशापि कम्पयन् दिशो निनादेन कुशेशयेक्षणम् ।
पराभवं कर्तुमरातिभीषणो मुरासुरः प्राप धराधरोपमः॥ ४१ ॥

यदा मुरेण प्रहितं शिलीमुखैर्बिभेद शूलं च गदां च माधवः ।
तदा मनांसि द्विषतां च नाकिनां सशूलतां निर्गदतां प्रपेदिरे ४२

सुदर्शनेनापि सुदुर्निरीक्ष्यतां गतेन चक्रेण स चक्रपाणिना ।
निकृत्तदर्पोद्धतमूर्धपञ्चकः परासुतां प्राप मुरासुरः क्षणात् ४३ ॥

हतेषु पीठप्रमुखेषु शौरिणा *रथान्तरे तत्र हतेषु सत्वरम् ।
मदोच्चलत्तुङ्गमतङ्गजास्थितः स्वयं प्रतस्थे नरकासुरः पुरात् ४४॥

---

(३९) समासान्तविधेरनित्यतयेदमुपपादनीयम्

(४२) द्विषतां सशूलता = सव्यथता । नाकिनां निर्गदता = निरातङ्कता ॥

(४४) * तदन्तरे तत्तनयेषु सत्वरामिति पाठान्तरम् ॥

कराळघोषाः करिणां घटास्तदा पयोधराणां पटिमानमाययुः ।
तदन्तराळेषु धुताः कृपाणिका भटैस्तटिद्भिः समतां प्रपेदिरे ४५॥

परिभ्रमत्पर्वतरूपगर्वितद्विपाधिपं बृंहितसिंहनिस्वनम ।
मुकुन्दवह्निः शरकीलमालया ददाह तद्दानवसैन्यकाननम् ॥४६॥

गजान् स भौमो गरुडेन पीडनं गरुत्समीरैर्गमितान् विलोकयन् ।
मुमोच शक्तिं मुरवैरिणि क्रुधा मुहुर्निनादैर्मुखरीकृताम्बरः ॥४७॥

तया स विद्धस्तरसा भुजान्तरे ततामं नो तामरसेक्षणो रणे ।
इषीकया किं वपुषि प्रयुक्तया विषीदति स्फीतमदो मनङ्गजः ४८॥

घनध्वनिर्नाकिकदम्बकोकिनां हरिध्वनिर्नारकदैत्यदन्तिनाम ।
प्रयाणतूर्यध्वनिरापदां तदा मुकुन्दशंखध्वनिरानशे दिशः ॥४९॥

सहैव शोकेन स नाकवासिनां सहैव डम्भेन तदीयवैरिणाम् ।
करस्थशूलस्य शिरस्तदा रुषा जहार शत्रोर्जगदेकनायकः ॥ ५० ॥

स्तुतः पृथिव्या नरकालयात् पुरीं स षट्सहस्राण्ययुतं च कन्यकाः
निनाय भूयांसि धनानि कुण्डलीद्वयीमदित्यै च ददौ जगत्पतिः॥

स पारिजातं सहसा जितामरः सवेगमुत्पाट्य सरोजलोचनः ।
अशीलयन्मान्मथतन्त्रनैपुणीं पुरीं प्रपन्नः परिणीय कन्यकाः ५२

---

(४६) कीलो ज्वाला ॥ (४७) गरुत् पक्षः ॥
(४८) नो ततामं = न ग्लानिमाप । इषीका = मुञ्जा ॥

अवापुरेकैकश आत्मजन्मनां प्रिया मुरारेर्दशकं क्रमादिमाः ।
विदर्भपुत्रीतनयोऽथ जग्मिवान् कळत्रितां भीष्मकसूनुकन्यया ॥
तनूजया भीष्मकसूनुजन्मनो विदर्भराजन्यभुवश्च कन्यया ।
अगाहिषातां गृहमेधिकव्रतं हरेश्च पौत्रः कृतवर्मनन्दनः ॥ ५४ ॥
सरुग्मिणीकः सबलो जगत्पतिस्ततो ययौ भोजकटाह्वयां पुरीम् ।
अभूत् पुरे तत्क्षणमक्षखेलनं महोत्सवे लाङ्गलपाणिरुग्मिणोः ॥
स तर्जितः संसदि तेन निर्जितश्छलेन मत्तेन खलेन रुग्मिणा ।
ततान पूजां परिघाय पश्यतो बलिं नृपौघस्य हली तदामुना ५६
हते कालिङ्गे हलिनापरे पुनः प्रदुद्रुवुः प्रोद्बलदोर्बले नृपाः ।
कथं सहेरन् करिकुम्भभेदिनं मृगाधिपं कातरचेतसो मृगाः ५७॥
चिरादथ प्रोद्यतवाद्यताडनात् प्रनर्तने नन्दितचन्द्रशेखरः ।
बभूव बाणो बहुभिर्युतो बलैर्बलेस्तनूजो बलिनां शिखामणिः ५८॥
तपस्विना तेन तरस्विना रणे प्रसन्नधीः स्वैरमसन्नचेतसा ।
पुराधिपत्वेन सुराधिपद्विषा तदा स वव्रे तरुणेन्दुशेखरः॥ ५९ ॥
अखण्डितो यद्भुजदण्डचण्डिमा सुपर्वणां गर्वविनोदलम्पटः ।
अभिद्रवन्नष्टमदद्रवानधात् समन्ततो दिक्षु दिगन्तदान्तिनः॥ ६० ॥
महामहीभृत्प्रतिमल्लविग्रहो लसज्जयश्रीलतिकाविलासिनाम ।

---

(६०) सुपर्वणां =देवानाम् ॥

सहस्रकं बाहुमहीरुहां वहन् ललास यः शङ्करपादकिङ्करः ॥६१॥
अलब्धतुल्यप्रतिमल्लसङ्गरप्रचण्डकण्डूलभुजो महासुरः ।
प्रतीक्ष्य तस्थौ वचसा पिनाकिनः स्वकेतुभङ्गं रणलाञ्छनीकृतम् ॥
उषाभिधा तस्य सुता सुरद्विषो नितम्बिनीमण्डलमौलिमालिका ।
ललास तारुण्यकलावती शनैर्विलासिनी बालमृगीविलोचना ६३
समेतनिद्रा निशि जातसंगमा सहानिरुद्धेन पुनः प्रबोधिनी ।
अभूददृष्ट्वा तमुषा विषादिनी कुमुद्वतीवाशु कुरङ्गलाञ्छनम् ६४॥
निशात्यये बाष्पजलाकुलेक्षणां क्षणे क्षणे वीक्ष्य मृगेक्षणामिमाम्
नमन्मुखीं वक्तुमनुन्मुखीं सखी शनैरजानादथ तन्मनोरुजम् ६५
तदा मुदा चित्रपटीपुटे तया विलिख्य वेगादथ चित्रलेखया ।
मृगीदृशो लोचनगोचरीकृता नवा युवानो भुवनत्रयीजुषः ६६॥
प्रदर्शितं वृष्णिषु कृष्णजन्मनः सुतं प्रियं सन्नमता मुखेन्दुना ।
परेण कम्पेन च कण्टकेन सा शशंस तस्यै शफरीविलोचना ६७
निनाय सा वृष्णिपुरान्नभश्चरी निरीक्ष्य खिन्नामथ वल्लभं सखीम् ।
तुषारनुन्नामवलोक्य पद्मिनीं प्रभातवेलेव मयूखमालिनम् ॥६८॥

श्यामां रहस्यनुपमां गुणभूमसीमां
कामात्मजोऽथ कमनीं कमनीयशीलाम् ।
कल्याणवेषसुषमां विषमेषुभिन्नां
धन्यां समां स रमया रमयांचकार ॥ ६९ ॥

शमयन्तममुं निजं विषादं रमयन्ती रमणं बहून्यहानि ।
सकलासु विचक्षणा कलासु क्षणकल्पानि निनाय पक्ष्मळाक्षी७०

अनुगतनिजयोधः सत्वरं प्राप्तसौधः
करकालितकृपाणः सर्पपाशेन बाणः ।
सपरिघभुजदण्डं सङ्गरोद्योगचण्डं
तदनु तमनिरुद्धं तत्र चक्रे निरुद्धम ॥ ७१ ॥

बलिप्रभववार्तया सपदि नारदेनोक्तया
बलिप्रतिभटान्विता यदुपुरोषिता रोषिताः ।
प्रचुक्षुभुरथ क्षणं क्षुभितदुर्निरीक्षस्फुर-
द्विपक्षविपिनक्षयक्षमतया दवा यादवाः ॥ ७२ ॥

भयपरवशभ्राम्यत्कूर्मेश्वरा धरणीरजः-
कवचितहरित्कूलाः कूलङ्कषीकृतसिन्धवः ।
समरजनिताशंसाः कंसारिसैन्यपरम्परा-
स्तराळितधनुर्बाणा बाणालयं रुरुधुः क्षणात् ॥ ७३ ॥

अस्त्रैः शस्त्रैश्चिवितैस्तत्र शूली
बाणप्राणत्राणकारुण्यशाली ।
युध्यन् क्रुध्यन् दारुणः शौरिणाशु
स्तम्भं नीतो जृम्भणास्त्रस्य शक्त्या ॥ ७४ ॥

चकम्पे मेदिन्या सह सुरवधूवामनयनै-
र्जजृम्भे धूळीभिः सह कळकलैः कङ्कवयसाम् ।
ववल्गे भूपालैः सह च करवाळैरधिरणं
निपेते दैतेयैः सह मृगदृशां बाष्पसलिलैः ॥ ७५ ॥

महति समरक्षोभे जाते दिवा च भुवा तथा
यदुमहिभुजां षण्डैर्गण्डैर्विपक्षमृगीदृशाम् ।
गळितरुधिरव्रातापाताद्विमानमणित्विषा
गुरुतररुषा बाष्पोद्रेकादवाप्यत शोणिमा ॥ ७६ ॥

खड्गच्छिन्नप्रोच्चलच्चण्डमुण्डा सर्वैर्देवैः साद्भुतं वीक्ष्यमाणा ।
भीभैर्भूमिः शोणितैः शोणिता सा चण्डाकारा चण्डिकेवाबभासे॥

स्कन्दाद्येषु पराजितेषु विगळन्मानासु सेनासु च
क्षीणासु त्वरितो रथेन विगतत्राणासु बाणासुरः ।
दिङ्नागश्रुतिकन्दरान् बधिरयन् घोषेण रोषेण तं
सम्प्रापत्समराय दारुणमितिर्घोराय नारायणम् ॥ ७८ ॥

बाणासुरं तं स विधाय बाणैः प्राणावशेषं करुणाविहीनः ।
विद्रावयामास रणात् क्षणेन मुद्रादरिद्राणबलो मुकुन्दः ॥ ७९ ॥

---

(७५) कङ्कवयसाम् = गृध्रपक्षिणाम् ॥

ऋच्छन्तं समिति निजज्वराभिभूतिं
गच्छन्तं शरणमथ ज्वरं पुरारेः ।
क्रन्दन्तं द्रुतमभयं प्रदाय भूयो
नन्दन्तं व्यतनुत नन्दगोपसूनुः ॥ ८० ॥

युध्वा बाणमतीव दर्पकलुषं जित्वास्य बाह्वाटवीं
छित्त्वा शिष्टचतुर्भुजं पुनरमुं श्रुत्वा गिरं शाङ्करीम् ।
मुक्त्वा संयुतयोषितं निजरथे कृत्वा च पौत्रं बलै-
र्गत्वा साकमसौ तुतोष नगरे स्थित्वा रमाकामुकः ॥ ८१ ॥

इति शङ्करकविकृते श्रीकृष्णविजये
दशमः सर्गः ।

एकादशः सर्गः ।

तदनु तरळभृङ्गकोळिरङ्गे कुरवकसङ्गसुगन्धिगन्धवाहे ।
उपवनकुहरे हरेस्तनूजा विहरणकौतुकशालिनो विचेरुः ॥ १ ॥
कुहचन ददृशुः कुमारकास्ते कुलिशभयादिव पर्वतं निलीनम् ।
कुतुकजनकमन्धकूपरन्ध्रे कृतवसतिं कृकलासमुत्पिपासाः ॥ २ ॥

मुहुरथ विहिता मुकुन्दपुत्रैर्झटिति तदुद्धरणोद्यतैः प्रयत्नाः ।
खलमतिषु कृता इवोपकाराः स्फुटमगमन्नफलत्वमेव सर्वे ॥ ३ ॥

निजसुतवचनान्नृगं स कूपात्समुदहरत् सहसैव वासुदेवः ।
भयपरवशितं भवात् पुमांसं चिरमिव निर्मलचित्स्वरूपबोधः ४॥

सरसिजनयनस्य भास्वतोऽग्रे मुहुरथ दीप्तिभरं समेत्य राज्ञः ।
अभजत विकळङ्कतां स चित्रं करकमले अपि कोरकोचकारः॥५॥

परमपुरुषपादकल्पशाखी किसलयितो नृपतेः किरीटभासा ।
समजनि फलितस्तु चित्रमेतत्सपदि मनोरथपादपस्तदीयः॥ ६ ॥

निजचरितमसौ निगद्य कृष्णं नृग इति विश्रुतकीर्तनो नृपेन्द्रः ।
प्रचुरकृतनुतिः प्रपद्य चाज्ञामुडुगणवर्त्मनि तूर्णमुत्पपात ॥ ७ ॥

तदनु स महसा तटिद्विलासं तरळितलोकविलोचनो वितन्वन् ।
शतमखनगरीनितम्बिनीनां शशिवदनो नयनोत्सवं वितेने ॥ ८॥

अथ मुसलधरो जगाम गोष्ठं विरहसमाकुलवल्लवीसमेतम् ।
विगतकुसुमचूतवल्लरीकं वनमिव रम्यतरो वसन्तकालः ॥ ९ ॥

हलिनमथ निरीक्ष्य पङ्कजाक्ष्यः प्रमदजलाचितलोचना व्यराजन्
शरदृतुमिव रम्यमम्बुजिन्यो मधुरसतुन्दिलसुन्दरारविन्दाः १०

विसृजति बलभद्रवारिवाहे हरिचरितामृतवारिपूरधाराः ।
विहरणमथ मानसे वधूनामतनुत हंस इव प्रमोदभारः ॥ ११ ॥

---

(४) भवात् = संसारात् ॥ (६) असङ्गतिरलङ्कृतिः ॥

हलधरवचनामृतेन पित्रोः शिशिरतरेण शशाम शोकवह्निः ।
मनसिजदहनो महानभीक्ष्णं मधुरगिरामथ मांसळीबभूव ॥१२॥

वपुषि हलभृतो नितम्बिनीनां युगपदपाङ्गपरम्परा पतन्ती ।
विकसितनवपुण्डरीकषण्डे शरदि मधुव्रतमण्डलीव रेजे॥ १३ ॥

विधुकरनिकुरुम्बचुम्बितायां मधुकरनिर्भरपुष्पवाटिकायाम् ।
विपिनभुवि समं विलासिनीभिर्विविधमसौ विजहार सीरपाणिः॥

कुमुदमधु निपीय मन्दमन्दं किमपि मधुव्रतनिस्वनेन जल्पन् ।
मदविवश इव स्खलन्निकुञ्जे वनमथ मन्थरमाप गन्धवाहः १५॥

प्रचुरपरिमळा प्रसूनकेतोर्भुवनवशीकरणाय सिद्धविद्या ।
मधुकरनिकरं तरङ्गयन्ती तरुकुहरादथ वारुणी पपात ॥ १६ ॥

मधुरसनकुतूहलाकुलानां मधुरविलासतरङ्गितेक्षणानाम् ।
धनुरिव मदनस्य सन्निवेशो मदिरदृशामथ मण्डलीबभूव॥ १७॥

चुलुकितधृतिभिः स चुम्बनैस्ताश्चतुरतरैरपि चाटुवाक्यगुम्भैः ।
मधुरिमभवनैश्च मन्दहासैः परवशयन् विततान पानगोष्ठीम् १८

तरळमजनि मानसं च नेत्रं विरळमजायत लज्जितं च धैर्यम् ।
अभजत हृदयानि रागभारो मुखकमलानि च मुग्धलोचनानाम् ।

द्रुतमथ मदिरा निपीयमाना वचासि मृदौ गमने च वल्गुहासे ।
अतिललितमुपादिशद्विलासं शिवशिव कंचन चञ्चलेक्षणानाम् ॥

मदभरशमितत्रपाद्वधूनामथ मनसः प्रससार चित्तजन्मा ।

तरणिकरनिरस्यमानतन्द्रात्सरसिरुहादिव सौरभातिरेकः॥ २१ ॥
असकलवचसामलज्जितानां मदभरपाटलघूर्णितेक्षणानाम् ।
प्रकटतरमभूत् प्रवर्धमानं मधुरगिरामथ मारपारवश्यम् ॥ २२ ॥
हरति निवसनं हठेन देवे मदभरमूढधियां मनस्विनीनाम् ।
व्यतनुत नियतं विरोधवाचं कळकळनिस्वनकैतवेन काञ्ची २३॥
करकमलनिरस्तकञ्चुळीकं मुसलधरेण मुहुस्त्रपाकुलानाम् ।
कवचितमजनिष्ट कण्टकौघैः कुचतटमाशु कुरङ्गलोचनानाम् २४॥
अतिमहदिदमद्भुतं तदानीं निजरुचिपूरनिरस्तकैरवश्रीः ।
परमनयत पद्मिनीविकासं रजनिषु तत्र स रेवतीसहायः॥ २५ ॥
करकिसलयमाशु धून्वतीनां मुसलिनि चुम्बति मुग्धमोष्ठबिम्बम्
मुकुळितनयनं मुखं वधूनां सुरतरसात् कृतसीत्कृतं चकाशे २६॥
सुचिरमिह विहृत्य सूर्यपुत्रीं विहरणमम्बुनि कर्तुमाजुहाव ।
द्रुतमनुपगतां हलेन चैनामखिलजगत्पतिराचकर्ष देवः ॥ २७ ॥
विविधनुतिकरीं विमुच्य भूयस्तपनसुतां तरुणीसखो जगाहे ।
तरळतरतरङ्गरङ्गरङ्गत्सरसिजसौरभपूरिताम्बुपूराम् ॥ २८ ॥

इति विहरति तत्र सीरपाणौ परुषतरामथ पौण्ड्रकस्य वाचम् ।
सरसिजनयनो निशम्य दूतात् सपदि रुषा नगरोदरात् प्रतस्थे ॥

---

(२५) रेवतीसहायो बलरामश्चन्द्रश्च । पद्मिनी स्त्रीजातिः कमलिनी च ॥

द्रुतमथ सुरकार्यबद्धदीक्षः स्फुटतरकोपहुताशदुर्निरीक्षः ।
रथवरमधिरुह्य घूर्णिताक्षः पुरमगमद् द्विषतः सरोरुहाक्षः ॥३०॥

विबुधनिवहबर्हिणेषु वैरिव्रजभुजगेष्वपि गर्जितायमानः ।
पटुरचलदरीषु पाञ्चजन्यध्वनिरुदजृम्भत कम्पिताखिलाशः ३१॥

रथतुरगकरीन्द्रषण्डचण्डध्वनिभरमांसळभूमिभृन्निकुञ्जः ।
ध्वजपटपरिलीढदिव्यवर्त्मा पुरवरतो निरियाय सैन्यराशिः ३२॥

सरसिजनयनोऽथ सायकौघैः क्षयमनयत्सकलं क्षणेन सैन्यम् ।
कथमभिमुखतां कराळभासस्तिमिरततिर्विदधीत तीव्रभानोः ३३॥

सपदि दितिसुतैः सहायभूतैः सह रभसादथ पौण्ड्रकाभिधानः ।
समरममरवैरिसार्वभौमो मुररिपुणा सह मूढधीर्वितेने ॥ ३४ ॥

इषुरथ रुधिरैः कृताभिषेकः पिशितरसाङ्कितकुङ्कुमाङ्गरागः ।
सुरदमयितुरात्तदेवकार्यस्त्वरितमसून् कबळीचकार शत्रोः ॥३५॥

सकरुण इव सायको मुरारेर्मुखरितदिग्वलयं मुहुर्निनादैः ।
पुनरपि तरसा पुरेव शत्रोः सहचरमेव चकार काशिराजम् ३६॥

विधिवदथ विधाय दक्षिणाग्नेः परिचरणं परमेश्वरप्रसादात् ।
यदुपुरदहनार्थमाभिचारज्वलनममुञ्चत काशिराजसूनुः ॥ ३७ ॥

यदुपुरदहने गतानुकम्पे विस्मृमरकीलविहस्यमानचम्पे ।
किमिति वियति सञ्चलन्निलिम्पे चलति हविर्भुजि मेदिनी चकम्पे॥

अपरमथ विशङ्क्य बाडवाग्निं चकित इव क्षितिकम्पवेपमानः ।
ज्वलनमुपसरन्तमीक्षमाणो जलनिधिराकुलितोर्मिबाहुरासीत् ३९॥

झटिति झटझटस्फुटत्स्फुलिङ्गः प्रकटजटालकठोरकीलिमालः ।
पुरमथ दहनः पुराणपुंसो भुवनभयङ्करभात्कृतिः प्रपेदे ॥ ४० ॥

प्रळयदहनकोटिदुर्निरीक्षे ज्वलति जगत्पतिशासनात्तदानीम् ।
उपसरति सुदर्शने स वह्निर्व्यतनुत तन्महसि स्फुलिङ्गशङ्काम् ४१

भयपरवशितः प्रधावमानः सपदि तदीयमहःकृतावमानः ।
अदहदथ सुदाक्षिणं हताशं कृतसवनं कुपितस्तदा हुताशः॥ ४२ ॥

द्रुतममुमनुधाव्य तीव्रतेजश्चुलुकितचण्डमरीचिदीप्तिराशिः ।
रुदितचपलदीनपौरलोकं पुरमपि तस्य कृशानुसादकार्षीत् ॥४३॥

सकलजगति सञ्चरन् कदाचिन्नरकसखो नरलोकधूमकेतुः ।
कपिलचटुलकेसरापदेशात्तरळितकोपहुताशदीप्तिमालः ॥ ४४ ॥

विरचित इव पङ्कजासनेन स्फुटमयसां परमाणुसंचयेन ।
भुवनतलजुषां विपत्समूहो जगति नृणामिव जङ्गमो वपुष्मान् ॥

गिरिषु परुषबाहुदण्डचण्डप्रहरणघूर्णितगण्डशैलषण्डः ।
अधिकविधुतदिक्कदम्बहिक्काचकितकुरङ्गपतङ्गकाननान्तः ॥ ४६ ॥

विवशितहृदयं विलासभूम्ना चतुरतरेण चकोरलोचनानाम् ।
विपिनभुवि बलं विहारलोलं विटपमृगो विविदाह्वयः प्रपेदे ४७॥

विवशविटपबाहवस्तदानीं कपिरभसाक्रमणेन कम्प्यमानाः ।
रुरुदुरिव गळन्मरन्दबाष्पाः पतगकुलक्वाणितेन पादपौघाः ॥४८॥

कापिभरनमिता बलोपकण्ठे नमनमिवादधती विकीर्य बाष्पम् ।

तरुततिरथ तारभृङ्गनादैरतनुत पालय पालयेति वाचः ॥ ४९ ॥
चपलितविपिनं चरन्तमेनं विपुलमदं कपिलोकसार्वभौमम् ।
अचलितबलमश्मना तदानीमचलसमाकृतिमाजघान देवः॥५०॥
सरभसमुपलाहतेन घूर्णन् कपिरथ मन्दरभूभृतेव सिन्धुः ।
प्रकटितमकरोत् प्रवर्धमानं कटुतरकोपहुताशकाळकूटम् ॥ ५१ ॥
सपदि समरघोरधीरवाणिर्बहुविधमत्र नियुध्य सीरपाणिः ।
भुजपरिघबलेन पूर्णरोषं कपिवरमाशु पिपेष चूर्णपेषम् ॥ ५२ ॥
विविधमिति विहृत्य तत्र लीलाविवशितगोपकुटुम्बिनीकदम्बः ।
अरिपरिषदलीढशक्तिशाली निजपुरमाप हलो विपन्नपाली ५३ ॥
तदनु कृतमतिं स्वयंवरार्थं कुरुसदसः कुरुराजसूनुकन्याम् ।
परिमळलहरीं पयोरुहिण्याः पवन इवाहृत पद्मनाभसूनुः॥ ५४ ॥
प्रथममपि दृढं कटाक्षपाशैर्निगळितमेव चकोरलोचनायाः ।
बलिनमपि रणे बबन्धुरेनं कुपितधियः कुरुवंशमेदिनीन्द्राः॥५५॥
कुरुनृपतिषु रोषरूषितानां समरसमुद्यमवेगमुन्नमन्तम् ।
अनमयत हलायुधो यदूनां तदनु स विन्ध्यमिवांशु कुम्भजन्मा॥
करिनगरमुपेत्य रौहिणेयः कुरुनृपतीन् प्रति सान्त्वनं वितेने ।
वचनमविगणय्य तस्य मग्नैस्तमसि नृपैरथ तर्जना बभूवे ॥ ५७ ॥
मधुरिपुसुतबन्धनेन्धनेन क्षितिपतिमण्डलवाक्यचण्डवातैः ।
ज्वलितमथ बलस्य कोपवह्निं नयनसरोजपिशङ्गिमा शशंस॥५८॥

त्रिदशपुरकवाटपाटनायै रिपुसदसामिव कुञ्चिकां प्रवेशे ।
विटपमिव यशस्तरोरगृह्णात् करकमलेन हलं स कामपालः ५९

करिपुरमथ तेन विष्णुपद्यां सपदि पिपातयिषुस्तदाचकर्ष ।
स्नपयितुमिव दुर्दमं निषादी सपदि मतङ्गजमङ्कुशेन रोषात् ॥

शरणमथ गतेषु कौरवेषु प्रशमनमाप रुषः प्रलम्बहन्ता ।
प्रभवति खलु कोपसर्पशान्त्यै नमनमहौषधमेव सज्जनानाम् ६१

गतवति रुषिते बलः प्रसन्नो नृपतिजनैरभिगम्यतां प्रपेदे ।
कलुषितसलिले गते करीन्द्रे ह्रद इव हंसकदम्बकैर्गभीरः॥ ६२ ॥

कुरुनृपतिजनैः स पूज्यमानः स्तुतिमुखरैः प्रमदेन योज्यमानः ।
नरपतिसुतया सहैव साम्बं नगरमवापयदाशु रौहिणेयः॥ ६३ ॥

युवतिषु सकलास्वसौ कथं वा युगपदुपैति रतिं सरोजनेत्रः ।
इति विविदिषुरेकदा मुरारेर्नगरमगादथ नारदो मुनीन्द्रः॥ ६४ ॥

तदनु स कनकासने निषण्णं तरुणमिवाम्बुधरं सुमेरुशृङ्गे ।
परिसरपदवीचलद्बलाकासमरुचिचामरजालशोभमानम ॥ ६५ ॥

स्मितरुचिघनसारचूर्णपूरैस्तरलकटाक्षसदञ्जनेन मिश्रैः ।
निजनिकटजुषां नितम्बिनीनां नयनसरोजमतीव नन्दयन्तम् ॥

---

(६१) प्रणिपातप्रतीकारः संरम्भो हि महात्मनामिति कालिदासः ॥
(६२) रुषिते गतवति = कोपे गते ॥

वपुषि कुवलयस्य कान्तिसारं हरति हठात्तदभावयाचनायै ।
शरणमिव गतां शशाङ्ककान्तिं चरणनखद्युतिमञ्जरीं वहन्तम् ६७

अपरमिव कुमुद्वतीसहायं रिपुकुलशोकतमांसि वर्धयन्तम् ।
दुरितजलनिधिं च शोषयन्तं मरतकनीलमपश्यदम्बुजाक्षम् ६८॥

सुरमुनिरथ कुन्दकुग्मळश्रीर्मुरमथितारमुपेत्य नीलमेघम् ।
स्फुरित इव कुमुद्वतीसहायो मरतकभूधरसन्निधौ बभासे॥ ६९ ॥

मुनिरथ कृतसंनतिर्मुकुन्दे मधुरसशीकरमञ्जुळैर्वचोभिः ।
विरचितनुतिरालयादमुष्मादपरवधूजनमन्दिराणि भेजे॥ ७० ॥

प्रतियुवतिगृहं प्रवर्तमानं त्रिभुवननाथमनेकधा स पश्यन् ।
स्तुतिमुखरितदिङ्मुखः प्रणम्य त्रिदिवमवाप सविस्मयो मुनीन्द्रः॥

अथ मगधनरेन्द्रयन्त्रितानां मधुरिपुवद्धाधियां महीपतीनाम् ।
व्यसनमधिसभं व्यजिज्ञपत्तं सरसिजनेत्रमुपेत्य कोऽपि दूतः७२॥

परमथनविधिं विचिन्त्य तिष्ठन्मुरमथनः शरणं च संश्रितानाम् ।
सुरमुनिवचनेन राजसूयं परममतेरशृणोदजातशत्रोः ॥ ७३ ॥

विविधमथ मिथो विचार्यमाणस्थिरनयपद्धतिरुद्धवेन साकम् ।
मगधपतिवधे च राजसूये दृढतरमाप स यौगपद्यचिन्ताम्॥७४॥

अथ नियमितसिद्धिरुद्धतोद्यत्पटुपटहध्वनिरुद्धसिद्धमार्गः ।
गिरिवरगुरुगन्धसिन्धुराळीविहरणबन्धुरसैन्यसिन्धुराजः ॥७५॥

---

(७५) गन्धसिन्धुरो = मत्तगजः ॥

भरगरिमविषण्णभोगिराजस्तुरगखुरोद्धतपांसुमांसळाशः ।
उरगपतिरिपुध्वजस्तदानीं निरगमदेष रथेन राजधान्याः ॥७६॥

हयपरिवृढहेषितेन भेरीपटुरटितेन करीन्द्रबृंहितेन ।
प्रकटकळकळेन सैनिकानां प्रतिनिनदेन च विश्वमापुपूरे ॥७७॥

विविधजनपदान् नदीश्च पश्चादकुरुत सत्वरमम्बुजाक्षसेना ।
जलनिधिरसितं च तूर्यघोषो जलदपथं च महीरजःप्रपञ्चः ७८॥

मुररिपुपटहो रवेण तावन्नगरमपूरयदाशु पाण्डवानाम् ।
हृदयमथ स निस्वनस्तदीयं प्रमदभरेण स लोचनं च बाष्पैः७९॥

कुवलयितगवाक्षवीक्षणानां कुतुकभरेण कुरङ्गलोचनानाम् ।
नयनपुटनिपतिरूपलक्ष्मीर्नगरमजातरिपोरगात् विधामा॥ ८० ॥

रिपुभयरहिते स्थिरे विशाले विमलतरे कृतविस्मये जनानाम् ।
सुचिरमथ पुरे सुखेन रेमे मधुमथनो मनसीव धर्मसूनोः ॥८१॥

निजभुजसदृशैर्नृपः सगर्भ्यैः सरसिरुहाक्षगिरा यियक्षमाणः ।
विमतपरिभवी विजित्य धात्रीममितमसौ धनमार्जयांचकार ८२॥

निरवधिभिरमुं निरीक्षमाणा धनविभवैः सह धर्मराजसूनुम् ।
निजमपि रमणं निरस्तदर्पा नियतमलज्जत यक्षराजलक्ष्मीः ८३॥

---

(७८) पश्चादकुरुत = लङ्घयामास ॥

तदनु धरणिदेवचिह्नभाजः कृतमतयः क्रतुराजविघ्नशान्त्यै ।
मगधनरपतेर्निवेशमापुर्मधुरिपुशक्रतनूजभीमसेनाः ॥ ८४ ॥

भुवनविजयिनो भुजास्तदीयाः प्रकटधनुर्गुण*घर्षलाञ्छनेन ।
वपुरपि महसा शशंसुरेषां कृतकमहीसुरतां नृपाय तस्मै ॥ ८५ ॥

अथ सरसिरुहेक्षणः स्मितांशुप्रकरविराजितवक्त्रवारिजश्रीः ।
निजमपि स निगद्य तत्त्वमेनं मगधपतिं व्यतनोन्नियुद्धयाच्ञाम् ॥

नृपतिरथ विहस्य कृष्णजिष्णू समरविधाववधीर्य जातधैर्यः ।
प्रकटितरुषितः स्फुटं तदानीमघटत मारुतजन्मना नियोद्धुम् ॥

विविधविहितयुद्धमिद्धकोपो मगधपतिं मधुसूदनोपदेशात् ।
त्रिदलितविपरीतयोजितार्धद्वितयमपातयदाशु भीमसेनः ॥ ८८ ॥

अथ धरणिभृतां नियन्त्रितानां मगधनृपेन्द्रशरीरबन्धभेदः ।
समजनि सहसैव सेतुबन्धो गुरुतरदुःखपयोनिधिं तरीतुम् ८९॥

नृपमथ सुतमस्य कल्पयित्वा निगळगतान् नृपतींश्च तर्पयित्वा ।
सपदि मुदमितः सभीमजिष्णुः पुरवरमाप स पुण्डरीकनेत्रः ९०॥

आर्तिकारिणि नृणां निहतेऽस्मिन् पार्थिवे मुनिजनान्नरपालः ।
आर्त्विजं सपदि कर्म विधातुं कीर्तनीयचरितानथ वव्रे ॥ ९१ ॥

छत्रजालवृतमित्रतेजसः पार्थिवा जगति पार्थबान्धवाः ।

---

* कर्षलाञ्छनेनेत्यपि पाठः ॥

अध्वरं तदनु बद्धकौतुका जग्मुराशु धृतरुक्मराशयः ॥ ९२ ॥

क्वचिन्मित्रैः क्षत्रैः क्वचिदपि बुधैः क्वापि विबुधै-
र्द्विजव्रातैः स्फीतैः क्वचन मुखरैः सैन्यनिकरैः ।
तुरङ्गैरुत्तुङ्गैः क्वचन करिभिः क्वापि गुरुभिः
क्वचिद्द्रव्यैर्भव्यैरजनि नगरी विस्मयकरी ॥ ९३ ॥

क्षान्त्या तापविनाशनेन जगतां तेजःप्रकर्षाद्बला-
द्वैमल्याच्च तमःकदम्बशमनाल्लोकस्य चाह्लादनात् ।
सप्तानामपि पूर्वमेव वपुषां तादात्म्यमेष श्रितः
शम्भोर्योगविधौ बभूव चरमा मूर्तिस्तदा पार्थिवः॥ ९४ ॥

श्रुतिं साम्नां घोषस्त्वचमुदितधूमश्च पवनो
हविर्गन्धो नासां दृशमपि महान् भूतिविभवः ।
रसज्ञां स्वादीयान् प्रसरदमृतो भोजनरसो
द्विजानामानन्दं * विधिवदनयन्नध्वरविधौ ॥ ९५ ॥

त्राता विश्वैकनाथः सरसिजनयनो धर्मसूनुश्च यष्टा
दासाः सर्वे नरेन्द्राः क्रतुरपि महितो राजसूयाभिधानः ।

---

(९४) पृथिवी सलिलं तेजो वायुराकाशमेव च । सूर्याचन्द्रमसौ सोमयाजी चेत्यष्ट मूर्तयः । इति क्रमेण मूर्तयो ज्ञातव्याः । (९५) * युगपदनयन्निति हृद्यतरं पाठान्तरम् ।

ऋत्विग्वर्या मुनीन्द्रा दिवि भुवि च परं दुर्लभो भूतिभूमा
किं किं तस्मिन् जनानां नरपतियजने कौतुकं नाततान ९६॥

शान्तस्वान्तं वैरिसेनानदीनां ग्रीष्मं भीष्मं सन्निविष्टं सभायाम् ।
सूरीन्द्राणामग्रणीरग्रपूजां कस्मै कुर्यामित्यपृच्छन्नरेन्द्रः ॥ ९७ ॥

गङ्गासुतो नृपतिमाह सभान्तराळे
किं वा विचार्यमिह तिष्ठति पद्मनाभे ।
अभ्यर्चितुं दिनकरं निखिलग्रहाणां
मध्ये क एव कुरुते भुवने विचारम् ॥ ९८ ॥

पैतामहं वचनमत्र निशम्य पुंसे
पीताम्बराय सवने भुवनेश्वराय ।
आर्द्रीकृतो झटिति तत्पदपद्मभक्त्या
माद्रीसुतोऽथ विधिना व्यतनोत्सपर्याम ॥ ९९ ॥

तदनु कलुषिताक्षस्तर्जिताम्भोरुहाक्षः
प्रकटरुषितरूक्षः प्रोत्थितो दुर्निरीक्षः ।
समरविधिषु शूरः संचलाद्रीन्द्रघोरः
समचलदतिधीरः सत्वरं चेदिवीरः ॥ १०० ॥

रुष्टस्याथ रमापतेः करगतो मूर्धानमस्योद्धतं
सेहे नैव सुदर्शनो रिपुबलच्छेदी स चेदीशितुः ।

एतस्मिन् पतिते प्रदुद्रुवुरथो भूपास्तदीयाः कथं
संभिन्नद्विरदाधिपस्य कळभास्तिष्ठेयुरग्रे हरेः ॥ १०१ ॥

कण्ठक्षरत्क्षतजशोणरुचस्तदङ्गा-
त्तेजो विवेश तरसा सरसीरुहाक्षम् ।
सन्ध्यामयूखचयकञ्चुकितात् पयोदा-
न्नीलाम्बुवाहमिव लोलतटित्प्रकाशः ॥ १०२ ॥

संपूर्य द्विजवाञ्छितं वितरणैः संतर्प्य नाकीश्वरान्
संपूज्य प्रथितान्मुनीन् प्रमुदितान् सम्भाव्य भूमीश्वरान् ।
संतोष्य स्वजनान् समाप्य च मखं सम्राट् स लक्ष्मीपतेः
साहाय्यप्लवमाश्रितः समतरत् संकल्पपाथोनिधिम् ॥ १०३॥

इति शङ्करकविकृते श्रीकृष्णविजये
एकादशः सर्गः ।

द्वादशः सर्गः ।

भूतिं यागे भूयसीं पाण्डवानां वश्यानेषां पश्यता च क्षितीन्द्रान्
स्पर्धाभाजा वर्धमाना तदानीमार्तिः प्रापे धार्तराष्ट्रेण गूढम् ॥ १॥
लोकानन्दं कुर्वति क्षोणिपाले बुद्धिर्म्लाना कौरवस्यैव जज्ञे ।
विश्वोल्लासं वर्धयत्येधमाने भासामीशे कैरवस्येव लक्ष्मीः ॥ २ ॥
पातं याते कुत्रचित्तत्र चास्मिन् पाथोमध्ये भूतलभ्रान्तिहेतोः ।
राज्ञामग्रे याज्ञसेन्या समेतो हासं चक्रे हस्तताळेन भीमः॥ ३ ॥
हासप्रौढिश्चन्द्रिकेवारविन्दं कौरव्यास्यं म्लापयन्ती तदीया ।
एष्यत्क्षोणीभारविध्वंसनाम्नो नान्दीभावं नाटकस्य प्रपेदे ॥ ४ ॥
आज्ञां लब्ध्वा तत्र राज्ञां समीपे सम्राजोऽसौ व्रीळनम्राननेन्दुः ।
इन्द्रप्रस्थान्मन्दिरं गन्तुमैच्छत् सार्धं सैन्यैरार्तिमान् धार्तराष्ट्रः ॥
राजत्क्षोणीपालमौलेः सभान्तात्तेजोहीनः कौरवो निर्जगाम ।
व्योमोद्देशात् प्रस्फुरत्तिग्मभानोः प्रातर्यद्वत् पौर्णमासीशशाङ्कः ॥
खेदी नष्टं वीक्ष्य चेदीशितारं शून्यीभावं वृष्णिवंशं निनीषुः ।
स्थाणुं साल्वः प्रीणयित्वा तपोभिः सौभं लेभे लोहरूपं विमानम्॥
साकं मेघध्वानया सेनयाथ स्वैरं भङ्क्तुं द्वारकां क्रूरकर्मा ।

मायी मायावैभवात् कामयाने संस्थायासौ निर्ययौ व्योमयाने ॥
कृष्णे याते पार्थगेहं समेतः सैन्येनासौ द्वारकां निर्ममन्थ ।
अन्तर्भूते पद्मिनीं तिग्मभानौ नीहारेणेवानुयातः प्रदोषः ॥ ९ ॥
सेनाघोषैर्भीषणो बाणवर्षी नानायानो यादवानां विमानः ।
भीतिं चक्रे निस्वनन्नम्बुपूरं व्याकीर्येव प्रोत्पतन् कल्पमेघः ॥१०॥
साहङ्काराः सङ्गरे निर्विकारा *लोहाकारा लोलशैलानुकाराः ।
गाढक्रोधा वृष्णिसेनाः सबाधाश्चक्रुर्योधाः सौभतो दुर्निरोधाः ११
साल्वामात्यं सत्वरं कृष्णसूनुस्तान्तः किञ्चित्तद्गदाताडनेन ।
रुध्वा युध्वा नीरथं निस्तुरङ्गं निश्चापेषुं निर्गतासुं चकार॥ १२ ॥
साल्वेनैवं पीडिते बन्धुवर्गे कारुण्याब्धिर्द्वारकां प्राप शौरिः ।
लोके घोरग्रीष्मसंतप्यमाने पूर्णस्तोयैर्द्यां यथा वारिवाहः । १३ ॥
सार्धं तावन्मायिना साल्वभर्त्रा युद्धं तन्वन्निद्धतीव्रप्रतापः ।
कौमोदक्या तस्य दामोदरोऽसौ चूर्णीचक्रे घूर्णमानं विमानम् ॥
आपद्व्याधौ भेषजं नाकभाजां वैरिध्वान्ते मण्डलं चण्डभानोः ।
चक्रं गृह्णन् निष्कृपश्चक्रपाणिर्दृप्तं शत्रुं कृत्तशीर्षं चकार॥ १५ ॥
रुष्टस्तावन्नष्टभीतिः पदातिर्गर्जन् घोरं तर्जयन् दुर्जयं तम् ।
बन्धौ भग्ने हन्तुकामो मुकुन्दं मन्तूयावान् दन्तवक्त्रः प्रपेदे १६॥

---

(११) *व्योमप्रान्ते लोलशैलानुकारा इति पाठान्तरम् ॥
(१६) मन्तूयावान्= रोषवान् । मन्तूयतिरेकीयमते रोषार्थकः ॥

शौरिः क्रोधादापतन्तं द्विषन्तं कौमोदक्या साल्वमार्गं निनाय ।
भूयश्चास्य भ्रातरं जातरोषश्चक्रेणासौ तत्प्रकारं चकार ॥ १७ ॥

तस्मिन् काले पाण्डवानां कुरूणां युद्धोद्योगे साम्यमेवाश्नुवानः ।
तीर्थे तीर्थे प्राप्य जाताभिषेको रामः प्रापन्नैमिशीयान्मुनीन्द्रान् ॥

विद्युद्वल्लीपिङ्गकोटीरभासः सद्यः सर्वे सन्नमन्तो मुनीन्द्राः ।
पूर्णानन्दाः पूजयामासुरेनं पुण्यात्मानः पूरुषं वेदवेद्यम् ॥ १९ ॥

अध्यासीनो हर्षणो रोमपूर्वो मध्येपीठं सीरिणा दारुणेन ।
क्षिप्तस्तावत् क्रूरवह्नेः कुशाग्रादग्रे तावत् भास्मनीं मूर्तिमाप २०॥

तस्य स्थाने तत्सुतं कल्पयित्वा तेषां वाचा रोषशून्यो बलोऽसौ ।
यज्ञे यज्ञे दानवं वल्कलाख्यं मूर्तं विघ्नं दुर्मतिं निर्ममन्थ॥ २१ ॥

तस्माल्लब्ध्वा तत्प्रसादं वनान्तात्तीर्थव्रातं क्षेत्रजातं च गत्वा ।
युद्धोद्युक्तौ भीमदुर्योधनौ स क्षेत्रेऽपश्यत् कौरवे वैरभाजौ २२॥

रोद्धुं युद्धादक्षमस्तत्क्षणन्तौ सम्प्रापासौ द्वारकां सीरपाणिः ।
भूयः सार्धं नैमिशीयैर्मुनीन्द्रैरिष्टिं कृत्वा तुष्टचेता बभूव॥ २३ ॥

प्रीत्या वासं द्वारकायां गृहिण्या साकं कुर्वन्नेकदा लोकनाथः ।
विप्रं ध्वस्तध्वान्तजालं कुचेलं भक्तिं पश्यन्नुन्नतामन्वगृह्णात् ॥

दृप्तैः क्षत्रैः पूजयित्वा कुठारं रामो यस्मिन् पञ्च तीर्थानि चक्रे ।
क्षेत्रं प्रापुस्तद्दिने सोपरागे सर्वे भक्त्या वृष्णयः कृष्णयुक्ताः ॥२५॥

स्नात्वा स्नात्वा तत्र तीर्थे पवित्रे क्षेत्रे पूर्णे पार्थिवौघैरनेकैः ।
दत्त्वा दत्त्वा वित्तजातं द्विजेभ्यो मोदं प्रापुर्यादवक्षोणिपालाः ॥

तीर्थे तस्मिन् पार्थमुख्यानुपेतान्
बन्धून् सर्वान् बन्धहीनोऽपि तावत् ।
संदृश्यासौ नन्दगोपं च गोपान्
प्रौढां प्रीतिं कैटभारिः प्रपेदे ॥ २७ ॥

पश्यन्तीनां पद्मनाभाननेन्दुं गोपालीनां बाष्पपूरच्छलेन ।
अन्तर्भागं प्रेमसिन्धुर्महीयानापूर्योच्चैर्निस्ससारेव भूयः॥ २८ ॥

विस्मेरास्या वीक्षमाणा जनाळी विश्वाधीशं वीक्षणैर्निर्निमेषैः ।
भासां नाथे भासमाने विराजत्पाथोजन्मा पद्मिनीवावभासे२९॥

आश्लिष्योच्चैरानमन्तौ यशोदा पुत्रौ तावत् पूर्णबाष्पाकुलाक्षी ।
शोकाह्वानान्निर्गता कूटबन्धादानन्दाख्यं सौधशृङ्गं जगाम॥ ३०॥

गोपालानां प्रौढबाष्पाम्बुपूरे स्नात्वा तावन्नेत्रपङ्केरुहाणि ।
पायं पायं कृष्णरूपामृतं तत् प्रापुर्मोदं कीदृशं नैव जाने॥ ३१ ॥

तापोद्रेकं शोकदावाग्निपातान्म्लायन्तीनां गोपसीमन्तिनीनाम् ।
शान्तिं निन्ये शीतळापाङ्गमालाधारापूरैः शौरिनीलाम्बुवाहः ॥

स्विद्यद्गात्रीरुद्यदानन्दपूर्णाः प्रौढप्रीतिर्गाढमालिङ्ग्य गोपीः ।
धन्यास्तत्त्वं बोधयित्वा गतिं स्वामन्वेष्योऽसौ योगिनामन्वगृह्णात्

अष्टौ दाराः पद्मनाभस्य हृष्टाः पृष्टाः सर्वा याज्ञसेन्या तदानीम् ।
ऊचुः स्वं स्वं विस्तरेण प्रकारं रुग्मिण्याद्याः कृष्णपाणिग्रहस्य३४

तावत्तस्मिन् कृष्णसंसक्तचित्तैर्भक्तैर्लोकैः पूर्यमाणे समन्तात् ।

क्षेत्रे चक्रुर्योगभाजो मुनीन्द्राः सर्वे दिव्याः संगतिं नारदाद्याः ॥ 35
वाग्भिर्मृग्यः पौरुषेयेतराभिः सच्चिद्रूपः पूरुषोऽसौ पुराणः ।
साकं सर्वैर्बन्धुलोकैर्मुनीन्द्रान् भक्त्या नत्वा वाचमूचे विनीताम् ॥ 36
अस्मात् किं वा भाग्यमन्यद्वरेण्यं संप्राप्तव्यं देहभाजां मुनीन्द्राः ।
वर्तन्ते यच्चिन्तनीया भवन्तो हन्तास्माकं गोचरे लोचनानाम् ॥ 37
चित्रं चित्रं पुण्यपाको महीयान् किं वाभीष्टं योजयेन्नैव पुंसाम् ।
दृश्यान्दिव्यैः केवलं जन्मनामी पश्यामो यन्मानुषेणैव युष्मान् ॥ 38
किं जप्तव्यं देवता का निषेव्या तीर्थे कस्मिन् देहिभिर्मज्जनीयम् ।
श्रेयः कार्यं किन्तु युष्मादृशानां कादाचित्कं दर्शनं लभ्यते चेत् ॥ 39
इत्थं वादिन्यम्बुजाक्षे मुनीन्द्रैरूचे तत्त्वं केन वा ज्ञायते ते ।
वाचां स्वामिन्नैगमीनां भवन्तं चूडारत्नं योगभाजो वदन्ति ॥४०॥
सच्चिद्रूपो निर्गुणस्त्वं निसर्गाद् भासि स्वामिन् प्राकृतानां गुणीव
नानाभावो जन्मनां कर्मणां ते कारुण्याब्धे विश्वसंरक्षणार्थः ॥ 41
इत्येवं तं संस्तुवन्तो मुनीन्द्रा भक्तात्मानं देवकीप्राणनाथम् ।
तस्मिन् क्षेत्रे याजयित्वा पवित्रे संप्रीतास्ते दिव्यलोकं प्रपन्नाः ॥ 42
क्षेत्रात्तस्मात् पद्मनेत्राभिरामाद्गोष्ठं प्रापुर्वल्लवा नन्दमुख्याः ।
शीतारण्यात् पूर्णतोयात् प्रदेशान्मार्गं यद्वन्मारवं पान्थलोकाः ॥ 43

---

(४३) मारवम् = मरुसंबन्धिं ॥

तीर्थात्तस्मात्तीर्णसंकल्पसिन्धुं तातं कृत्वा तावदम्भोजनेत्रः ।
जातप्रीतिर्ज्ञातिलोकैश्च सर्वैर्दारैः साकं द्वारकां संप्रपेदे ॥ ४४ ॥

लब्ध्वा निर्द्वैतात्मतत्त्वावबोधं देवात्तस्माद्देवकीवल्लभोऽसौ ।
ज्ञानादित्यस्योदयाज्जृम्भमाणं नानाबुद्धिध्वान्तजालं निरास ४५॥

मातुर्वाचा माधवः सीरिणासौ साकं गेहं प्राप्य वैरोचनीयम् ।
कंसेनासौ हिंसितानां सुतानां षट्कं वेगात्तत्समीपं निनाय ४६॥

पुत्रानेतान् वीक्ष्य निश्च्योतमाना
वक्षोजाभ्यां स्तन्यधारा जनन्याः ।
चित्ताकाशे जृम्भमाणस्य वेगा-
दानन्देन्दोश्चन्द्रिकेवावभासे ॥ ४७ ॥

हैरण्यत्वं ब्रह्मणः प्राप्य शापान्मायाशक्त्या देवकीजन्म लब्ध्वा ।
ध्वंसं प्राप्ताः कंसतः पूर्ववत्ते यातास्तावन्नन्दनत्वं मरीचेः॥ ४८ ॥

विप्रः कश्चित् जातुचिज्जातमात्रान्दृष्ट्वा नष्टान् नन्दनान् द्वारवत्याम्
निन्दन् भूयो नन्दसूनुं वितेने हाहावादं मोहपर्याकुलात्मा॥४९॥

पुत्रं त्रातुं सप्रतिज्ञोऽस्य गत्वा तद्गेहिन्याः सूतिकां सूतिकाले ।
तस्यां चक्रे बाणकूटं समन्तात् पार्थो वेगादात्तगाण्डीवधन्वा५०॥

भूयोऽप्येतस्यात्मजे जन्म लब्ध्वा विद्युल्लीलां तत्क्षणादेव याते ।
अन्विष्यामुं दिव्यलोकेष्वदृष्ट्वा वह्नौ बुद्धिं देहपाताय चक्रे ॥५१॥

अह्नायामुं वह्निपातं विधित्सुं रुध्वा पार्थं दर्शनं तत्सुतानाम् ।

निश्चित्याशां पश्चिमां तेन साकं शार्ङ्गी सद्यः संप्रतस्थे शताङ्गी ॥
सप्ताम्भोधीन् सत्वरं लङ्घयित्वा चक्री भूयश्चक्रवाळाचलं च ।
सस्मारासौ ध्वान्तनीलाश्मकूटच्छेदे टङ्कं *चक्रवर्यं स्वकीयम् ॥

तमोगुणमिवोर्जितप्रळयकालकाळाम्बुद-
प्रपञ्चमिव संचितं ततमिवाञ्जनाद्रेः कुलम् ।
अखण्डमिव पुञ्जितं निखिलपातकानां चयं
भयानकमिवौषधं किमपि नेत्रसंस्तम्भनम् ॥ ५४ ॥

पदार्थमतिमेचकं कमलजन्मना नित्यशो
विधातुमिव संचितं युगपदेव कार्ष्ण्यं गुणम् ।
अबोधमिव रूपिणं निखिलमेकतामाश्रितं
समस्तभुवनान्तरेष्वनवकाशतो जृम्भितम् ॥ ५५ ॥

तमःपटलमुल्लसच्चटुलचण्डकल्पानल-
प्रपञ्चसमुदञ्चितप्रचुरदीप्तिपुञ्जाञ्चितः ।
व्यधादथ सुदर्शनः सकलमेव तद्दूरतः
प्रबोध इव योगिनां प्रचुरजाड्यभारं क्षणात् ॥ ५६ ॥

सुदर्शनीयैरनिरोधनीयैः सीमाविहीनैर्महसां वितानैः ।

(५२) शताङ्गी=रथारूढः ॥ (५३) *स्वायुधं सोऽथ चक्रमिति पाठान्तरम् ॥

मुहुः प्रकाशान्विविधान् प्रदेशानतीयिवांसौ परमौ पुमांसौ ॥५७॥

अथ ददृशतुः श्रीमत्कल्पद्रुमञ्जुळमञ्जरी-
तरळविरणद्भृङ्गीसंगीतसंकुलदिङ्मुखम् ।
किमपि भवनं तारस्फारस्फुरन्मणिमण्डली-
तरुणकिरणश्रेणीशोणीकृतं हरिफल्गुनौ ॥ ५८ ॥

मुक्तामरीचिनिकरैररुणोपलांशु-
पुञ्जैस्तथा मरतकद्युतिमण्डलैश्च ।
मन्दारितं क्वचन पल्लवितं क्व चापि
शैवालितं क्वचन दद्दृविशेऽथ ताभ्याम् ॥ ५९ ॥

तत्र कौस्तुभगभस्तिसंचयैश्चित्रितं तुलितसान्द्रकान्तिभिः ।
बालभानुकरजालविस्फुरन्नीलमेघसुषमाविडम्बिनम् ॥ ६० ॥

आत्मजन्मभवनं पदाम्बुजं सेवितुं सकुतुकामुपागताम् ।
स्वर्धुनीमिव वहन्तमिन्दुना स्पर्धिनीं पदनखांशुमञ्जरीम् ॥ ६१ ॥

बिभ्रतं रुचिरबभ्रुतेजसा भासितं मृदुतरेण वाससा ।
काञ्चनोपलरुचेव संचितं नीलशैलकटकं कटीतटम् ॥ ६२ ॥

निन्दितोत्पलतनुप्रभामिळन्मन्दहासमधुराधरांशुभिः ।
संदधानमिव संगमं तमश्चन्द्रिकातरुणभानुरोचिषाम् ॥ ६३ ॥

उत्पलौघरुचिदर्पमोचनं सर्पराजमयतल्पशायिनम् ।

इन्दिराविहृतिमन्दिरोरसं वन्दिताङ्घ्रिमरविन्दजन्मना ॥ ६४ ॥
पोत्रिमत्स्यकमठादिमूर्तिभिः स्तोत्रघोषणपरैस्तथामरैः ।
शश्वदर्च्यचरणं मुनीश्वरैर्विश्वनायकमपश्यतामुभौ ॥ ६५ ॥

स्मेराननस्तदनु तौ मकुटांशुपुञ्ज-
नीराजिताङ्घ्रिकमलो हरिराबभाषे ।
आलोकनाय युवयोः परमत्र नीतान्
बालानिमान् द्विजपतेः सविधं नयेतम् ॥ ६६ ॥

भरनाशनपेशलौ धरायां नरनारायणसंज्ञितौ मदंशौ ।
परिपालयितुं युवां समस्तान्निरपेक्षावपि देहिनौ यतेथे ॥ ६७ ॥

आलापमेवमुपकर्ण्य तदा मुरारे-
र्बालान् रथेन भवनाद्भुवनैकभर्तुः * ।
कालाग्निसाम्यजुषि विप्रवरस्य शोक-
हालाहले व्यतनुताममृताम्बुपूरम् ॥ ६८ ॥

निरस्य सर्वं निजलीलयासौ भूभारमेवं भुवनैकनाथः ।
मुहुर्मुहुः शक्रमुखानमर्त्यानानन्दभाराकुलितान् वितेने ॥ ६९ ॥

---

(६४) इन्दिराविहृतिमन्दिरोरसमिति समासान्तानित्यतया समुपपादनीयम् ॥ (६७) अपिः प्रश्ने ॥ * अत्र किंचन लुप्तमिति प्रतिभाति

हृत्पङ्कजेषु महतां विहृतिं वितन्वन्
वक्षोरुहेष्वपि च पक्ष्मळलोचनानाम् ।
नेत्रामृतं स वपुषा जगतां त्रयाणां
श्रोत्रामृतं च चरितैर्विततान शौरिः ॥ ७० ॥

न जानन्तो दुःखं कथमिति विदन्तो न विपदां
कथां चामी कृष्णे हितकरणनिष्णे यदुजनाः ।
पुरे पूर्णानन्दा नियतमवसन् कल्पकतरो-
स्तटे वास्तव्यानां जगति किमलभ्यं तनुभृताम् ॥ ७१ ॥

मित्रौघान् सुखयन् द्विषः प्रशमयन् लोकत्रयीं पालयन्
देवार्तिं दमयन् वधूस्तरळयन् कीर्त्या जगत्पूरयन् ।
आनन्दं घनयन् सतां तिलकयन् स्वीयां पुरीं प्रीणयन्
ज्ञातीन् कन्दळयन् मुदं प्रणमतां रेमे स दामोदरः ॥७२ ॥

इति शङ्करकविकृते श्रीकृष्णविजये

द्वादशः सर्गः ।

शुद्धिपत्रम् ।

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१८	१३	गुलुच्छ	गुच्छालि
२४	१०	रुषा दृशौ	रुषं दृशा
३८	९	मर्कटेन	मर्ककेण
३९	१	यामनीषु	यामिनीषु
४२	७	स्वं नियोग	स्वं निकेत
४८	७	वत्सकैः	वात्सकैः
७९	१५	चारीन्म	चारी म
१०९	१५	पौलस्त्य	पौरस्त्य
१५०	९	भागविकार	भावविकार
१५५	६	मक्षलेखनं	मक्षखेलनं
१५८	५	दिवा च भुवा	भुवा च दिवा
,,	१४	दारुणमिति	दारुणमति
१७५	८	अग्रे तावत्	अग्रे तेषां

इतोऽपि स्खलितानि सकरुणं संसूचयत्सु कृतज्ञतामेष वक्ष्यामि ॥

Ed.